# अध्याय - ५

## ।।नगरनिवेशनम्।।

# अध्याय - ५

# नगरनिवेशनम्

कस्यापि नगरनिवेशने प्रपथमं भूचयनं कृत्वा चयितभूम्याः मापनं भवति।

**१.नगरमापनम् –**

नगरमापनमर्थात् नगरनिर्माणाय परिगृहितभूमौ कस्य स्थानस्योपरि परिखा, प्राकारः, राजमार्गः, राजप्रासादः, गोपुरं, चत्वरः तथा वीथी इत्यादीनां स्थापनं करणीयमिति। महाभारते **नगरं मापयामासुः।**[१] इति वर्तते। परिखा, प्रकारः, राजमार्गः आदीनां यथास्थर्नि निर्माणाय शिल्पकारः स्वस्य पूर्वनिर्मितयोजनानुसारं समस्त नगरभूमिषु धातुनिर्मित कीलकं रोपयति स्म। यथा हि–

**आनीयं कीलकं सूत्रं रोपयेच्च चतुर्दिक्।**[२]

**द्विघ्नायाममितम् .................अपरौ।।**[३]

तथा दृढसूत्रेण बद्धं करोति स्म। सूत्रेण सः नगरभूम्याः रेकाङ्कित अकरोत्। एषा रेखाणाम् अपराजितपृच्छाग्रन्थे **नगर–चिन्हानि**[४] इति कथितम्। अनेन प्रकारेण नगरे राजमार्गस्य रथ्यादिनामावश्यकाङ्गानां स्थानं शिल्पज्ञद्वारा निर्दिष्टं भवति।

---

[1] महाभारत, आदिपर्व, अ.१९९

[2] अपराजितपृच्छा, पृ–१२३

[3] वास्तुरत्नाकर, शल्योद्धारप्रकरण–१,पृ–२०

समराङ्गणसूत्रधारग्रन्थे नगरमापनहेतुः **पुरविनिवेशम्** तथा **पुरनिवेशनम्** एवं **पुरस्थापनम्** आदिशब्दानां प्रयोगः वर्तते।[५]

नगरमापनसम्बन्धितः उल्लेखः निम्नदर्शितग्रन्थेषु अपि प्राप्यते। यथा हि–

दीधनिकायग्रन्थे–

**पाटलिग्रामे नगरं मापेन्ति।**[६]

महा उम्मग जातके - **नगरं वेदेहेन सुमापितम्।**[७]

मिलिन्दपञ्हो – **नगरं मापेतुकामो।**[८]

रामायणे– **निवेश्य पञ्चभिर्वर्षैर्भरतो राधवानुजः।**[९]

युगपुराणानुसारम् – **स्थापयेन्नगरं रम्यं पुण्यारामजनाकुलम्।**[१०]

मयमतमनुसारमपि – **नगरादीनां मानं विन्यासं च .........।**[११]

तथा युक्तिकल्पतरुग्रन्थेऽपि – **नगरं कारयेन्नृपः।**[१२]

---

4 अपराजितपृच्छा, पृ–१२४

5 समराङ्गणसूत्रधार, अ.२३,पृ–१०५

6 दीधनिकाय, २,महापरिनिम्बानसुत, १५२

7 महा उम्मग जातक, ६.४४८

8 मिलिन्दपञ्हो, महावगो, पृ–३१

9 वाल्मीकि रामायणम्, उत्तरकाण्ड, सर्ग–१०१.१६

10 युगपुराणम्, पृ–३०

11 मयमतम् , अ.१०.१

12 युक्तिकल्पतरु, नगरयुक्ति, १४५

## २.नगरे मार्गनिवेशः –

एकस्थानतः अन्य स्थान पर्यन्तमावागमनार्थं भू–पृष्ठस्योपरि निर्मितं रचनायां पथः मार्गः इति ज्ञायते। प्राचीनतमं सहित्यवेदेषु भूमि, समुद्र तथा अन्तरिक्षे आवागमनस्य साधनरुप रथ–यानस्य रचना सम्बन्धित विवेचनेन मार्ग प्रकल्पनस्य सङ्केतः प्राप्यते।[१३]

वाल्मीकिरामायणेऽपि नैकस्थलानामुपरि अश्वरथानां उल्लेखनेन सह मार्गनिर्माणस्य विधानं प्राप्यते।[१४] महर्षिपाणिनिः अपि स्वस्य व्याकरणग्रन्थे अष्टाध्यायीग्रन्थे अजपथः, हस्तिपथः तथा रथपथस्य उल्लेखं करोति।[१५]

नगरनिवेशने मार्गयोजना स्थपतेः स्थापत्यस्य परमकौशल्यमस्ति। एतत् यातायात वा आवागमनस्य आधारभूतं साधनं वा सञ्चार–सुविधायाः तथा भूमिविन्यासे विभिन्नवर्गीय आवासीय भवनस्य विभाजनं एवं नगर तथा जनपदस्य मध्ये सम्पर्क स्थापन हेतुः अपि परमावश्यकः अस्ति। तदरिक्तं मार्गविनिवेशस्य एकः अन्य परमप्रयोजकः एतत् अपि अस्ति यत् दिङ्निर्णयानन्तरं आरोग्यप्राप्त्यर्थं तदनुरुपः जनानां भवन–विन्यासः एतादृशं करणीयं यत् गृहश्चास्मिनः स्वस्य परिजनेन सह प्रातःकालिकसूर्यकिरणस्य प्रकाशः एवं स्वच्छ शुद्धस्य वायोः अधिकतया उपभोगः कर्तुं शक्यन्ते।

---

[13]ऋग्वेदः,१.२०.३०,१.३४.२,१.३४.७,१.१६३.८,२.३४.७,२.३४.८,३.१५.५,३.५ ३.४–६,४.२.४ इत्यादि।

[14] वाल्मीकिरामायणम् , बालकाण्ड, सर्ग–६९,अयोध्याकाण्ड, सर्ग–१६,७१,८० आदि।

[15] हिन्दी विश्वकोशः, खण्ड–११,पृ–४४१।

**▶ मार्गसंख्या –**

नगरनिवेशने मार्गसंख्या सम्बन्धे वास्तुविशेषज्ञाः स्वस्य ग्रन्थेषु नगरस्य विस्तारस्याधारेण भिन्न–भिन्नसंख्या निर्धारणं कृतवन्ताः।

मनसारग्रन्थानुसारम् –

**प्राक् प्रत्यग्गतामायामं दक्षिणोत्तरसमन्वि(सं यु) तम्।**

**एकरथ्यां समारभ्य ए (चै) कैकं(क) वीथिवर्धनात्।।**

**वीथिद्वादशपर्यन्तं युग्मायुग्मं प्रकल्पयेत्।**[१६]

अर्थात् नगरे पूर्वतः पश्चिमपर्यन्तं तथा दक्षिणतः उत्तरपर्यन्तं समान्यतया एकः मार्गः तथा तेषां क्रमशः विवर्धयित्वा द्वादशपर्यन्तं मार्गाणां परिकल्पना वर्तते।

मयमतग्रन्थानुसारं नगरस्य मानानुसारं क्रमशः समसंख्यायां पूर्वतः पश्चिमपर्यन्तं तथा उत्तरतः दक्षिणपर्यन्तं १२–१२,१०–१०,८–८,६–६,४–४,२–२ तथा विषम संख्यायां ११–११,९–९,७–७,५–५,३–३,१–१ मार्गाणां स्थापनाकरणीयमिति। यथा–

**प्राक्प्रत्यग्गतमार्गा द्वादश दश वाऽष्टषट्चतुर्युगलम्।**

**तावदुदीचीनास्ते तत्रैवायुग्मसंख्या वा।।**

**एकादशनवसप्तकपञ्चगुणा वैकमार्गा वा।**

**युग्मायुग्मपदेषु द्वयेकत्रिभिरंशकैरजांशाः स्युः।।**[१७]

एवं ग्रन्थकारानुसारं

**दण्डवदेका वीथी तद्दण्डकमित्यभीष्टं स्यात्।।**[१८]

---

[16] मानसार ,१०.५६–५७

[17] मयमतम् , १०.५२–५३

दण्डसमानमेक वीथी दण्डकसंज्ञकं ज्ञायते। उत्तरत: आगतो मार्ग: दण्डकमार्गे मध्ये मिलति स्तदा एष: मार्ग: कर्तरिदण्डक मार्ग: इति नाम्ना ज्ञायते। यदा पूर्वदिशात: इष्टिकानिर्मितौ द्वौ मार्गौ आगतौ तदा एष: मार्ग: बाहुदण्डक मार्ग: इति नाम्ना ख्यात:। यदा नगरे चर्तुदिक् द्वाराणि सन्ति एवं वीथ्यायां मध्ये द्वयो: पार्श्वे अधिकसंख्यायां कुट्टिमयुक्त (इष्टिका निर्मित) मार्गाणां मेलनं भवेत् तेषां कुटिकामुखदण्डक: मार्ग: इति नाम्ना प्रख्यात:। पूर्वत: आगता: त्रय: मार्गा: तथा उत्तरत: आगता: त्रयाणां मार्गाणां सम्मेलने कलकाबन्धक दण्डक इति नाम्ना प्रख्यात:। [१९] तिस्त्र: प्राङ्मुखी वीथय च उत्तरमार्गा: त्रय: आगच्छेत् तत्र एतेषामेकैकान्तरितास्ते नैके कुट्टिममार्गा: भवेयु: इति वेदीभद्रकमार्ग: इति नाम्ना विख्यात:। एष: मार्ग: नगरादीनामिदं शस्तम् भवति। स्वस्तिकनगरे स्वस्तिकाकारमार्गयोजना विद्यात् तत्र प्रागुत्तरमुख्यमार्गा: षट्षट्भि: स्थापनीयम्।[२०]

**प्राचीनोदीचीनाश्चत्वारश्चैव मार्गा: स्यु:।।**

**ब्रह्मावृतपथमेकं कुट्टिममार्गास्त्रय: प्राच्याम्।**

**एतद् भद्रकमुदुतं नाम्ना नगरादिविन्यासम्।।**[२१]

एवमेव पूर्वत: पश्चिमपर्यन्तं तथा उत्तरत:दक्षिण पर्यन्तं मार्गाणां संख्या चत्वारो स्यु: । तेषां एक: मार्ग: प्रमुख: ब्रह्मस्थानत: आगच्छति। प्राचीत: कुट्टिममार्गास्त्रय: आगच्छन्ति एतद् मार्गयोजना भद्रकनाम्ना प्रख्यात:। एतावत् मयमतग्रन्थे नगरनिवेशने पूर्वत: पश्चिमपर्यन्तं तथा

---

[18] मयमतम् , १०.५४

[19] मयमतम् , १०.५५–५७

[20] मयमतम् , १०.५८–६०

[21] मयमतम् , १०.६१–६२

उत्तरत: दक्षिणपर्यन्तं मार्गाणां संख्या न्यूनतमं द्वे वा षट् तथा अधिकतमं चतुर्विंशति (२४) दर्शितम्।

समराङ्गणसूत्रधारग्रन्थे भोजराज: श्रेष्ठनगरे पूर्वत: पश्चिमपर्यन्तं तथा दक्षिणत: उत्तरपर्यन्तं राजमार्गा:, महारथ्या, उपरथ्या, रथ्या आदि मार्गाणां कुल संख्या ३४ दर्शयति। यथा–

**प्राक्प्रत्यगायताः सप्तदशमार्गा इतीरिताः।**

**याम्योत्तरायतास्तद्वदन्ये स्युस्तत्प्रमाणतः।।**[२२]

राज्ञ:भोजस्य काले अर्थात् एकादशी शताब्द्यामपि आवागमनस्य सुविधाया: प्रति कीदृशी अवधानं ददाति इति दृश्यते। राजवल्लभग्रन्थेऽपि सूत्रधारमण्डन: एतस्य अनुमोदनं कृत्वा कथयति यत्–

**मार्गाः सप्तदशैव चाहिनपुरे हीनं चतुर्भिः पुर**

**प्रोक्तं कन्यसमेव मार्गनवभर्दिर्ध्ये तथा विस्तरे।**[२३]

अर्थात् उत्तमनगरे १७–१७ मार्गा:, मध्यमनगरे १३–१३ मार्गा: तथा कनिष्ठनगरे ९–९ मार्गा: निर्मितव्यमिति निर्दिष्टम्। तथा

**मार्गाः सप्तदशाङ्कपञ्चशिखिनो युग्मं पुरात् खर्वटम्** .......।[२४]

ग्रामे–९, खेटे–५, कूटे–३, तथा खर्वटे– २ मार्गाणां निर्माणविधि: वर्णित:।

नगरे मार्गनिर्माणम् एतादृशं करणीयं नगरे विभिन्नप्रकारस्य आन्तरिकमेवं बाह्यं निवेशनमुचितरूपेण सम्पन्नं भवेत् तथा नानाविधप्रकारस्य जननिवेश:,जनभवनानि,

---

22 समराङ्गणसूत्रधार, १०.१५

23 राजवल्लभवास्तुशास्त्रम्, अ.४.९

24 राजवल्लभवास्तुशास्त्रम्, अ.४.१४

राजभवनानि, देवप्रासादाः, वाटिकाः, सरांसि, क्रीडाक्षेत्राणि इत्यादीनां निवेशने स्वास्थ्यप्रदं वातावरणं , पर्याप्तरूपेण सूर्यप्रकाशस्यागमनं तथा पर्याप्तमात्रायां समीरस्य सञ्चारः सुचारुरूपेण सम्पन्नं भवेत् इति।

वास्तुरत्नावल्यामपि नगररचनान्तर्गतं मार्गसङ्ख्या दर्शितम्। यथा हि –

**मार्गाः सप्तदशैव चादिमपुरे हीनं चतुर्भिः परं**

**प्रोक्तं कन्यसमेव मार्गनवभिर्दैर्ध्ये तथा विस्तरे।**

**ग्रामश्चैव पुरार्धतो हि तदनु ग्रामार्धतः खेटकं**

**खेटार्धेन तु कूटमेव विबुधैः प्रोक्तं ततः खर्वटम्।।**[२५]

अर्थात् उत्तमनगरे सप्तदश(१७) मार्गाः निर्मातव्याः। मध्यमनगरे चतुर्भिहीनम् अर्थात् त्रयोदश(१३) मार्गाः स्थापनीया। कनिष्ठनगरे नव(९) मार्गाः कार्या। सर्वेषां मार्गाः यथा दैर्ध्यं तथैव विस्तारेऽपि विधेयाः। नगरमार्गप्रमाणतः अर्धप्रमाणेन ग्रामे मार्गनिर्माणं करणीयम्। ग्राममार्गप्रमाणतः खेटके मार्गप्रमाणं स्थाप्यम्। खेटकमार्गप्रमाणतः तु कूटस्य मार्गप्रमाणं विधातव्यम्। कूटार्धेन खर्वटस्य मार्गप्रमाणं निर्मापनीयमिति विबुधैः प्रोक्तम्।

► **राजमार्गः-**

मार्गेषु प्रथमस्थानं राजमार्गस्य वर्तते। राजमार्गः अर्थात् राज्ञां मार्गः नास्ति किन्तु मार्गाणां राजा इति राजमार्गः।

वास्तुरत्नावल्यां नगरस्य राजमार्गनिर्माणविधिमाह –

**मार्गाः सप्तदशाङ्कपञ्चशिखिनो युग्मं पुरात्खर्वटं**

**मार्गाः षोडशसूर्यविंशतिकराः कार्यास्त्रिधा विस्तरे।**

---

[25] वास्तुरत्नावली, अ.९, पृ–१४९

**प्राकारोदय ऋत्तहस्तमपितो द्वाभ्यां विहिनाधिकाः**

**व्यासार्धेन तदुर्ध्वतश्च कपिशीर्षाणयष्टमात्रान्तरात्।।** [२६]

समराङ्गणसूत्रधारग्रन्थे राजमार्गस्य निवेशनं नगरस्य वास्तुपदस्य मध्यवंशस्योपरि दर्शितमस्ति। राजाभोजस्य मतानुसारम्–

**चतुरश्रीकृते क्षेत्रे प्रागुदीच्यन्तमागताः।**

**चतुर्भागान्तरा वंशाः कार्यास्तस्य त्रयस्त्रयः।।**

**वंशषट्कविभक्तेऽस्मिन् पदषोडशकान्विते।**

**राजमार्गः शुभः कार्यो मध्यमं वंशमाश्रितः।।** [२७]

अर्थात् नगरस्य क्षेत्रं चतुरस्रं कृत्वा पूर्वतः पश्चिमपर्यन्तं तथा दक्षिणतः उत्तरपर्यन्तं चतुर्भागो त्रयाणां त्रयाणां वंशानां स्थापनं करणीयम्। षडवंशे विभक्तेन षोडश कोष्ठाः भवन्ति। तत्पश्चात् मध्ये मध्यमवंशस्यावलम्बनं कृत्वा मध्ये राजमार्गस्य निर्माणं करणीयम्।

राजमार्गाणां निर्माणमधिकं विस्तृतं करणीयम्। राजमार्गस्य विस्तारः अधिकं भवति चेत् तस्योपरि सूर्यप्रकाशः तथा वायोः सञ्चारः सुचारुरुपेण भवति । एतस्य सन्दर्भे विष्णुसंहितायां स्पष्टं निर्दिष्टमस्ति। यत्–

**पन्थानश्च विशुध्यन्ति सोमसूर्यांशुमारुतैः।** [२८]

अर्थात् सोमस्य तथा सूर्यस्य रश्मि तथा अनिलस्य सञ्चारनार्थं राजमार्गस्य निमार्णं विस्तृतं करणीयं कारणं राजमार्गः शुद्धः भवेत् । राजमार्गस्य विस्तारमधिकं करणीयं तस्य द्वितीयं कारणं यातायातस्य सुविधा अपि सुगमतया भविष्यति।

---

[26] वास्तुरत्नावली, अ.९, पृ–१५१

[27] समराङ्गणसूत्रधारः अ.१०.५–६

[28] विष्णुसंहिता, अ.२३, प्राचीन भारत मे नगर तथा नगरजीवन,पृ.२५१तः उद्धृत।

समराङ्गणसूत्रधारग्रन्थे राजाभोजेन नगरस्य परिमाणाधारेण राजमार्गस्य विस्तार: निश्चित: कृत:। यथा–

**कार्यो ज्यायसि (च) ज्यायां श्चतुर्विशंतिकः करैः।**

**विंशत्या मध्यमे मध्यमोऽधमे षोडशकोऽधमः।।**[२९]

यथा ग्रन्थानुसारं ज्येष्ठनगरे राजमार्गाणां विस्तार: २४ हस्तं ,मध्यमनगरे २० हस्तं, तथा कनिष्ठनगरे १६ हस्तं मानानुसारं मार्गाणां निर्माणं करणीयम्।

शुक्रनीतिग्रन्थे आचार्य: शुक्र: महानगरेषु एवं राजधानीषु लघु–लघु मार्गाणां निषेध: करोति। कारणं नगरस्य स्वच्छतायां, स्वास्थ्ये एवं शुद्धतायाम् अवरोध: भविष्यति। राजमार्गाणामत्यधिकं विस्तृतं निर्मार्णस्य द्वितीयकारणं राजमार्गाणामधिकविस्तृतेन आवागमनयो: सुविधा सुगमं सरलं च भविष्यति। शुक्रनीतिग्रन्थे –

**राजमार्गास्तु कर्त्तव्याश्चतुर्दिक्षु नृपगृहात् ।**

**उत्तमो राजमार्गास्तु त्रिंशद्धस्तमितो भवेत्।**

**मध्यमो विंशतिकरो दशपञ्चकरोऽधमः।**

**पण्यमार्गास्तथा चैते पुरग्रामादिषु स्थिताः।।**[३०]

वायुपुराणम् तथा ब्रह्माण्डपुराणे –

**धर्नूंषि दशविस्तीर्णः श्रीमान् राजपथः स्मृतः(कृतः)।**[३१]

---

[29] समराङ्गणसूत्रधार:, अ. १०.७

[30] शुक्रनीति १.२६०–६१

[31] वायुपुराणम् , ८.११४ , ब्रह्माण्डपुराणम् ,२,७.११३

देवीपुराणे दिशामार्गः १३५ फुटमितं तथा ग्राममार्ग–जनपदमध्यमार्ग १२० फुटमितं विस्तृतं करणीयमिति दर्शितम्। अनेन प्रकारेण सीमामार्गस्य एवं राजमार्गस्य विस्तारः ६० फुटमितं दर्शितम्।[३२]

विष्णुपुराणानुसारं–

**प्रविष्टौ राकृष्णौ च राजमार्गमुपागतौ।**

**स्त्रीभिर्नरैश्च सानन्दं लोचनैरभिवीक्षितौ।।**[३३]

एतत् विदितं भवति मथुरानगर्याः राजमार्गः अधिकः विस्तृतः आसीत्, अतः यदा श्रीकृष्णबलरामौ राजमार्गमुपागतौ तत्समये अनैके स्त्रिभिः नराश्च तेयोर्दर्शनस्य अवसरः प्राप्तवन्ताः।

समराङ्गणसूत्रधारग्रन्थे भोजराजः पूर्वतः पश्चिमपर्यन्तं तथा दक्षिणतः उत्तरपर्यन्तम् एकः एकः राजमार्गस्य निवेशनस्य निर्देशयति। परन्तु अधिकतया प्रायः बृहन्नगरे अधिकं राजमार्गाः भवन्ति स्म। मार्गाणां संख्यानिर्धारणं नगरस्य विस्तारस्य आधारस्योपरि भवति स्म। शुक्राचार्यः स्पष्टं निर्देशयति–

**पुरं दृष्ट्वा राजमार्गान् सुबहून् कल्पयेन्नृपः।।**[३४]

आचार्य चाणक्यमतानुसारं –' **राजमार्गास्त्रयः..............।**[३५]

---

[32] भारतीय वास्तुशास्त्र, वास्तुविद्या तथा पुरनिवेश, पृ. १६४–१६५

[33] विष्णुपुराणम् , ५,१९.१२–१३

[34] शुक्रनीति, १.२६३

[35] अर्थशास्त्र,अधिकरण–२, अ.–४,पृ–११०

अर्थात् एकस्मिन् एव नगरे त्रयाणां राजमार्गाणां स्थापनां कर्तुं शक्यते। तेन सह बहिष्टात् आगमनार्थं स्थलमार्गेण सह जलमार्गस्यापि निर्देशोऽस्ति, यथा–

**युक्तोदकभूमि ....................पथः।** [३६]

राजमार्गस्य निर्माणं स्थापत्यशास्त्रास्य नियमानुसारं दृढं करणीयम्। समराङ्गणसूत्रधरग्रन्थे राजाभोजस्यानुसारम् –

**बलस्य चतुरङ्गस्य पौराणां पार्थिवस्य च ।**

**असम्बाधसमश्चैव कार्योऽयं काश्मशर्करः।।** [३७]

राजमार्गस्य निर्माणं महाराजस्य, चतुरङ्गबलस्य (रथिनः, गजारोहिणः एवं पदाति) तथा पौराणां निर्बाधमावागमनस्य व्यवह्यायाः कृते काश्मशर्करश्चैव असम्बाधसमश्चैव करणीयम्। [३८]

मानसार ग्रन्थेऽपि –

**महामार्गं तु सर्वेषां (वांसां) वीथीनां कर्करीकृतम्।।** [३९]

अर्थात् राजमार्गाः दृढाः करणीयाः इति निर्देशो वर्तते।

शुक्रनीतिग्रन्थे –

**कूर्म्मपृष्ठा मार्गभूमिः कार्य्या .................।** [४०]

---

36 अर्थशास्त्र,अधिकरण–२, अ.–४,पृ–११०

37 समराङ्गणसूत्रधारः ,अ. २३.८

38 समराङ्गणसूत्रधारः ,अ. १०.८

39 मानसार , ९.९९

40 शुक्रनीति, १.२६६

राजमार्गाणां मध्यभागः कूर्मपृष्ठभूमिः इव उन्नता करणीया। राजमार्गाणाम् एतावत्निर्माणे मार्गाणामुपरि जलसञ्चयः न भविष्यति। तथा –

**कुर्य्यान्मार्गान् पार्श्वखातान्निर्गमार्थं जलस्य च।**[४१]

मार्गाणां द्वयोर्पार्श्वे जलनिर्गमार्थं जलमार्गः (जलनलिका) निर्मातव्यः।

समराङ्गणसूत्रधारग्रन्थेऽपि –

**जलभ्रमान् पुरे कुर्याच्छिलादारुतिरोहितान्।**

**द्विकरान् करमात्रान् वा साम्भसोऽस्मिन् प्रदक्षिणान् ।।**[४२]

नगरे जलभ्रमस्य निर्माणमावश्यकमस्ति, तस्य प्रमाणं द्विहस्तं, वा एकहस्तप्रमाणं करणीयम्। तेषां शिला वा काष्ठेन सर्वदा आच्छादितं करणीयमिति निर्दिष्टम्।

**►महारथ्या –**

नगरनिर्माणानन्तर्गतं मार्गनिवेशने राजमार्गस्यानन्तरं महारथ्यानां निर्माणं करणीयम्। रथ्याशब्दार्थः–

**भूयोभूयः सविधनगरीरथ्या पर्यटन्तम्।**[४३]

रथादियानानां सुविधापूर्णसुचारुरुपेण सञ्चारः भवेत् इत्यर्थः निर्मितः मार्गः इति रथ्या मार्गः। मयमतग्रन्थेऽपि यथा –

**ग्रामावृता मङ्गलवीथिकाख्या पुरावृता या जनवीथिका स्यात्।**

**तयोस्तु रथ्याभिहिताभिधा स्यात् पुरातनैरन्यतमेष्वथैवम्।।**[४४]

---

41 शुक्रनीति, १.२६६

42 समराङ्गणसूत्रधारः, १०.५२

43 संस्कृत हिन्दी कोश (आप्टे) , पृ.८४७

ग्रामवृता वीथी मङ्गलवीथिका तथा नगरावृता वीथि जनवीथिका नाम्ना प्रख्याता। तयो वीथिकास्तु रथ्या इति नाम्ना विख्याता।

एतावत् शिल्परत्नग्रन्थेऽपि –

**नगरे रथवीथिः सा रथ्याख्या।**[४५]

समराङ्गणसूत्रधारानुसारं आदर्श नगरे न्यूनातिन्यूनं द्वे महारथ्यो निश्चयेन स्थापनीये।

**महारथ्याद्वयं कार्यं तदुपरान्तस्थवंशयोः।**

**तद्द्वादश दशाष्टौ स्यात् करान् ज्येष्ठादिकं त्रिषु।।**[४६]

वास्तुपदविन्यासस्य प्रक्रियानुसारं द्वयो महारथ्ययो स्थापनं राजमार्गस्य पार्श्वद्वये वंशस्योपरि स्थापनं करणीयम्। तेषां प्रमाणं राजमार्गस्य अर्धप्रमाणेन अर्थात् उत्तमनगरे द्वादशहस्ताः, मध्यमनगरे दशहस्ताः तथा कनिष्ठनगरे अष्टहस्ताः निर्मितव्याः।

**►यानमार्गः** -

राजमार्गाणां तथा महारथ्यानां निवेश योजनानन्तरं यानमार्गस्य योजना अपि नगरनिवेशने अतीवावश्यकं वर्तते। तेन द्वारा नगरस्याभ्यन्तर प्रदेशेऽपि यानानां सञ्चरणं सरलतया भविष्यन्ति। समराङ्गणसूत्रधारग्रन्थे राजाभोजःकथयति -

**पदमध्यगतं कार्यं यानमार्गचतुष्टयम्।**

**ज्येष्ठादिषु पुरेष्वेषु तत्पद्यं च चतुःकरम्।।**[४७]

---

[44] मयमतम् , ९.३९

[45] शिल्परत्न , अ.५,पृ.२३

[46] समराङ्गणसूत्रधार , १०.९

[47] समराङ्गणसूत्रधार, १०.१०

अर्थात् नगरस्य मध्यपदे चतुर्थयानमार्गानां निर्माणं करणीयम्। तस्य विस्तारं ज्येष्ठादि नगरे चतुर्हस्ता करणीया।

**►जङ्घापथः-**

**यानमार्गचतुष्कस्य कार्यौ पार्श्वद्वयाश्रितौ।**

**पदाष्टकपदान्तस्थौ द्वौ-द्वौ जङ्घापथावपि।।**

**पुरे ज्येष्ठे त्रिहस्तौ तौ मध्यमेऽर्धकरोज्झितौ।**

**मध्यमादर्धहस्तेन हीनौ स्यातां कनीयसि।।** [४८]

यानमार्गानां द्वयोर्पार्श्वे पदातिपथिकानां सुसञ्चारनार्थं द्वौ-द्वौ जङ्घापथौ पदान्तस्थ पदाष्टककानां स्थापना अनिवार्य दर्शिता। तेषाम् आधुनिक भाषायां फुटपाथ इति संज्ञां ज्ञातुं शक्यते। आधुनिकमार्गविन्यासे प्रायः सर्व बृहद् मार्गाणां द्वर्योपार्श्वे स्थाप्यते। ग्रन्थानुसारं तेषां प्रमाणं ज्येष्ठनगरे त्रयहस्ताः, मध्यमनगरे सार्धद्विहस्तौ तथा कनिष्ठनगरे द्विहस्तौ इति प्रमाणम्।

**► उपरथ्यारथ्या च –**

समराङ्गणसूत्रधारग्रन्थानुसारं नगरस्य आन्तरिकभागे जनावासानां परस्परं सन्धिकरणार्थं , सूर्यप्रकाशस्य निर्बाधप्राप्त्यर्थं, वायोः उपभोगः आवागमनस्य सुविधा एवं सरलता आदीनां दृष्ट्या नगरे उपरथ्यायाः एवं रथ्यायाः विनिवेशनमनिवार्यं मन्यते। एतेषां नगरस्य आन्तरिकनिवेशने तथा नगरस्य विभिन्नभागानां विभाजने सहायकाः भवति। तेषां प्रमाणम्-

**उपरथ्या महामार्गस्यार्धं वा द्विशताधिकम्।** [४९]

---

[48] समराङ्गणसूत्रधार, १०.१२-१३

[49] समराङ्गणसूत्रधार, १०.११

उपरथ्याः प्रमाणं महामार्गस्य अर्धप्रमाणेन वा द्विहस्ताधिकम् अर्थात् ज्येष्ठनगरे षड्हस्तं वा अष्टहस्तं, मध्यमनगरे पञ्चहस्तं वा सप्तहस्तं तथा कनिष्ठनगरे चतुर्हस्तं वा षड्हस्तं प्रमाणेन करणीयम्।

रथ्यामार्गस्य प्रमाणम्–

**शेषा रथ्यास्तदर्धेन विधातव्याः प्रमाणतः।** [५०]

शेषा रथ्या नामक मार्गः उपरथ्यातः अर्धप्रमाणेन कर्तव्याः। तेषां प्रमाणं ज्येष्ठनगरे त्रिहस्तं, मध्यमनगरे सार्धद्विहस्तं तथा कनिष्ठनगरे द्विहस्तं प्रमाणेन करणीयमिति राजाभोजः निर्देशयति।

**► घण्टामार्गः –**

समराङ्गणसूत्रधारग्रन्थे पुरनिवेशे मार्गविन्यासान्तर्गतमुपर्युक्तं पञ्चादशमार्गाणां निवेशयोजनोपरान्तमेकम् अन्यमहत्त्वपूर्णमार्गाणां निर्माणस्य निर्देशं प्रदत्तम्। एतेषां घण्टामार्गः इति नाम्ना विख्यातः। यथा–

**पुरस्यान्तर्गतौ कार्यौ घण्टामार्गौ तथापरौ।**
**राजमार्गगुणोपेतौ प्रमाणेन च तद्विधौ।।** [५१]

राजमार्गस्य गुण प्रमाणतुल्यं नगरस्यान्तर्गतं पूर्वतः पश्चिमपर्यन्तं तथा उत्तरतः दक्षिण पर्यन्तम् एकः–एकः घण्टामार्गस्य स्थापना कर्तव्या।

---

[50] समराङ्गणसूत्रधारः, १०.११

[51] समराङ्गणसूत्रधार, १०.१४

एतादृशे नगरे पूर्वतः पश्चिमपर्यन्तं तथा उत्तरतः दक्षिणपर्यन्तं मार्गाः स्थापनीयाः। एतेषां सर्वे मार्गाः परस्परं समकोणे सन्धयन्ति। नगरनिवेशने एतादृशा मार्गविनिवेश पद्धति वर्तमानकालेऽपि नैकनगरे, महानगरे दृश्यन्ते।

समराङ्गणसूत्रधारग्रन्थे राजाभोजेन एकमादर्शनगरे यानादि तथा पदातीनां सूखपूर्वक सञ्चरनार्थं भिन्न भिन्न मार्गाणां निवेशनस्य निर्देशं दर्शयति यत् प्रचीनकालेऽपि मार्गस्थापनायाः पर्याप्तं चिन्तनं कुर्वन्ति स्म इति दर्शयन्ति। एतवत् मार्गनिवेश योजना मयमतम्, मानसार, अर्थशास्त्रम्, शुक्रनीतिः तथा विभिन्न पुराणेषु समुचितं वर्णनं प्राप्यते।

समराङ्गणसूत्रधार ग्रन्थे परिकल्पित मार्गनिवेश–पद्धत्याः स्पष्टता निम्नदर्शित कोष्टकरुपेण स्पष्टी क्रियते–




**मार्गविन्यासे चतुष्पथाः: -**

नगरे मार्गविन्यासे मार्गाणां परस्परं सङ्गमस्थान भवति इति चत्वरः। अन्यप्राचीनग्रन्थेषु यथा मनुस्मृत्यां **चतुष्पथः**[५२] तथा अमरकोशे **श्रृङ्गाटक चतुष्पथे।**[५३] आदी शब्दप्रयोगाः दृश्यन्ते। वाल्मीकिरामायणेऽपि अयोध्याकाण्ड, सर्ग१७.४५ एतत् शब्दप्रयोगः मिलति। चत्वरोपरि सभामण्डपाः- पण्यशालाः- देवतयतनाः- जलस्रोताः इत्यादीषु एकस्य निर्माणं कृत्वा चतुष्पथस्य शोभावृद्धिं करणीयम्। समराङ्गणसूत्रधारानुसारम् **.......नवचत्वरम्।।**[५४]

समराङ्गणसूत्रधारग्रन्थानुसारं नगरनिवेशने नवचतुष्पथानां निर्माणस्य निर्देशं प्राप्यते। कदाचित् तेषां सङ्ख्या नवाधिकमपि भवन्ति स्म। कारणं चत्वराणां निर्माणं नगरस्य मार्गोपरि आधारितं भवति अतः यत्र द्वौ प्रमुखमार्गयोः मेलनं भवति तत्र स्वतः एव चतुष्पथानां जन्मः भवति। यथा कस्यापि नगरे मार्गाणां सङ्ख्या अधिकं वा न्यूनं भवति तेनाधारोपरि चत्वराणां सङ्ख्या अपि भवति। **३. वप्रनिर्माणम्** -

वास्तुशास्त्रीयनगरनिवेशप्रक्रियायां नगरस्य रक्षाव्यवस्था एकं महत्त्वपूर्णमङ्गमस्ति। अतः नगरसन्निवेशे नगरमापनं तदुपरान्तं समीपस्थ राज्यानामाक्रमणस्य भयात् सर्वप्रथमं तस्य सुरक्षायाः साधनानामुपरि विशेषरूपेण ध्यानं ददाति स्म, तदनन्तरं यातायाताद्यर्थं राजमार्गस्य, रथ्यायाः तथा राजप्रासादादीनां नगरनिवेशस्य अन्यावश्यकाङ्गानां निर्माणं भवति स्म। सुरक्षायाः साधनानां प्रकारद्वयं वर्तते- प्राकृतिकं तथा कृत्रिमम्। प्राकृतिकसाधनानि नदी, जलं, पर्वतः, प्रस्तरसमूहः, मरुभूमिः तथा अरण्यमित्यादयः भवन्ति। तत्र नदी तथा पर्वतः

---

52 मनुस्मृति, ४.३९,९.२६४,११.११८

53 अमरकोश, काण्ड-२.१७

54 समराङ्गणसूत्रधारः (पुष्पेन्द्र), अ.१०.४

महत्त्वपूर्णमेवमुत्तमं मन्येते। अत एव प्रायः प्राचीनभारतीयनगराणि नदीतीरे वा जलकूले स्थितानि आसन्। एतानि प्राचीनानि नगराणि अयोध्या, मथुरा तथा द्वारका इत्यादि। पर्वतेन सुरक्षितं नगरं गिरिवज्रनगरस्य उदाहरणं दातुं शक्यते।

**वैराहो विपुलो शैलो वाराहो वृषभस्तथा।**

**ऋषिगिरिस्तात शुभाश्चैत्यक पञ्चमाः।।**

**एते पञ्चाः महाश्रृङ्गाः पर्वताः शीतलद्रुमाः।**

**रक्षन्तीवाभिसंहत्य संहताङ्गाः गिरिव्रजम्।।**[५५]

एतानि नगराणि वैराहः, वाराहः, वृषभः, ऋषिगिरि तथा चैत्यः एते पञ्चभिः महाश्रृङ्गैः तानि आसन्।

सुरक्षायाः कृत्रिममुपादानाः वप्रः, परिखा, प्राकारादीनां निर्माणं भवन्ति स्म। अर्थशास्त्रेऽपि नगरसन्निवेशस्य पूर्वं परिखायाः निर्माणं प्रप्रथमं करणीयमिति उल्लेखः वर्तते।[५६] नगरस्य सन्निवेशने दुर्गरूपेण नगरस्य सुरक्षाहेतुः वा नगरस्य गुप्तताहेतुः तस्य चतुर्दिक्षु परिखा तथा उन्नतप्राकारस्य निर्माणमावश्यकं मन्यन्ते। प्राकरस्य निर्माणं वप्रस्योपरि भवति। अतः वप्रं **प्राकाराधारवेदिका** इति कथितुं शक्यते। समराङ्गणसूत्रधारग्रन्थे वप्रपरिखादीनां निर्माणविधानं विस्तृतरूपेण वर्णितं वर्तते। वप्रनिर्माणाय नगरं परितः परिखायाः खननं क्रियते, परिखाखननस्य मृत्तिकाभिः वप्रस्य निर्माणं भवति। ग्रन्थानुसारम्

**घण्टामार्गप्रमाणेन घण्टामार्गस्य बाह्यतः।**

**समन्ततो वप्रभुवं स्थापयेत् तद्विधानवित्।।**[५७]

---

[55] महाभारत, सभापर्व, १९.२–३

[56] पाणिनिकालीन भारतवर्ष, पृ–१४२

[57] समराङ्गणसूत्रधारः(पुष्पेन्द्र), अ.१०.१६

घण्टामार्गप्रमाणेन घण्टामार्गस्य बहिः परितो वप्र भू विशेषज्ञैः वप्रभूम्याः स्थानं निश्चितं करणीयम्। अनन्तरम्–

**कुर्याद् वप्रं स्वभूभागे परिखोत्खातया मृदा।**[५८]

यथोक्तमर्थशास्त्रेऽपि – **खातावप्रं कारयेत्।**[५९] तथा वप्रनिर्माणार्थं मृत्तिका **चतुर्दण्डावकृष्टं परिखायाः ........।**[६०] अर्थात् परिखाभिः चतुर्दण्ड(४ दण्ड) दूरं संग्रहं कारयेत् इति। समराङ्गणसूत्रधारग्रन्थे राजाभोजः वप्रनिर्माणस्य मृत्तिकायाः उत्सङ्गं –

**सोत्सङ्गं गजपृष्ठं वा गोत्रीयपदताडितम्।**[६१]

इति कथयति। तथा–

**खातोद्वृतमृदा वप्रनर्माणाधिकतया ततः।**

**भूप्रदेशान् पुरा निम्नानापूर्यं समतां नयेत्।।**[६२]

वप्रनिर्माणकार्यं सम्पन्नं कृत्वा अधिकतया मृदा नगरे निम्नप्रदेशे पूरणीयम्। तथा वप्रनिर्माणसमयस्य छिद्रमपि पूरयेत् इति अर्थशास्त्रे लिखितमस्ति। यथा हि–

**पांसुशेषेण वास्तुच्छिद्रं वा पूरयेत्,**

**षड्दण्डोच्छ्रितमवरुद्ध तद्द्विगुणविष्कम्भम्.....।**[६३]

---

58 समराङ्गणसूत्रधारः(पुष्पेन्द्र), अ.१०.१९

59 अर्थशास्त्रम्, (गैरोला),अधिकरण–२,अ.३,पृ–१०५

60 अर्थशास्त्रम्, अधिकरण–२,अ.३,पृ–१०५

61 समराङ्गणसूत्रधारः(पुष्पेन्द्र), अ.१०.१९

62 समराङ्गणसूत्रधारः(पुष्पेन्द्र), अ.१०.२०

63 अर्थशास्त्रम्, (गैरोला), अधिकरण–२,अ.३,पृ–१०५

तथा वप्रस्य प्रमाणं षड् दण्ड (६ दण्ड) उन्नतः तथा द्वादशदण्ड (१२ दण्ड) विस्तृतः करणीयम्। तथा एतस्मिन् ग्रन्थे त्रिप्रकारस्य वप्रस्य  उल्लेखः वर्तते। यथा हि–

**ऊर्ध्वचयं मञ्चपृष्ठं कुम्भकुक्षिकं वा ..........।**[६४]

(१)उर्ध्वचयम् (२) मञ्चपृष्ठम् तथा (३) कुम्भकुक्षिकम्।

उर्ध्वचयं वप्रः उर्ध्वे कृशः भवति, मञ्चपृष्ठवप्रः निम्नभागे कृशः भवति तथा कुम्भकुक्षिकवप्रः मध्ये कुम्भाकारः भवति।

मयमतम् इति ग्रन्थे वप्राकारस्य उल्लेखः प्राप्यते। यथा हि–

**चतुरश्रमायताश्रं वृत्तं वृत्तायतं च पुनः।**

**स्याद् गोलवृत्तमेवं वप्राकारास्तुपञ्चैव।।**[६५]

आचार्य मयानुसारं वप्राकाराः पञ्चधा – (१) चतुरश्राकारः, (२) आयताकारः, (३) वृत्ताकारः, (४) वृत्तायताकारः, तथा (५) गोलवृत्ताकारः इति।

## ५.परिखानिर्माणविधानम् –

नगरस्य सुरक्षायै कृत्रिमुपादानानां परिखा महत्त्वपूर्णमङ्गमस्ति। समराङ्गणसूत्रधारग्रन्थेऽपि नगरं परितो परिखानिर्माणस्य निर्देशः विद्यते।[६६]

परिखानिर्माणपूर्वं परिखायाः भूमिः चिन्हं कृत्वा तत्र परिखानिर्माणं करणीयम्।

अष्टाध्यायीग्रन्थे **परिखा अस्मिन् देशे स्यादिति।**[६७] परिखानिर्माणस्य भूम्याः **पारिखेयी भूमिः** इति कथ्यते। प्रायः सर्वेषां प्रसिद्धानां प्राचीनानां नगराणां परितो परिखा

---

64 अर्थशास्त्रम्, (गैरोला), अधिकरण–२,अ.३,पृ–१०५

65 मयमतम्, अ.१०.१३

66 समराङ्गणसूत्रधार, अ.२३

विद्यमानस्योल्लेखो प्राप्यते। अयोध्या, इन्द्रप्रस्थः, मथुरा, द्वारका तथा पाटलिपुत्रः इत्यादिनगराणि परिखया परिवेष्टितानि आसन्।

परिखायाः संख्या एक वा कदाचित् एकाधिकाऽपि भवेत्। समराङ्गणसूत्रधारानुसारं नगरस्य परितो त्रयाणां परिखाणां निर्माणं करणीययमिति उल्लेखो दृश्यते। यथा हि–

**............विधेयं परिखात्रयम्।**[६८]

अर्थशास्त्रेऽपि यथोक्तम् –

**तस्य परिखास्तिस्रो दण्डान्तराः कारयेत्।**[६९]

परिखा द्वयोर्मध्ये एकदण्डस्यान्तरं स्थापनीयम्। मेगस्थनीजस्य मतानुसारं पाटलिपुत्रस्य परितो केवलमेका परिखा एवासीत्। तस्य कथनानुसारं भित्त्या सह चतुर्दिक् एका परिखा अस्ति।[७०] महाउम्मगजातके मिथिलानगर्यां परिखायाः संख्यात्रयं दर्शितमस्ति।[७१] एतावत् ब्रह्मवैवर्तकपुराणे एकमेव नगरे सप्त परिखायाः उल्लेखो वर्तते। यथा हि–

................ **परिखासप्तसंयुतः।**[७२]

परिखायाः दृढकरणार्थं तले इष्टिकायााः तथा परितो अश्मभिः निर्माणं करणीयमिति समराङ्गणसूत्रधारग्रन्थे राजाभोजः कथितम्। यथोक्तम् –

---

67 पाणिनिकालीन भारतवर्ष, पृ–१४३

68 समराङ्गणसूत्रधारः, (जूगनु) अ.१०.१७

69 अर्थशास्त्रम्, (वाचस्पति गैरोला), अधिकरण–२,अ.३,पृ–१०४

70 भारत का प्राचीन इतिहास, पृ–३७९

71 जातक, ६.५४६

72 ब्रह्मवैवर्तकपुराणम्, खण्ड–४,अ.७३,पृ–६४०

........................परितोऽश्मभिः।

**विदेयाष्टिकाभिर्वा सम्यग्बद्धतलं स्थिरम्।**[७३]

अर्थशास्त्रेऽपि यथोक्तं निर्देशः प्राप्यते। यत् –

**मूले चतुरश्राः पाषाणोपहिताः पाषाणेष्टकाबद्धपार्श्वा वा।**[७४]

अर्थात् परिखायाः मूलं पाषाणैः दृढबद्धकरणीयं तथा पार्श्वे भित्तिभिः इष्टिकाभिर्वा सम्यक् दृढबद्धं करणीयम्।

परिखाप्रमाण विषयक समराङ्गणसूत्रधारग्रन्थे केवलम् एवमेव उल्लेखो वर्तते यत् –

**महारथ्याप्रमाणेन ..................।**[७५]

त्रयाणां परिखानां प्रमाणं करणीयम्। महारथ्यायाः प्रमाणं त्रयाणां नगराणां क्रमशः –

**तद् द्वादश दशाष्टौ स्यात् करान् ज्येष्ठादिकं त्रिषु।**[७६]

अर्थात् त्रिषु नगरेषु परिखानां प्रमाणं ज्येष्ठनगरे द्वादशहस्तं, मध्यमनगरे दशहस्तं तथा कनिष्ठनगरे अष्टहस्तमिति दर्शितम्। परन्तु यदि नगरस्य परितो परिखायाः एतत् प्रमाणं मन्यन्ते तदा अन्यप्राचीनस्थापत्यग्रन्थेषु उल्लिखितं परिखायाः प्रमाणं तथा पुरातत्वीय प्रमाणम् अत्यल्पं भवति। कौटिलीये अर्थशास्त्रे त्रयाणां परिखानां विस्तारः दर्शितम्। यथा हि –

**चतुर्दश द्वादश दशेति दण्डान् विस्तीर्णाः।**[७७]

---

73 समराङ्गणसूत्रधार, (जूगनु) अ.१०.२१

74 अर्थशास्त्रम्, (वाचस्पति गैरोला), अधिकरण–२,अ.३,पृ–१०४

75 समराङ्गणसूत्रधारः, (जूगनु)अ.१०.१७

76 समराङ्गणसूत्रधारः, (पुष्पेन्द्र)अ.१०.९

77 अर्थशास्त्रम्, (वाचस्पति गैरोला), अधिकरण–२,अ.३,पृ–१०४

तेषां विस्तार: क्रमश: १४ दण्ड:, १२ दण्ड:, तथा १० दण्ड: दर्शित:। यदा त्रयाणां परिखानां विस्तारं तथा तेषां मध्यान्तरं मिलित्वा पारिखेयभूम्या: विस्तार: ३८ दण्ड: भवति। अन्येषु प्राचीनेषु ग्रन्थेषु परिखाया: विस्तार: अधिक: अस्ति इति उल्लेख: प्राप्यते। यथा महाभारते–

**सागरप्रतिरुपाभि: परिखाभिरलङ्कृताम्।**[७८]

हरिवंशपुराणानुसारम् –

**गङ्गासिन्धुप्रकाशाभि: परिखाभिर्वृतां पुरीम्।**[७९]

तथा नवसाहित्याङ्कचरितेऽपि –

**आभाति यस्या: परिखा नितम्बे सशब्दजाम्बूनदमेखलेव।**[८०]

आदिषु ग्रन्थेषु एतादृश:उल्लेखा: प्राप्यते। तथा मेगस्थनीजमहोदयस्य मतानुसारं पाटलिपुत्रस्य परिखाया: विस्तार: ६०० फुटमितमासीत् इति।[८१]

परिखाया: गर्तप्रमाणं तस्य विस्तारस्य प्रमाणेन न्यूनमस्ति। अर्थशास्त्रानुसारमपि तस्य गर्तप्रमाणमेतावत् विस्तारस्य अर्धं वा पादोनं वा पादोनमर्धमस्ति। यथा –

**विस्तारादगाधा: पादोनमर्धं वा।**[८२]

एतत् सम्बन्धितविषये कौटिल्यमहोदयस्य एतत् कथनमस्ति यत् –

---

78 महाभारत, आदिपर्व, १९९.२८

79 हरिवंशपुराणम्, विष्णुपर्व, १००.११

80 नवसाहित्याङ्कचरितम्, सर्ग–१.१८

81 भारत का प्राचीन इतिहास, पृ–३७९

82 अर्थशास्त्रम्, (वाचस्पति गैरोला), अधिकरण–२,अ.३,पृ–१०४

**तोयान्तिकीरागन्तुतोयपूर्णा।**[८३]

शुक्रनीतेः अनुसारं परिखायाः विस्तारस्य अर्धप्रमाणेन तस्य खातप्रमाणं करणीयम्। यथा हि–

**परिखा च ततः खाताद् द्विगुणविस्तरा।।**[८४]

अर्थशास्त्रानुसारम् –

**चतुरशीत्यङ्गलो व्यामो रज्जुमानं खातपौरुषं च।**[८५]

अर्थात् परिखायाः **खातपुरुषः** इति संज्ञया ज्ञायते।

समराङ्गणसूत्रधारग्रन्थानुसारं परिखायां जलपूर्त्यर्थं निर्देशं दृश्यते। अन्येषु प्राचीनग्रन्थेषु परिखाणां त्रयः प्रकाराः वर्तन्ते। (१) जल–परिखा (२) पङ्कपरिखा (३) रिक्तपरिखा। जलपरिखायाः जातकेषु उदकपरिखा इति नाम्ना ज्ञायते। उदकपरिखा जलेन परिपूर्णमास्ति।[८६] परिखायां जलं कश्चित् स्थिरमस्ति वा कश्चित् यदा जलनिर्गमस्थानमपि स्यात् तदा जलं प्रवाहितमस्ति। समराङ्गणसूत्रधारग्रन्थे कथितमस्ति यत् – .......**ससङ्गग्राहाम्बुनिर्गमम्।**[८७]

वायुपुराणे परिखायाः मुखं नद्यां मेलनीयमिति लिखितमस्ति। यथा हि –

**स्त्रोतसीसह तद्द्वारं निखातं पुनरेव च।**[८८]

---

83 अर्थशास्त्रम्, (वाचस्पति गैरोला), अधिकरण–२,अ.३,पृ–१०४

84 शुक्रनीति, १.२४०

85 अर्थशास्त्रम्, (वाचस्पति गैरोला), अधिकरण–२,अ.३,पृ–१०४

86 पाणिनिकालीन भारतवर्ष, पृ–१४४

87 समराङ्गणसूत्रधारः(जुगनू), अ.१०.२२

88 वायुपुराणम्, ८.१०४

जातके द्वितीय परिखायाः पङ्केन परिपूर्णं परिखा ते परिखा शत्रुसैन्यानाम् आगमनमसम्भवं भविष्यति तथा तृतीयपरिखायाः **सुक्ख-परिखा** कथ्यते।[८९]

अर्थशास्त्रे परिखायाः कृते **सपरिवाहाः** इति शब्दप्रयोगः विद्यते।[९०]

महाउम्मगजातके मिथिलानगरे त्रयाणां प्रकारणां परिखाः विद्यमानाः आसन् इति लिखितमस्ति।[९१]

परिखां परितो चतुर्दिक् सुन्दरता हेतु भिन्न-भिन्न प्रकाराणां वृक्षाणां वपनं क्रियते स्म। यथा हि समराङ्गणसूत्रधारानुसारम् –

**सर्वपार्श्वेष्वथैतस्य..................।**

**सुमनो विटपारामान् कुर्याद् वासान् समुत्सुकान्।।**[९२]

तथा पुनः तेषां परितो वृक्ष लता कण्टकेन विदध्यात्। यथा हि –

**बाह्यभागं पुनस्तस्य विदध्यात् सर्वतोदिशम्।**

**द्रुममूलैर्लताजालैः कण्टकैरपि संवृतम्।।**[९३]

अर्थशास्त्रानुसारं नगरस्य सुरक्षाहेतुः परिखायां नक्रादिहिंसकः जलचरप्राणीनां वासव्यमिति दर्शितम्। ते परिखा ग्राहवती इति कौटिल्यमहोदयः कथयति स्म।[९४]

---

89 पाणिनिकालीन भारतवर्ष, पृ-१४४

90 अर्थशास्त्रम्, (वाचस्पति गैरोला), अधिकरण-२,अ.३,पृ-१०४

91 जातक, ६.५४६

92 समराङ्गणसूत्रधारः(जुगनू), अ.१०.२३

93 समराङ्गणसूत्रधारः(जुगनू), अ.१०.२४

94 अर्थशास्त्रम्, (वाचस्पति गैरोला), अधिकरण-२,अ.३,पृ-१०४

महाभारतेऽपि - **आपुरयेच्च परिखाः स्थाणुनक्रझषाकुलाः।**[९५] इति विद्यते। समराङ्गणसूत्रधारानुसारम् – **विचित्राब्जमनोहारि......।**[९६] अर्थात् परिखायाः सुन्दरता हेतुः परिखायाः जले चित्रविचित्रपङ्कजैः सुशोभितं करणीयम्। कमलादिपुष्पयुक्तानां कारणात् कौटिल्यमहोदयः जलपरिखायां **पद्मवती परिखा** इति कथयति।[९७]

रामायणानुसारम् –

**परिखाभिः सपद्माभिः सोत्पलभिरलङ्कृताम्।**[९८]

हरिवंशपुराणानुसारं

परिखायाः सौन्दर्यं पद्म एवं हंसस्य सेवनेन आसीत्। यथा हि –

**पद्मखण्डाकुलाभिश्च हंससेवितवारिभिः।**[९९]

**४.प्राकारनिर्माणविधानम्** -

समराङ्गणसूत्रधारानुसारं प्राकारः –

प्राकारस्य विन्यासः –**वप्रोर्ध्वभागगं मध्यम् ...।**[१००] परिकल्पितमस्ति। अर्थशास्त्रेऽपि **वप्रस्योपरिप्राकारम्।**[१०१] इति वर्तते। वप्रस्योपरि प्राकारस्य निर्माणभूम्याः **प्रकारीय देशः** इति कथ्यते।[१०२] महाभारते इन्द्रप्रस्थनगरस्य वर्णने -

---

95 महाभारत, शान्तिपर्व, ६९.४१

96 समराङ्गणसूत्रधार(जुगनू), अ.१०.२२

97 अर्थशास्त्रम्, (वाचस्पति गैरोला), अधिकरण–२,अ.३,पृ–१०४

98 वाल्मीकि रामायणम्, सुन्दरकाण्ड, सर्ग–२.१४

99 हरिवंशपुराणम्, विष्णुपर्व, १००.११

100 समराङ्गणसूत्रधारः(जुगनू), अ.१०.२५

**प्राकारेण च सम्पन्नं दिवमावृत्य तिष्ठता।** [१०३]

तथा द्वारकानगरस्य वर्णन प्रसङ्गे–

**प्राकारेणार्कवर्णेन पाण्डुरेण विराजिताम्।** [१०४]

हरिवंशपुराणे मथुरानगरस्य वर्णनप्रसङ्गेऽपि प्रकारनिर्माणस्योल्लेखो प्राप्यते। यथा हि –

**सा पुरी परमोदारा साट्टप्राकारतोरणा।** [१०५]

तथा अवन्तिनगरस्य वर्णन प्रसङ्गे ब्रह्मपुराणे–

**.......दृढप्राकारतोरणा।** [१०६]

एतेन विदितं भवति यत् इन्द्रप्रस्थद्वारकामथुराअवन्ति आदयः सर्व प्राचीनाः भारतीय नगराः प्राकारेण परिवेष्टिताः आसन्।

प्रायः एकस्मिन् नगरे प्राकारस्य संख्या एकमेव आसीत् किन्तु कस्मिंश्चित् बृहद्नगरे अधिक प्राकारस्य संख्या अपि भवति स्म।

जातकानुसारं वैशाली नगरस्य परितो चतुर्दिक् त्रय प्राकाराः विद्यमानाः आसन्। यथा हि –

.....**तिहि पाकारेहि परिक्खितम्।** [१०७]

---

[101] अर्थशास्त्रम्(गैरोला), अधिकरण–२,अ.२,पृ–१०५

[102] पाणिनिकालीन भारतवर्ष, पृ–१४३

[103] महाभारत,आदिपर्व,अ.१९९,पृ–७९०

[104] महाभारत,सभापर्व,परिशिष्ट,पृ–४१२

[105] हरिवंशपुराणम् , हरिवंशपर्व, ५४.५७

[106] ब्रह्मपुराणम् , ४३.२५

[107] जातक, १.१०५; प्राचीन भारतीय कला एवं वास्तु, पृ–७७

समराङ्गणसूत्रधारग्रन्थे प्राकारस्य मानाधारेण प्राकारस्य त्रय प्रकाराः वर्णितं दृश्यन्ते। यथा हि-

**ज्यायान् करैर्द्वादशभिर्दशभिर्मध्यमः स्थितः।**

**कनीयानष्टभिर्हस्तैर्विस्तारः स्यात् त्रिधेत्यसौ।।**

**उच्छ्रायः सप्तदशभिः करैर्ज्यायान् प्रशस्यते।**

**मध्यमः पञ्चदशभिस्त्रयोदशभिरन्तिमः।।** [१०८]

प्राकारस्य मानाधारेण प्राकाराः त्रयाः- (१) श्रेष्ठः, (२) मध्यमः, (३) कनिष्ठः। श्रेष्ठ प्राकारस्य विस्तारः ग्रन्थानुसारं द्वादशहस्तं तथा उच्छ्रायः सप्तदशहस्तं, मध्यम प्राकारस्य विस्तारः दशहस्तं तथा उच्छ्रायः पञ्चदशहस्तं, कनिष्ठ प्रकारस्य विस्तारः अष्टहस्तं तथा उच्छ्रायः नवदशहस्तं प्रमाणेन भोजराजेन वर्णितवान्।

अर्थशास्त्रेऽपि एतादृशस्य प्राकारस्य विस्तारः एवं उच्छ्रायमानं समं तथा विषम संख्यायां दर्शितमस्ति। यथा हि-

**द्वादशहस्तादूर्ध्वमोजं युग्मं वा आचतुर्विंशतिहस्तादिति कारयेत्।** [१०९]

सम संख्ययां द्वादशहस्ततः अष्टादशहस्तं पर्यन्तं तथा विषम संख्यायां पञ्चदश, सप्तदश हस्तादि अधिकतमं चतुर्विंशति हस्तादिति कारयेत्। तथा कौटिल्यः एवमपि कथयति यत्

**रथचर्यासञ्चारम्।** [११०] अर्थात् प्राकारस्योपरि रथादि वाहनानां सञ्चारं कर्तुं शक्यते इति विस्तारप्रमाणं स्थपानीयम्।

राज्ञः भोजस्यानुसारं प्राकारस्य उच्छ्राय; सप्तदशहस्ततः अधिकं न तथा त्रयोदश हस्ततः न्यूनं न कारयेत्। यथोक्तम् -

---

108 समराङ्गणसूत्रधारः(जुगनू), अ.१०.२६-२७

109 अर्थशास्त्रम्(गैरोला), अधिकरण-२,अ.२,पृ-१०५

110 अर्थशास्त्रम्(गैरोला), अधिकरण-२,अ.२,पृ-१०५

**उर्ध्वं न सप्तदशकान्न त्रयोदशकादधः।**

**प्राकारोच्छ्रायमिच्छन्ति नापि युग्मकरोन्मितम्।।**[१११]

शुक्रनीतिग्रन्थस्य मतं व्यावहारिकं दृश्यते –

**उच्छ्रितस्तु तथा कार्यो दस्युभिर्न विलङ्घ्यते।।**[११२]

प्राकारस्य उच्छ्राय: एतावत् निर्मितव्यं यत् शत्रुसैन्य: विलङ्घनं न कर्तुं शक्नुयति। मस्त्यपुराणे त्रिपुराणां प्राकारस्य उच्छ्राय: पर्वतसन्निभ: दृश्यते। यथा हि –

**प्राकारास्त्रिपुरे तस्मिन्गिरिप्राकारसन्निभः।**[११३]

परन्तु ब्रह्मवैवर्तकपुराणानुसारं नगरस्य प्राकारस्य उच्छ्राय: विशंतिहस्तेभ्य: करणीयम्। यथा हि –

**उर्ध्वं विशंतिहस्तेभ्यः प्रकारं न शुभप्रदम्।**[११४]

अपराजितपृच्छाग्रन्थानुसारम् –

**प्राकार उत्तमःकार्यो नवहस्तैः समुच्छ्रितः।**[११५]

प्राकारनिर्माणे प्रायोजितानि द्रव्याणि मृत्तिका, प्रस्तर एवं इष्टिका। समराङ्गणसूत्रधारानुसारं प्राकारस्य निर्माणं स्थूलोपलशिलायां वा पक्वेष्टकायां करणीयम्। यथा हि –

---

111 समराङ्गणसूत्रधार:(जुगनू), अ.१०.२८

112 शुक्रनीति, १.२३८

113 मस्त्यपुराणम्, १३१.२२

114 ब्रह्मवैवर्तकपुराणम्, खण्ड–४,१०३.६७

115 अपराजितपृच्छा, ७२,पृ–१७३

**..................स्थूलोपशिलाचितम्।**

**कुर्यात् प्राकारमुद्दामं यद्वा पक्वेष्टकामयम्।।** [११६]

इष्टकानिर्मितप्राकारस्य कौटिल्यमहोदयः **ऐष्टकप्राकार** इति कथयति।[११७] प्राकार–निर्माणार्थं ये इष्टकाः निर्मीयन्ते ताः इष्टकाः **प्राकारीया इष्टकाः** इति ज्ञायन्ते।[११८] अर्थशास्त्रानुसारं प्राकारस्य बहिः शत्रूणां सरलतया आवागमनमरुद्धार्थम् –

**भहिर्जानुभञ्जनी .........छन्नपथंकारयेत्।** [११९]

तथा प्राकारस्योपरि नगरसुरक्षा हेतुः यन्त्राणां स्थापनमपि कारयेत् इति कौटिल्यमहोदयः निर्दिशयति स्म। यथा हि–

**तासु पाषाणकुद्दालकुण्ठारीकाण्डकल्पनाः।**

**मुसृण्टिमुग्दरा दण्डचक्रयन्त्रशतघ्नयः।।**

**कर्याः कार्मारिकाः शूला वेधनाग्राश्च वेणवः।**

**उष्ट्रग्रीव्योऽग्निसंयोगाः कुप्यकल्पे च यो विधिः।।** [१२०]

महाभारतेऽपि प्राकारस्योपरि विभिन्नप्रकाराणां यन्त्राणां स्थापनमासीत् एवं तेषां प्रविणानां योद्धावीराणां नियुक्तिः अपि कृता। यथा हि –

**विविधैरति–निर्विद्धैः शस्त्रोपेतैः सुसंवृतैः।**

---

116 समराङ्गणसूत्रधारः (जुगनू), अ.१०.२५

117 अर्थशास्त्रम्, (गैरोला), पृ–१०५

118 पाणिनिकालीन भारतवर्ष, पृ–१४३

119 अर्थशास्त्रम्, (गैरोला),अधिकरण–२, अ.३, पृ–१०५

120 अर्थशास्त्रम्, (गैरोला),अधिकरण–२, अ.३

**शक्तिभिश्चावृतं तीक्ष्णैर्जिह्वैरिव पन्नगैः।**

**तल्पैश्चाभ्यासिकैर्युक्तं शुशुभे योधरक्षितम्।।**

**तीक्ष्णाङ्कुशशतघ्नीभिर्यन्त्रजालैश्च शोभितम्।**

**आयासैश्च महाचक्रैः शुशुभे तत्पुरोत्तमम्।।** [१२१]

एतावत् इन्द्रप्रस्थनगरेऽपि नगरस्य प्राकाराः विविधैरतिः आक्रमकशस्त्रोपैः सुसंवृत्तैः शोभितं कृत्वा तत्र शस्त्रचालकाः निपुणयोद्धानां नियुक्ति कृता।

## ६.अट्टालकनिर्माणम् :-

यः वेश्मः विस्तीर्णमुच्छ्रितं स्याद् यत् वेश्म अट्टः। यत् वेश्म संक्षिप्तं भवेत् यत् वेश्म अट्टालकः इति विद्ववंशजनैः कथयन्ति। विस्तीर्णमुच्छ्रितं यत् स्याद् वेश्मः सोऽट्टउदाह्यतः। **संक्षिप्तमेतदेवोक्तं तज्ज्ञैरट्टालाख्या।।** [१२२]

अट्टालकस्य निर्माणं प्राकारोपरि चतुर्दिक् कार्या इति समराङ्गणसूत्रधारग्रन्थे विद्यते। यथा हि –

**प्राकारेऽट्टालकास्तस्मिन् दिक्षु दिक्षु चतुर्विधम्।।** [१२३]

मत्स्यपुराणेऽपि अट्टालकनिर्माणसम्बन्धितमुल्लेखं दृश्यते।। यत् –

.............**वप्राट्टालकसंयुतम्।** [१२४] तथा

.............**अट्टालकैर्यन्त्रशतध्निभिश्च।** [१२५]

---

[121] महाभारत, आदिपर्व, १९९.३२–३३

[122] समराङ्गणसूत्रधार,अ.२२.४५

[123] समराङ्गणसूत्रधार,(पूष्पेन्द्र),अ.१०.३१

[124] मत्स्यपुराणम्, २१७.८

अर्थशास्त्रेऽपि आचार्यकौटील्यः अट्टालकस्य विस्तारः, दैर्ध्यं तथा उन्नतमानं प्राकारस्य मानप्रमाणेन कार्या तथा तस्योपरि आवागमनार्थं सोपानमपि कारयेत् इति कथयति। यथा –

**विष्कम्भ चतुरश्रमट्टालकमुतदसेधसमावक्षेपसोपानं कारयेत्, त्रिंशदण्डान्तरं च।** [१२६]

द्वयोः अट्टालकयोः मध्ये त्रिंशद्दण्डान्तरं स्थापनीयं तथा सोपान सहितं निर्मितव्यम्। तथा राजाभोजस्य मतानुसारं द्वौ अट्टलकौ मध्ये शतं हस्तान्तरं स्थापनीयमीति। यथा –

**शतं शतं स्याद्हस्तानां मिथश्चाट्टालकान्तरम्।** [१२७]

अत्र द्वयोः मध्ये एतावत् मतान्तरं दृश्यन्ते।

अट्टालकस्योपरि शत्रौः उपरि आक्रमणार्थं सैनिकाः नियुक्ताः भवन्ति स्म। अट्टालकानां संख्याविषयक मेगस्थनीजमहोदय द्वारा प्रदत्त विवरणानुसारं पाटलिपुत्रनगरस्य प्राकारोपरि ५७० अट्टालकाः आसन्।

**७. नगरद्वाराणि –**

विश्वकर्मवास्तुशास्त्रम् इति ग्रन्थानुसारम् –

**ग्रामाणामपि सर्वेषां दुर्गाणाञ्च पुरामपि।**
**मुखद्वारं व्यक्तरूपं यथामानं प्रकल्पयेत्।।** [१२८]

---

[125] मत्स्यपुराणम्, १२९.३५

[126] अर्थशास्त्रम्, (गैरोला) अधिकरण–३,अ–३,पृ–१०५

[127] समराङ्गणसूत्रधार,अ.२३.३३

[128] विश्वकर्मवास्तुशास्त्रम्, अ.६७.१

प्रत्येकेषु नगरेषु, सर्वेषु दुर्गेषु नगरप्रवेशनार्थं मुख्यद्वारं सुव्यक्तरूपं यथामानं प्रकल्पयेत्।

नगरस्य प्राकाराश्रित द्वारम् इति नगरद्वारं ज्ञायते। समराङ्गणसूत्रधारग्रन्थे नगरद्वार कृते **गोपुरम्** इति शब्दप्रयोगः विद्यते। यथा–

**यत् प्राकाराश्रितं द्वारं पुरे तद्गोपुरं विदुः।** [१२९]

तथैव अर्थशास्त्रेऽपि .......**गोपुरं कारयेत्।** [१३०]

तथा अमरकोशे ...........**पुरद्वारं (तु) गोपुरम्।** [१३१]

शिशुपालवधे .....**पतन्पुरगोपुरं प्रति स सैन्यसागरः।** [१३२]

अन्यग्रन्थेषु अपि नगरद्वार हेतु गोपुर शब्दस्य प्रयोगः दृश्यते।

**नगरस्य चतुसु द्वारेषु।** [१३३]

इति जातकग्रन्थानुसारं प्राचीनभारतीय नगरेषु प्राकारश्रित चतुर्दिक् प्रायः चत्वारि नगरद्वाराणां निर्माणं भवन्ति स्म। वायुपुराणानुसारम् –

**कृतां द्वारवतीं नाम बहुद्वारां मनोरमाम्।** [१३४]

यथोक्तं ब्रह्माण्डपुराणेऽपि द्वारकानगरस्य अनेकद्वाराणि दर्शितम्। [१३५]

---

129 समराङ्गणसूत्रधारः,अ.२२.५२

130 अर्थशास्त्रम्, (गैरोला) अधिकरण–३,अ–३,

131 अमरकोश, काण्ड–२,पुरवर्ग,पृ–८२

132 शिशुपालवध, सर्ग–१३.२७

133 जातक, १.२६२, ३.४१४

134 वायुपुराणम्, ८६.२७

समराङ्गणसूत्रधारग्रन्थानुसारम् –

**राजमार्गमहारथ्यासंश्रितानि चतुर्दिशम्।**

**त्रीणि त्रीणि विधेयानि पुरे द्वाराणि तद्विदा।।** [१३६]

यथा नगरस्य चतुर्दिक् द्वारविशेषज्ञे नगरस्य राजमार्गोपरि एकं-एकं द्वारद्वारं स्थापनीयं तथा द्वौ-द्वौ द्वारौ महारथ्यामार्गोपरि स्थाप्या। एतावत् नगरस्य चतुर्दिक् त्रीणि- त्रीणि द्वाराणि विधेयानि। अत: एकं नगरे समस्त द्वादश नगरद्वाराणि भवन्ति। नगरद्वारस्य मानं भोजराजस्य मतानुसारम्–

**राजमार्गमहाद्वारचतुष्कं विस्तरान्नव।**

**अष्टौ सप्त करा ..................।।**

**महारथ्याश्रयं द्वारं तत् षट्पञ्चचतुष्करम्।** [१३७]

उपरोक्त श्लोके नगरद्वाराणां मानं दर्शितमस्ति। यथा राजमार्गोपरि स्थितं महाद्वाराणां विस्तार: नव, अष्ट वा सप्त हस्त प्रमाणेन निर्धारणीयं तथा महारथ्यामार्गोपरि आश्रिताणां द्वाराणां विस्तार: षट्, पञ्च वा चतुर्हस्त मानेन निर्मितव्यम्। अर्थशास्त्रानुसारमपि –

**प्राकारसमं .........गोपुरं कारयेत्।** [१३८]

अष्टाध्यायी ग्रन्थे नगरद्वारस्य नामोल्लेखमपि प्राप्यते। आचार्यपाणिनिमतानुसारं यस्य नगरस्य द्वारं पुरत: वा सम्मुखे अन्य यत् नामन: नगरं स्थितमस्ति तन्नगरस्य नामोपरि तत् नगरद्वारस्य नाम भवति। यथा–

---

[135] ब्रह्माण्डपुराणम्, ३.६१.२३

[136] समराङ्गणसूत्रधार:,(पुष्पेन्द्र),अ.१०.३५

[137] समराङ्गणसूत्रधार:,(पुष्पेन्द्र), अ.१०.३६-३७

[138] अर्थशास्त्रम्, (गैरोला) अधिकरण-३,अ-३

**अभिनिष्क्रामाति द्वारम्।** [१३९]

उदाहरणम् –

वडोदरा नगरे नगरस्योत्तर दिशायां स्थितं नगरद्वारस्य नाम **'चापांनेरदरवाजा '** इति अस्ति। कारणं वडोदरानगरस्य उत्तरदिशायां चापांनेरनगरम् अस्ति। एतत् चापांनेरदरवाजातः चापांनेरनगरे गन्तुं शक्यते।

## ८.नगरे जलव्यवस्था-

जलं जीवनमस्ति। उदकेन विना जीवनं न सम्भाव्यते। अतः जलं कस्यापि जीवस्य अनिवार्यं घटकमस्ति तथा प्रथमावश्यकता वर्तते। जलेन ह्यः आसीत्, जलेन एव श्वः अपि भविष्यति। जलमेव प्राणः, प्रभा एवं पौरुषः अस्ति। जलं सरलतया सुलभमस्ति तथैव दुर्गमं च दुःसाध्यमपि अस्ति। वैदिकवाङ्गमये जलस्य १०० अपरनामानि विद्यन्ते। यथा –

**पानीयं सलिलं नीरं कीलालं जलमम्बु च**

**आपो वार्वारिकं तोयं पयः पायस्तथोदकम्।**

**जीवनं वनमम्भोऽवर्णोमृतं घनसौऽपि च।।**

यथा – पानीय, सलिल, नीर, कीलाल, जलं, अम्बु, आपः, वार, वारि, क, तोयं, पयः (पयस्), पायः (पायस्), उदक, जीवन, वन, अम्भः(अम्भस्), अर्णः (अर्णस्), अमृत तथा घनरसः इत्यादि समानार्थी शब्दाः वर्तन्ते। जलस्य गुणाः अपि निम्नोक्त श्लोके दृश्यते। यथा हि –

**पानीयं श्रमनाशनं वलमहरं मूर्च्छापिपासापहं**

**तन्द्राच्छर्दिविबन्धहृद्बलकरं निद्राहरं तर्वणम्।**

---

139 पाणिनि कालीन भारतवर्ष, पृ–१४५

**ह्यद्यं गुप्तरसं ह्यवीर्णशमकं नित्यं हितं शीतलं**

**लध्वच्छं रसकारणं निगदितं पीयूषवज्जीवनम्।।**[140]

यथा – जलं श्रमहरं, क्लान्तिनाशकं, मुर्च्छा तथा पीपासानाशकं, तना, वमन एवं विबन्धनाशकं, बलकारकं, निन्द्राहरं, तृप्तिदायकं, हृदयस्य कृते हितकरं, अव्यक्तरस युक्तं, अवीर्णशामकं, सर्वदा हितकरं, शीतलं, लधु, स्वच्छ, सम्पूर्ण मधूरसदि रसाणां कारणमेवं अमृतसमानं जीवनदाता इत्यादैः गुणैः युक्तैः सन्ति। पञ्चतत्वेषु अपि जलमेकं तत्वमस्ति। विभिन्न स्रोतेषु प्राप्तं जलस्य संज्ञा भिन्नं –भिन्नं वर्तते। यथा – तरङ्गस्य जलं अर्ण कथ्यते। आधारस्य जलं आपनोति, वहति जलं सलिलं तथा तरल इति नाम्ना ज्ञायते। वैदिकरूपेण उदक कथ्यते, औषधीयरूपेण अमृतं ख्यातम्।

विष्णुधर्मोत्तरपुराणे जलस्य महत्ता तथा जलाशयनिर्माणमाहात्म्यवर्णनं सुन्दररुपेण विद्यते। यथा हि –

**उदकेन विना वृत्तिर्नास्ति लोकद्वये सदा।**

**तस्माज्जलाशयाः कार्याः पुरुषेण विपश्चिता।।**

**अग्निष्टोमसमः कूपः सोऽश्वमेघसमो मरौ।**

**कूपः प्रवृत्तपानीयः सर्वं हरति दुष्कृतम्।।**

**कूपकृत्स्वर्गमासाद्य सर्वान् भोगान् समश्नुते।**

**तत्रापि भोगनैपुण्यं स्थानभ्यासात् प्रकीर्तितम्।।**[141]

---

140 भावप्रकाशः (निघण्टु युक्त), वारिवर्ग– १–२,

141 विष्णुधर्मोत्तरपुराणम्, अ............

विष्णुधर्मोत्तरपुराणे दकार्गलप्रशंशायां भूलोकः तथा स्वर्गलोकः इति लोकद्वये सलीलेन विना जीवने वृत्तिर्नास्ति इति दर्शितम्। धार्मिकैः एवं विद्वज्जनैः भिन्न–भिन्न स्थलोपरि जलाशयाः कार्याः। कूपनिर्माणस्य फलं अग्निष्टोमसमः प्राप्यते। यदा कूपः मरुभूम्यां निर्मियते तदा तत्फलं सोऽअश्वमेघसमो प्राप्यते। बहुजलयुक्तकूपनिर्माणे निर्मातृणां सर्वं दुष्कृत्यं नष्टं भवति। कूपनिर्माता स्वर्गे गत्वा सर्वान् सुखानामुपभोगं करोति। तत्रापि स्थानभ्यासात् भोगेनैपुण्यं प्रकीर्तितम्।

राजवल्लभवास्तुशास्त्रम् ग्रन्थानुसारम् –

**चिरं कृतं जीवनमेव येन तद् गोपदैकेन समं पृथिव्याम्।**

**स षष्टिसंख्यं च सहस्त्रवर्षं स्वर्लोकसौख्यान्यखिलानि भङ्क्ङ्क्ते।।** [१४२]

जलं सदैव जीव–जन्तूनां रक्षणं करोति। यः गोपदैकेन समं भूमौपरि जलाशयस्य निर्माणं करोति सः षष्टिः अधिकं सहस्त्रवर्षाणि पर्यन्तं स्वर्गलोकं भोग्यते इति पुण्यफलं प्राप्यते। तथा प्रासादमण्डनग्रन्थे अपि सूत्रधारमण्डनः जलाशयस्य निर्माणस्य पुण्यं निम्नोक्त श्लोके दर्शयति। यत् –

**जीवनं वृक्षजन्तूनां यः (यो ?) जलाशयम्।**

**दत्ते वा स लभेतु (लभते ?) सौख्यमुर्व्यां स्वर्गे च मानवः(ाः)।।** [१४३]

अर्थात् वनस्पति, जन्तू एवं वृक्षादीनां जीवमात्राणां जीवनं जलमस्ति। यः जलाशयस्य निर्माणं करोति सः सर्वसुखानामुपभोगं कृत्वा स्वर्गं लभते। तथा स्वस्य अन्यग्रन्थः

---

142 राजवल्लभवास्तुशास्त्रम्, (जुगनू),अ.४.३५

143 प्रासादमण्डनम्, अ.८.९५

वास्तुमण्डनेऽपि सः जलाशयनिर्माणस्य महात्म्यस्य दर्शनं कारयति।[१४४] तथा भविष्योत्तरपुराणेऽपि जलाशयनिर्माणस्य महात्म्यं दर्शितम्। यथा हि –

**तडागं देवभवनं वापीवृक्षो घनच्छदः।।**

**चतुर्थकं फलं प्राप्तं कारितेऽस्मिंश्चतुष्टये।**

**यथा मातुः समाचष्टे पुत्रः शीलं स्वकैर्गुणैः।।**

**तथा स्वादेन च जलं कर्तुः सर्वं शुभाशुभम्।**

**अतः शुभागतं द्रव्यं तडागादिषु लापयेत्।।** [१४५]

बृहत्संहितायां वराहमिहिराचार्यस्य मतानुसारम् –

**धर्म्यं यशस्यं च वदाम्यतोऽहं दकार्गलं येन जलोपलब्धिः।**

**पुंसां यथाङ्गेषु शिरास्तथैव क्षितावपि प्रोन्नतनिम्नसंस्थाः।।**

**एकेन वर्णेन रसेन चाम्भश्च्युतं नभस्तो वसुधाविशेषात्।**

**नानरसत्वं बहुवर्णतां च गतं परीक्ष्यं क्षितितुल्यमेव।।** [१४६]

एतत् दकार्गलं धर्मं यशस्यं प्रदायति। यथा मानवशरीरे रक्तशिराजालः अधोरुपरिः सन्ति, तत् प्रकारेण भूम्यामपि अधोरुर्परि जलशिराः सन्ति। यद्यपि आकाशात् धरोपरि एकेन वर्णेन रसेन चाम्भश्च्युतं तथापि भूम्यायाः विशेषता कारणात् भूमौपरि भिन्न-भिन्न रस-वर्णयुक्तं भवति। अतः भूम्याः रस-वर्णानुसारं जलस्य रस-वर्णादीनां विचारोऽपि क्रियते।

**जलस्वरूपम् –**

---

144 वास्तुमण्डनम्, अ.३.८४-८५

145 भविष्योत्तरपुराणम्, उत्तर, १२९.७१-७३

146 बृहत्संहिता, अ. ५४.१-२

जलस्य भौतिकं स्वरूपं जलपर्यायस्य नीर शब्दस्य व्युत्पत्या स्पष्टी कर्तुं शक्यते। तद्यथा वाचस्पत्यकोषे निर्गतं रादग्नेनीरम् अथवा निर्गतो रोऽग्निर्यस्मात्। तन्नीरमिति। सांङ्ख्यानां मते जलं रसतन्मात्रादुत्पन्नो भूतविशेषः। नैयायिकास्तु परमाणु विशेषेभ्य एव जलस्योत्पत्तिं मन्यन्ते। वेदान्तिनां मते पञ्चीकृतेभ्य एव पञ्चभूतेभ्यः स्थूलतया उत्पन्नं जलम्। अत्र जलभूतांशबाहुल्याज्जलव्यवहारो वैशष्यात्तद्वाद इति। जलस्य भौतिकविवेचन दृष्ट्या **'अग्नेराप'** इत्युपनिषद्वचनं सर्वथा वैज्ञानिकं वर्तते। छान्दोग्योपनिषदः शाङ्करभाष्ये यदुक्तम् – **'तेज एव तत्पूर्वमात्मानमुद्भूतं दर्शयित्वाऽथानन्तरमपः सृजतेऽतोऽप्स्त्रष्टृत्वाद्भूयोऽद्भ्यस्तेज।'**[१४७] इति आधुनिकवैज्ञानिक व्याख्यया सर्वथा अभिन्नमेव। तथा हि आधुनिक वैज्ञानिकैरपि जलस्योत्पत्तिस्तैजसतत्त्वादग्निभूताद् ऑक्सीजनेत्याख्यादेव प्रत्यक्षी कृता। यथा घनीभूततत्त्वेषु सुवर्ण, द्रवेषु घृतञ्चान्तर्हित तेजसी मन्यते तथैव वायुभूततत्त्वेषु ऑक्सीजनेति तत्त्वं तेजसम्। भूतले यत्किञ्चिदपि दहनं शरीरान्तर्वति, शरीरेभ्यो बर्हिवा भवति तस्य सर्वस्य कारणभूतम् ऑक्सीजनाख्यं तेजसं तत्त्वमेव वर्तते। यदा हाइड्रोजनाख्यं वायुभूततत्त्वं माध्यमं विधाय ऑक्सीजन तत्त्वं प्रज्वलति तदा अस्माज्जलस्योत्पत्तिः जायते। इति बह्नेरिति नीरशब्दस्य व्युत्पत्तिः। ऑक्सीजनाख्य तैजसतत्त्वस्य सूर्यतेजसोंऽश भूतत्वात् यत्कैञ्चिज्जलस्य सूर्योद्भूतत्त्वं वर्णितम्। यथा –

**सूर्याद् हि जायते तोयं, तोयात् सस्यानि शाखिनः।**[१४८]

आचार्यचरकस्य मतानुसारम् –

**जलमेकविधं सर्वं पतत्यैन्द्रं नभस्तलात्।**
**तत् पतत् पतितं चैव देशकालावपेक्षते।।**[१४९]

---

147 छान्दोग्योपनिषत्, ७.११.१

148 प्राच्यभारतीयम् ऋतुविज्ञानम्, प्र.१,पृ–३–४

जलस्य मूलस्वरूपमेकमेवमस्ति। यदा नभस्तलात् पतति तदा एकस्वरूपे एव अस्ति। अनन्तरं पतत् पतति चैव देशकालानुसारं जलं गुणैः वा दोषैः युक्तं भवति।

अपराजितपृच्छाग्रन्थानुसारं नगरे प्रप्रथमं जलापूर्ति व्यवस्था करणिया इति निर्देशितं यथा हि–

**पुरस्य बाह्यान्तरे विविधाः स्युर्जलाशयाः।**

**वापी–कूप–तडागानि कुण्डानि विविधानि च।।** [१५०]

नगराद् बहिः तथा अन्तः नानाप्रकारेण जलाशयानां व्यवस्था करणीयमिति विश्वकर्मा वदति।

विश्वकर्मवास्तुशास्त्रम् इति ग्रन्थे आचार्यविश्वकर्मा नगरनिर्माण प्रसङ्गे जलव्यवस्था एकं महत्त्वपूर्णविषयः इति प्रदर्शितः। नगरे जलव्यव्थायां वापी–कूपस्यो महत्त्वपूर्णमङ्गमस्ति इति । यथा ग्रामनगरराजभवनादिषु निमार्णं भविष्यति तत्र तत्र वापीकूपादिकं कल्पनीयम्। वापी–कूपनिर्माणे प्रशस्तभूमिलक्षणं श्री विश्वकर्माचार्यानां मतानुसारम् –

**यत्र स्वादुजलस्त्रावः सन्ततं स्थितिभाग्भवेत्।**

**परीक्ष्य तत्र कर्तव्यं वापीकूपादिकं मतम्।।** [१५१]

ग्रामे नगरे वा राजप्रासादे वा यत्र भूमौ मधुरजलस्त्रावः सततं दृश्यते, ग्रीष्मादिसमयेस्वप्यविच्छिन्नजलधारां बहुशः प्राप्यते इति परीक्ष्य, सुधाखण्डपाषाणास्थितशकलादि दोषरहितं स्थलं बहुधोपायैः परीक्ष्य, तस्यां निर्णयं कृत्वा

---

149 चरकसंहिता, अ.२७.१९६

150 अपाराजितपृच्छा, सूत्र–७४.१

151 विश्वकर्मवास्तुशास्त्रम्, अ.३३.१

उत्तमं भूम्यां कूपं वापीं वाऽन्यज्जलमेलनस्थलं प्रकल्पनीयम्। ग्रामगेहादिखनने क्वचिद्वर्तुलं, क्वचिच्चतुरश्रं क्षुद्रप्रमाणकं कूपं कल्पनीयम्। राजप्रासादिषु दीर्ध वापी निर्मितव्यम्।

अपराजितपृच्छायामपि यथोक्तम् –

**दश कूपाश्चतु र्वाप्यश्चत्वारि कुण्डकानि च ।**

**तडागाः षड्विधाश्चैवं कथयाम्पराजित।।** [१५२]

दशप्रकाराः कूपाः, चतस्रः वाप्यः, चत्वारि कुण्डानि च षड्विधानां तडागानां निर्माणविधानं वर्तते।

**►कूपलक्षणम् –**

अपराजितपृच्छाग्रन्थे दशप्रकाराकाः कूपा वर्णिताः वर्तन्ते। यथा हि –

**श्रीमुखो विजयः प्रन्तो दुन्दुभिश्च मनोहरः।**

**चूडामणिश्च दिग्भद्रो जयो नन्दश्च शङ्करः।।**

**चतुर्हस्तादितो वृद्धिर्यावद्धस्तस्त्रयोदशम्।**

**श्रीमुखाद्याः शङ्करान्त दश कूपाः प्रकीर्तिताः।।**

राजवल्लभग्रन्थेऽपि दश प्रकाराणां कूपानां वर्णनं प्राप्यते। यथा हि –

**कूपाः श्रीमुखावैजयोचतदनुप्रांतस्तथादुंदुभिः**

**तस्मादेवमनोहरश्चपरतः प्रोक्तश्च चूडामणिः।।**

**दिग्भद्रोजयनंदशंकरमतोवेदादिहस्तैर्मितैः**

**विश्वांतैः क्रमवद्धिंतैश्च कथितावेदादधः कूपिका।।** [१५३]

---

[152] अपराजितपृच्छा, सूत्र–७४.२

[153] राजवल्लभः (नारायणभारती), अ.४.२७

निम्नदर्शित कोष्टकरूपेण स्पष्टि क्रियते –

| क्रमः | कूपस्य विस्तारः | कूपनाम |
|---|---|---|
| १ | चतुर्हस्तम् | श्रीमुखः |
| २ | पञ्चहस्तम् | वैजयः |
| ३ | षट्हस्तम् | प्रान्तः |
| ४ | सप्तहस्तम् | दुदुम्भिः |
| ५ | अष्टहस्तम् | मनोहरः |
| ६ | नवहस्तम् | चूडामणिः |
| ७ | दशहस्तम् | दिग्भद्रः |
| ८ | एकादशहस्तम् | जयः |
| ९ | द्वादशहस्तम् | नन्दः |
| १० | त्रयोदशहस्तम् | शङ्करः |
| ११ | चतुर्हस्ततः न्यूनम् | कूपिका |

## ▶ **वापीलक्षणम्** –

राजवल्लभग्रन्थे चत्वारि वाप्यानां प्रकाराणां दर्शितम्। यथा हि –

**वापी च नंदैकमुखात्रिकूटा षट्कूटिकायुग्ममुखा च भद्रा।**

**जयात्रिवत्क्रानवकूटयुक्ता त्वकैस्तुकूटैर्विजयामतासा।।** [१५४]

---

154 राजवल्लभः(नारायणभारती), अ.४.२८

अर्थात् एकमुखाश्च त्रिकूटयुक्ता वापी **नन्दा** नाम्ना ज्ञायते, द्विमुखास्तथा षट्कूटयुक्ता वापी **भद्रा** इति नाम्ना प्रख्याता, त्रिमुखास्तथा नवकूट युक्ता वापी **जया** इति नाम्ना विख्याता, चतुर्मुखास्तथा द्वादशकूट युक्ता वापी **विजया** इति नाम्ना प्रख्याता।

विश्वकर्मवास्तुशास्त्रम् इति ग्रन्थे वाप्यानामाकारास्तथा प्रमाणसहितं निर्माणविधानस्य प्रदर्शनं वर्तते। यथा हि–

**चतुरश्रां वर्तुलां वा दीर्घां वा तां प्रकल्पयेत्।**

**त्रिदण्डं वा चतुर्दण्डं पञ्चदण्डमथापि वा।।**

**षडादिदशदण्डान्तं प्रमाणमिह योजयेत्।**

**चतुर्मुखां वा द्विमुखां कचिदेकमुखां तु वा।।**[155]

वापी तावत्प्रायश्चतुरस्राकारं निर्मापणीया। कश्चिद्वर्तुलाकारा, कश्चिद्दीर्घाधिक्या वा यथा स्थलाविभवं, यथेप्सितक्रमं प्रकल्पयतिुमपि शक्यते। तस्मात्तत्कल्पनं पूर्वमेव निश्चित्य तदनुगुणं खननं कुर्यात्। तस्माच्चतुराकारायाः वाप्याः वैशाल्यादिकं तु दण्ड त्रयप्रमाणं वा दण्डचतुष्कप्रमाणं वा दण्डपञ्चकादि दशदण्डान्त प्रामाणेन योजनमिति। दीर्घाकार कल्पनेऽपि प्रमाणमिदमेवमिति विश्वकर्माणःमतम्।

**दशहस्तप्रमाणं वाऽधिकं वा तलमध्यभाक्।**

**भित्तिकल्पनमत्रोक्तमैष्टिकं शैलकं तु वा।।**

**जालान्तिकेऽङ्गणं कल्पमाद्यमेतदुदीरितम्।**

**द्वितीयाङ्गणकं वापि तृतीयाङ्गणकं तु वा।।**

**सपादं वा द्विपादं वा युक्त्या स्थापनमीरितम्।**

**कल्पनं दार्ढ्यसंयुक्तं पादसोपानमञ्जुलम्।।**

---

155 विश्वकर्मवास्तुशास्त्रम्, अ.३३.२–३

**मुखमण्डपयुक्तं वा कवाटादिसमन्वितम्।**[१५६]

वापीभित्तिकल्पनेः तु जलस्रावतलादधः प्रदेशे दशहस्त अधोः वा कचिन्महावाप्यादौ तदधिकनिम्नमानं वा खातं करणीयम्। एवं जलस्रावतलाधः प्रदेशकल्पितभूमिलम्बनं दृढभित्तिरुपं कार्यम्। तत्तु दृढशिलाखण्डैर्वा सम्यक् पक्वेष्टिकाभिर्वा सुधासहितमचश्चलबन्ध्नं तत्र तत्र भागं मृत्खण्डचिक्कणादीनां पार्श्वे दृढीकृतं च स्थापयेत्। एवं वाप्या अधोभागे भूमिलम्बनकरणानन्तरं जलसमीपे विहाराणार्थं चतुष्वपि दीर्घभागेः अथवा भागद्वये एकस्मिन्वा भागे अङ्गणमपि निर्मापनीयम्।

एतादृशा जलसमीपं कृतमङ्गणचतुष्कं तु एकदण्डायतिकं, तन्मानं किञ्चिद् न्युनप्रमाणं वा दैर्ध्ये च संयोजयित्वा समस्त स्तम्भानामुपर्युपरि आवरणपटलान्वितं दृढसन्धि करणीयम्। तद्रुपर्यवरोहणमार्गे विश्रान्त्यर्थं तत्प्रमाणयुतं वा तदर्धप्रमाणयुतं वा तदधिकप्रमाणयुतं वा यथेच्छं यथास्थलविभवं द्वितीयाङ्गणं तृतीयाङ्गणं कल्पनीयम्।

अन्यत्र वाप्यां जलसमीपस्य प्रथमाङ्गणस्यैव जलक्रीडाविश्रान्तिकेल्यादि योग्यत्वं प्रसिद्धार्थं निर्मापनीयम्। वर्षाकालादिषु प्रथमाङ्गणे जलपूरिते तदा द्वितीयतृतीयाङ्गणादिषु स्थितिरिति कारणात् द्वितीयतृतीयाङ्गणयोः निर्माणं करणीयमिति प्रयोजनम्। यथा पश्यामह – राजहर्म्यादिषु एतादृशा अङ्गणत्रयोपेताया वाप्याः कल्पने अन्तःपुरकामिन्यादीनां जलकेल्युपकरणादि स्थापनार्थं निर्मापनीयमिति। तथा तस्मादङ्गणत्रादियुतं वापी कल्पनमपि हितायैवेति। किञ्चैतादृशरीत्या प्रथमाङ्गणोपरि द्वितीयाङ्गणतलस्य, तदुपरि तृतीयाङ्गणतलस्य च निर्माणे दृढसन्धिबन्धसहितं स्तम्भस्थापनमुपर्युपरि भारवहनक्षमं पटलादि अन्य निर्माणान्तरं च युक्त्या दृढं कार्यं भवति इति शिल्पिभिः मन्यन्ते।

---

[156] विश्वकर्मवास्तुशास्त्रम्, अ.३३.४–६

एतादृश्या लक्षणसहिता वाप्या एकस्मिन् वा दिग्भागे, दिग्भागद्वये वा दिग्भागचतुष्के वा साधारणैकदण्डप्रमाणादिकविस्तार सहितं सोपानमार्गं प्रकल्पप्य तत्पूर्वभागे मिर्णिकाकञ्चुकादियुत कवाटभासुरं द्वारश्च प्रकल्पयेत्। कारणम् – वाप्यां वत्सादिपतनभयनिवारणार्थमिति। किञ्चास्य वापीद्वारस्य पुरोभागे चतुर्भिरष्टभिर्वा स्तभैरुज्ज्वलं क्षुद्राधिष्टानयुतं मण्डपं वा कल्पयेत्। तादृश मण्डपनिर्माणे दोषो न विद्यते इति विश्वकर्मणः मतम्।

वाप्यां सोपानमपि महत्त्वपूर्णमङ्गमस्ति। विश्वकर्मवास्तुशास्त्रम् इति ग्रन्थे वापीनिर्माणे सोपाननिर्माणविधानमपि विस्तृततया विश्वकर्माः वर्णितम्। सोपानस्थानं वृत्ताकारं कल्पितायां वाप्यां वा कूपे चेत् चन्दनादितरुषु यया रीत्या भुजङ्गपरिवेष्टनाकारे लोकप्रसिद्धं वर्तते। तथैव रीत्या वक्रिमयुतयोपर्युपरि सोपानरचनां वापीकूपादि भित्तौपरि वक्ररीत्या दृढीकृत्वा सुधादिनाऽनुलेप्य सोपाननिर्माणं परिपूरयेत् इति। एवं वृत्ताकारवापीकूपादौ वक्ररीत्या सोपानस्थापनक्रमः। सूत्ररीत्या सोपानपङ्क्तिस्थापनं एतावत् स्थापनीयम् । यथा हि – सूत्ररीति एकहस्त द्विहस्तायामवर्ती क्रमशोऽधोऽधः स्थापितां सोपानपङ्क्ति रचयेत्। एवं सूत्ररीत्या सोपानकरणे यथेच्छं चतुर्षु वा दिग्भागेषु, भागद्वये वा एकस्मिन् वा भागे तत् सोपाननिर्माणं प्रकल्पनीयम्। तस्मात् सर्व एतादृश कूपस्य वा वाप्याः दीर्धिकायाश्च तीरभूमौ अगाधमवटं खतित्वा तस्मिन् घटीयन्त्रं स्थापयेत्। घटीयन्त्रस्य समीपे समभूभागे तदृशवाप्यादीनां परितः सस्तम्भाङ्गणस्य रचना करणीयम्। किञ्चात्र वाप्यादिषु स्थापिताङ्गणस्तम्भादिषु किन्नरमिथुनादि मनोहरचित्र रचनामपि प्रकल्पनीयम्। क्वचिद्वरुणदेवादिपुण्यदेवानां बिम्बस्थापनं च कर्तव्यम्। चैतावता महाप्रमाणवती दीर्धिका, तन्यूनप्रमाणोपेता वापी तन्यूनप्रमाणयुतः कूपः इति समलक्षणबन्धनक्रमः,

मनोहरचित्ररचनाप्रमाणयुतं च वापीकूपादिकल्पनं निर्मापनीयमिति शिल्पिभिरवाचार्या: कथितम्।[१५७]

समराङ्गणसूत्रधारग्रन्थेऽपि वापीसम्बन्धितं एक: श्लोक: विद्यते। यथा हि –

**शालानां यत् पुनर्ममध्यं वापी पुष्करिणी च सा।**

**संछन्ना (चा ? सा)पि यस्य स्यात् तद् गर्भगृहमुच्यते।।**[१५८]

शालानां मध्ये यत् वापीस्थितं सा वापी **पुष्करिणी** इति नाम्ना प्रख्याता। यदि पुष्करिणी संछन्ना भवेत् तद् गर्भगृहमुच्यते।

**▶ तडाकलक्षणम् –**

विश्वकर्मण: मतानुसारं तटाकनिर्माणस्थलमेवं तत्फलं निम्नदर्शितं वर्तते। यथा हि –

**तटाककल्पनाच्छ्रेय: प्राणिनां च सुखं मतम्।**

**तस्मात्तत्कल्पयेद्धीमान्ग्राममध्ये शुभस्थले।।**

**मार्गस्य मध्यभागे च वास्तुभूमौ विशेषत:।**

**सततं स्वादुसलिलस्त्रावो यत्र च दृश्यते।।**[१५९]

अर्थात् तटागादिनिर्माणेन तत्र तत्र ग्राममध्यस्थलादौ पुंसां ऐहिकशुभफलप्राप्ति: भवति। जगति आमुष्मिकसद्गतिश्चेत्यादि पुराणकारपठितफल श्रुत्वा तत्र तत्र हरिणगोमहिषमानवादीनां प्राणिनां बहुघोषकार: तटाक: निर्मितव्य:। ग्राममध्यस्थले समुचित प्रदेशेऽन्यत्र वा महामार्गसमीपे नगरादिषु च बहुशस्समुचितप्रदेशे महावीथ्याग्रभागे देवालयस्यान्तर्वा बहि:प्रदेशे

---

157 विश्वकर्मवास्तुशास्त्रम्, अ.३३.७–९

158 समराङ्गणसूत्रधार:(जुगनू), अ.१८.२०

159 विश्वकर्मवास्तुशास्त्रम्, अ.३४.१–२

तत्तद्वास्तुवास्तव्यजनहितकारिणि स्थले समुचिते मठमण्डपारामनिष्कुटादिस्थलेषु च स्थपयेतदिति वास्तुशास्त्रकारोपदेशः।

तत्र च कोऽपि नियमः यथा – यस्मिन् स्थले वास्तुभूगर्भ महिम्ना सर्वर्तुसमयेष्वपि अविच्छिन्नं मधुरजलस्य प्रसारस्यस्तस्मिन् स्थले तडागं स्थापयेत् इति उत्तमः। क्वचित् तादृशः सततं जलस्त्रावस्य प्रसाराभावे तत्र कल्पिते तटाकेऽन्तिकस्थनदीजलाशयगिरिप्रस्त्रवणादि प्रदेशात् प्रणाल्यादिना तन्मधुरसलिलमत्र इति मध्यमः। अयमर्थः निष्पङ्कागाधसलिलं पूरयेद्वाक्वचितस्थले इति।

राजवल्लभग्रन्थे निम्नदर्शित तटाकप्रकाराः दर्शिताः। यथा हि –

**सरोर्धचंद्रतुमहासरश्च वृत्तं चतुःकोणकमेवभद्रम्।**

**भद्रैः सुभद्रं परिधैकयुग्मं बकस्थलैकद्वयमेवयस्मिन्।।** [१६०]

अर्थात् अर्धचन्द्राकारः तडागः **अर्धचन्द्रः** इति नाम्ना विख्यातः। चतुर्दिक् परितो भित्तियुक्तं तडागः **महासरः** इति नम्ना ख्यातः। वृत्ताकार तडागः **वृत्तः** इति नाम्ना प्रख्यातः। चतुरस्त्राकारः तडागः **चतुःकोणः** इति नाम्ना कीर्तितः। एकभद्र युक्तः तडागः **भद्रः** इति नाम्ना परिकीर्तितः। चतुर्दिक् भद्र युक्तः तडागः **सुभद्रः** इति नाम्ना विख्यातः। एतानां तडागानां एकः वा युग्मः परिधः निर्मितव्यः तथा यस्मिन् तडागे एकद्वयमेव बकस्थलमपि स्थापयेत्।

**तडागप्रमाणम् –**

विश्वकर्मवास्तुशास्त्रम् इति ग्रन्थानुसारं सर्वत्र परीक्ष्य निर्दिष्टे स्वादुजलस्त्राविणि स्थले तटाकनिर्माणेऽपि तादृशतटाकस्य मध्यभागेऽन्तः कूपाख्यं खननीयम्। तदात्व एव

---

[160] राजवल्लभः(नारायणभारती), अ.४.२९

ग्रीष्मादावप्यशोष्यजलसमृद्धिर्भवेदिति । क्वचिच्छिलामयभूमौ तटाकनिर्माणं कृतेऽपि तादृशतटकादिमध्यभागे चैवरीत्या अन्तः कूपाख खातयेत्। तत्तदा शिलान्तःस्थलं सलिलं प्रस्त्रावेयदिति। सर्वथा न कृष्णमृत्तिकोषर मृत्तिकादिनिर्भरस्थले तटाकनिर्माणं स्थापनीयम्। तस्मादेवमुक्तरीत्या परीक्ष्य निर्दिष्टायां मधुरजलस्त्राविण्यां भूमौ तटाकनिर्माणाय खनने कृते तन्मध्ये क्वचित् पाषाणखण्डादि दर्शनमपि भवति। दक्षिणोत्तरदिग्भागयोः दैर्ध्ययुतं तटाकं स्थापनीयम्। अथवा क्वचित् स्थलानुगुणं प्राक्प्रत्यग्दिग्भागयोः दैर्ध्यं वा तटाकं निर्मापनीयम्। क्वचित् क्षुद्र तटाकं चतुरस्त्रप्रमाणेन स्थापयेत् तथा अष्टमुखसहितमपि स्थापयितुं शक्यते।[१६१]

**जलनिर्गमनोपेतमागमायनसंयुतम्।**

**भान्वङ्गुलोन्नता पङ्क्तिर्द्विगुणायतिका मता।।**

**मध्यमहापङ्क्तियुक्तमृजुसूत्रं च निश्चलम्।**

**तीरमण्टपसंयुक्तं तीरवृक्षैश्च शोभितम्।।**

**जलमण्टपसंयुक्ता क्वचित्कार्योत्तमे (स्थले)।**

**दैवे तटाके तत्कल्प्यं विमानशिखरोज्जलम्।।**[१६२]

तडागखनन समये तस्य तटाकस्य शुद्धजलागमनप्रणाल्यादि प्रकल्पनं कृत्वा जलनिर्गममार्गस्य उचितस्थले दृढशिलापटलाद्याच्छादितं निर्मितव्यम्। एवं तटाकायामादि प्रमाणानुकूलं खननं कृत्वा अधःस्थले समतलं कृत्वा प्रतिदिग्भागं क्षुद्रशङ्कुनिखननपूर्वकं सूत्रन्यासं प्रसार्यं तत् सूत्रपातमृजुमानानुसारं, पाषाणसोपानं कल्पनमचलश्चलमति दृढसन्धिकं परस्परं मेलयित्वोपर्युपरि क्रमशः कारयेत्। एतादृशस्य सोपानस्य द्वादशाङ्गुलमुन्नतं स्थापनीयं तथा द्विगुणीतप्रमाणेन पङ्क्तिः कल्पितम्। महातटाकादिषु अष्टादशाङ्गुलमथवा

161 विश्वकर्मवास्तुशास्त्रम्, अ.३४.३-४

162 विश्वकर्मवास्तुशास्त्रम्, अ.३४.५-७

चतुर्विंशाङ्गुलौन्नतिकं समस्थलं प्रकल्प्य दश सोपानकल्पनानन्तरं विशालमेकं महासोपानाख्यं विश्रान्तिसोपानं च स्थापनीयम्। एवं तत्र स्थलानुसारं मध्ये मध्ये विश्रान्तिसोपानं महासोपानमपि पूर्वोक्त द्वादशाङ्गुलमानेन सोपानरचनाश्च दृढं निर्मितव्यम्।

सोपानमार्गस्य मध्यतले तत्र योग्यस्थले मण्डपं शिलामयमिष्टिकासुधामयं वा प्रकल्पयेत्। तटाकप्रमाणानुसारं स्थापनीयम्। इति तीरमण्डपं तीरवृक्षैश्च शोभितम्। तटाकस्य मध्यस्थलेऽन्तःकूपः साधिष्ठानं स्तम्भसहितं शिलामयमेव स्थापनीयम्।

देवालयतटाकनिर्माणे इदं विशेषतो जलमध्यमणटपमवश्यं करणीयम्। एवं कल्पितानां बृहद् वा क्षुद्राणां सर्वेषां मण्टपानामुपरिभागे सविमानशिखरं स्थापनीयमिति शिल्पविदां मतम्। एवं तीरमण्टपजलमध्ये मध्यमण्टपप्रकल्पनमपि करणीयम्। सर्वत्र तटाकतीरे नातिदूरे समुचितस्थले आम्रातकपुन्नागपाटलसरलकर्णिकारपनसबिल्वाशोकाश्वत्थनारिकेलादि शुभा वृक्षाः रोपणीयाः।

**खण्डपङ्क्तिः क्वचित्कार्या तटाकेषु सरस्सु च।**

**मेदनीपट्टिकोपेता जलं सर्वत्र कल्पयेत्।।** [१६३]

जलाशयसराः प्रमुखेषु स्थलेषु क्वचित् तटाकेषु च खण्डपङ्क्तिः न दोषायेति। खण्डसोपानमर्थात् तस्य सरस्तटाकमहाह्रदादेश्चतुर्ष्वपि वा दिग्भागेषु द्वयोरेकस्मिन्वा भागे जलसमीपे एकदण्डादिपञ्चदण्डैवशाल्योपेतं सोपानमार्गः स्थलविभावनुकूलं रचनीयम्। अपि चैतेषु तटाकादिषु एवंरीत्या सोपानं करणीयम्। अनन्तरं भूमितलात् मेदनीपट्टिकोपेता तटाके सर्वत्रं जलं प्रकल्पयेत्। तत्र तटाकतीरतले तीरवृक्षसमीपे क्षुद्राङ्गणस्य प्रकल्पनमपि कर्तुं शक्यते।

---

[163] विश्वकर्मवास्तुशास्त्रम्, अ.३४.८


राजवल्लभ अध्याय ४.
वृत्ततलाव.
अर्धचंद्र तलाव
१
३
चतुरस्त्र तलाव चतुःकोण
भद्र तलाव
२
४
सुभद्र तलाव
५
चारे तरफ बांधेलू होयतो तेनुं नाम महासर कह्यूं छे. ते चतुः-कोणमां समाशथाय अथवा वृत्त समाशथाय एटला माटे पांच चित्रो बताव्यां छे.

**तटाकालङ्करणम् –**

**रेखारुपं मीनरुपं लतारुपश्च तक्षयेत्।**

**भूर्जपत्रक्षेपणं वा नानाङ्गणसमन्वितम्।।**

**वानरक्रिडनं वापि तक्षयेत्सुमनोहरम्।**

**खक्वचिदष्टमुखोपेतं तटाकं बहुपङ्क्तिकम्।**

**स्थापयेन्नृपतिर्देशे प्राणिनां सुखदायकम्।।** [१६४]

सोपानस्य मुखभागेषु पार्श्वेषु दृश्यस्थलेषु पत्रादिरेखारुपं वा सकुटुम्बमीनरुपं वा भूर्जपत्रादिरुपं वा शिखरटङ्कादिना क्षेपणं प्रकल्प्य मध्ये मध्ये अङ्गणाविभागश्च रचयित्वा कचिद्वानरकुटुम्बखेलनरुपं च क्षेपणमन्यत्र सुमनोहरं चित्रं गन्धर्वकिन्नरयुगलादि स्थलकेलीव्यग्रं प्रकल्पनीयम्। इति संक्षेपेण तटाकनिर्माणविधानं विश्वकर्माचार्येण दर्शितम्।

### ►कुण्डनिर्माणम् –

नगरनिर्माणे जलव्यवस्थायां कुण्डस्य महत्त्वमपि वर्तते। प्राचीनकाले केषुचित् नगरेषु जलव्यवस्थायाः भागरुपेण कुण्डनिर्माणमपि कुर्वन्ति स्म। अद्यापि क्वचित् नगरेषु कुण्डदर्शनं भवन्ति।

राजवल्लभग्रन्थे कुण्डनिर्माणविधानं प्राप्यते। यथा हि –

**भद्राख्यकुंडंचतुरस्त्रकंच सुभद्रकंभद्रयुतंद्वितीयम्।**

**नंदाख्यकं स्यात्प्रतिभद्रयुक्तं मध्ये सभिद्वंपरिघंचतुर्थम्।।** [१६५]

---

[164] विश्वकर्मवास्तुशास्त्रम्, अ.३४.९–१०

[165] राजवल्लभः(नारायणभारती), अ.४.३१

अथ चतुरस्त्रकुण्डः भद्रः इति नाम्ना विख्यातः, भद्रयुक्तकुण्डः सुभद्रः इति नाम्ना प्रख्यातः, प्रतिभद्रयुक्तं नन्दः तथा कुण्डस्य मध्ये भिट्टयुक्तं कुण्डः परिघः इति नाम्ना विख्यातः। वास्तुमण्डनग्रन्थेऽपि यथोक्तं वर्णनं प्राप्यते यथा हि –

**कुण्डं युगास्त्रभद्रं स्यात् सुभद्रं भद्रसंयुतम्।**

**प्रतिभद्रे युतं नन्दं परिघं मध्यभिट्टवत्।।** [१६६]

दीपार्णवग्रन्थेऽपि यथोक्तं कुण्डानां लक्षणं वर्णितं वर्तते। [१६७]

**►कुण्डप्रमाणम् –**

राजवल्लभग्रन्थानुसारं कुण्डप्रमाणम् अष्टहस्ततः हस्तशतं तथा द्वारैश्चतुर्भिः सहितानि कार्या। मध्ये द्वारदिशो विभागे गवाक्षाः अपि कुर्यात्। कुण्डस्य कोणे चतुष्ककी तथा पट्टशालायाः निर्माणमपि करणीयम्। [१६८]

वास्तुमण्डनग्रन्थेऽपि सूत्रधारमण्डनः यथोक्तं कुण्डप्रमाणं दर्शयति। तथा हि –

**शान्तान्तमष्ट हस्तादि चतुर्द्वारिणि कारयेत्।**

**मध्यभिट्टे च शाला सुदेवार्चास्तत्र विन्यसेत्।।** [१६९]

यथा राजवल्लभोक्त प्रमाणानुसारेण कुण्डनिर्माणं कृत्वा तत्र देवतानां सुन्दरीणां प्रतिमानां विन्यासोपि करणीयः।

---

[166] वास्तुमण्डनम्, अ.३.८८

[167] दीपार्णव, अ.१८.७–९

[168] राजवल्लभः(नारायणभारती), अ.४.३२

[169] वास्तुमण्डनम्, अ.३.८९

राजवल्लभग्रन्थे कुण्डस्य भिट्टोपरि गङ्गादि नदीनां प्रतिमानां, द्वादशादित्यानां प्रतिमानां, दशावताराणां प्रतिमानां, एकादश रुद्राणां, दुर्गायाः, भैरवस्य, षोडशमातृकाणां, गणेशस्य, वह्नैस्त्रिकं, चण्डिकायाः, दुर्वासामुनयः, नारदस्य, द्वारावतीलीलिकायाः तथा ब्रह्मादि पञ्च लोकपालानां प्रतिमायाः निवेशनं करणीयम्।

दीपार्णवग्रन्थेऽपि कुण्डनिर्माणविधानं तथा तस्योपरि देवार्चानां सम्बन्धितं विस्तृतं वर्णनं विद्यते।[१७०]

सूत्रधारमण्डनस्य मतानुसारम् –

**तस्योद्ध्र्वतः श्रीधरमंडपस्य संदर्शनात् पूर्णफलंचकाश्याः।**

**स्नानाञ्चगंगाप्लवनस्यपुण्यं कृतभवेञ्चेत् विधिवत् विधिज्ञैः।।**[१७१]

कुण्डोपरि श्रीधरमण्डपस्य निर्माणमपि कुर्यात्। तन्निमार्णं यदा विधिज्ञैः शिल्पिद्वारा शास्त्रविधिवत् भवेत् तदा तस्य दर्शनेन काशीयात्रा तथा गङ्गास्नानस्य पुण्यफलं प्राप्यते इति।




[170] दीपा

[171] राजव

## राजवल्लभ अध्याय ४.



भद्रकुंड १



सुभद्र.२



प्रतिभद्र.३.

## राजवल्लभ अध्याय ४.

वृत्ततलाव.




अर्धचंद्र तलाव




चतुरस्त्र तलाव चतु:कोण




भद्र तलाव




सुभद्र तलाव




चारे तरफ बांधेलू होयतो तेनुं नाम महासर कह्यूं छे. ते चतु: कोणमां समाशथाय अथवा वृत्त समाशथाय एटला माटे पांच चित्रो बताव्यां छे.

# राजवल्लभ अध्याय ४




परिघ ४



## ९.वाटिका-आरामोद्याननिर्माणविधानं वृक्षविचारश्च-

प्राचीनभारतीयनगरनिवेशने आरामोद्यानादीनां परिकल्पनमपि अनिवार्यं मन्यन्ते। समराङ्गणसूत्रधारग्रन्थे परिखायाः परितो सुगन्धित पुष्प- लता- गुल्म- वृक्षैः युक्तैः उद्यानानं निर्माणानिर्देशो प्राप्यते। यन्नगरस्य शोभां वर्धयित्वा मधुकरादीनामाकर्षितं करोति इति राजाभोजः वर्णयति। यथा हि –

**सर्वपार्श्वेष्वयैतस्य गन्धान्धमधुपाङ्गनान्।**

**सुमनोविटपारामान् कुर्याद् वासान् समुत्सकान्।।**[१७२]

यत्र पुनः नगरनिवेशनार्थं भूमिचयनप्रसङ्गे प्रायः सर्वेषु वास्तुशास्त्रीयग्रन्थेषु यथा वर्णितं दृश्यते यथा यत्र भिन्न-भिन्न बृहद् वृक्षाणि स्थितानि सन्ति तथा तत्र सर्वबीजवपने बीजाङ्कुरं शीघ्रतया अङ्कुरितं भवेत् सा भूमिः नगरनिर्माणार्थं शुभा भवति। अतः नगरे वाटिका निर्माणे अपि एतावत् भूमौ वाटिका निर्मियते तदा तत्रे अतीव सुन्दरी वाटिका भवति। अतः एतावत् उत्तमायां भूमौ नगरमेवं गृहादि विन्यासे भिन्न-भिन्न वनस्पतिनामनिवार्यता वास्तुविशारदाः प्रतिपादयन्ति।

वराहमिहिराचार्यानुसारं वाटिका निर्माण फलम्-

**यो वाटिका राजपथः समीपे स्विष्टां .......।**

**स्वर्गे च वासं लभते मनुष्यश्चतुर्युगं सर्वसुखैरुपेतः।।**[१७३]

---

[172] समराङ्गणसूत्रधार, अ.१०.२३ (पूष्पेन्द्र)

[173] बृहद्वास्तुमाला, चरणीविचारः,श्लो.३३,पृ-११७

यो राजमार्गस्य समीपे वा मार्गस्य द्वयोर्पार्श्वे वाटिका निर्मियते सः मनुष्यः स्वर्गे वासं लभते तथा चतुर्युग पर्यन्तं सर्वसुखोपभोग्यते इति।

बृहद्वास्तुमालानुसारं वाटिकारोपणमाहत्म्यम् –

**वाटिका..................यदि निर्मितः।**

**गृहात्पूर्वे कुवेर्या च वारुणे शम्भुकोणके।।**

**सदा सवित्री भविता सदा दानं प्रयच्छति।**

**सदा यज्ञं स पूजेत् यो रोपयति पादपम्।।**[१७४]

अर्थात् गृहात्पूर्वे, पश्चिमे,उत्तरे वा ईशानकोणे वाटिकानिर्माणं करोति सः सर्वदा गायत्री पुरश्चरण पुण्यफलं प्राप्नोति। सर्वदा दानं प्रयच्छति तथा नित्य यज्ञकर्मस्य फलं प्राप्नोति। तथा वृक्षारोपणेऽपि महत् पुण्यफलं प्राप्यते। यथा हि

**अश्वत्थमेकं पिचुमन्दमेकं न्यग्रोधमेकं दशचिञ्चिणीकम्।**

**कपित्थबिल्वामलकत्रयञ्च पञ्चाम्रवापी नरकं न पश्येत्।।**[१७५]

अर्थात् एकः अश्वत्थः, एकः कदम्बः, एकः न्यग्रोधः, एका कदली, दशं चिञ्चिणीकं, पञ्च आम्रवृक्षाः तथा कपित्थः– आमलकः– बिल्वः त्रयश्च वृक्षाणां रोपणं यः करोति सः नरकं न पश्येत् अर्थात् स्वर्गं प्राप्नोति।

क्वचित् प्राचीन नगरेषु नगरस्य बर्हिः उद्यानानामतिरिक्तं वृक्षानां वनमपि स्थितमासीत्। रामायणे **उद्यानाम्रवणोपेतां महतीं सालमेखलाम्।**[१७६]

---

[174] बृहद्वास्तुमाला, चरणीविचारः,श्लो.१५–१६,पृ–११५

[175] बृहद्वास्तुमाला, श्लो.२३,पृ–११६

[176] वाल्मीकि रामायण, बालकाण्ड, सर्ग–५.१२

अर्थात् अयोध्यानगरास्य चतुर्दिक् सालवृक्षानां वनमासीत्। तथा तदनुसारम् –

**शाद्वलानि च नीलानि गन्धवन्ति वनानि च।** [१७७]

लङ्कानगरस्य परितोऽपि तरुवनमासीत्। महाभारतेऽपि इन्द्रप्रस्थस्य चतुर्दिक् उद्यानानामुल्लेखो विद्यते। यथा हि –

**उद्यानानि च रम्याणि नगरस्य समन्ततः।**

**आम्रैराम्रातकैर्नीपैरशोकैश्चम्पकैस्तथा।।**

**पुंनागैर्नागपुष्पैश्च लकुचैः पनसैस्तथाः।**

**शालतालकदम्बैश्च बकुलैश्च सकेतकैः।।**

**मनोहरैः पुष्पितैश्च फलभारावनामितैः।**

**प्राचीनमलकैर्लोध्रैरङ्कोलैश्च सुपुष्पितैः।।** [१७८]

कालिदास्य ग्रन्थेषुऽपि नगरस्य बर्हिः नगरजनानाम् अनुरञ्जनार्थं निर्मितानां वाटिकानां वर्णनं प्राप्यते। यथा नगरस्य बर्हिः निर्मित वाटिकायाः विस्तारः अतीव दीर्घमस्ति। तत्र फल-वाटिके शीतलार्थं पाषाणस्फटिकस्य शिलापट्टिकायाः पङ्क्ि युक्त पुष्पोद्यानं, विलासकक्षयुक्ततडागः, वापीकूपौ, स्तम्भाः, जलोद्यानं तथा पक्षीगृहादीनां स्थानानि निर्मीयते। [१७९]

राजवल्लभवास्तुशास्त्रम् इति ग्रन्थे राजवेश्मस्य वामे वा दक्षिणे राज्ञां मनोरञ्जनार्थं वाटिकानिर्माणं कारयेत् इति सूत्रधारमण्डनः कथयति। यथा हि –

---

[177] वाल्मीकि रामायण, सुन्दरकाण्ड, सर्ग–२.६

[178] महाभारत, आदिपर्व, अ.१९९.३९–४१

[179] कालिदास का भारत, अ.१४,पृ–६५

**वामे भागे दक्षिणे वा नृपाणां त्रेधा कार्या वाटिका क्रीडनार्थम्।**

**एक द्वित्रिर्दण्डसंख्या शतं स्यान्मध्ये धारामण्डपं तोययन्त्रैः।।** [१८०]

वाटिकायाः प्रमाणं शतं (१००) दण्डमानेन कनिष्ठ वाटिका भवेत्। द्विशतं (२००) मानेन मध्यमा तथा त्रिशतं (३००) मानेन वाटिका निर्मीयते तदा सा वाटिका उत्तमा वाटिका प्रख्याता। तन्मध्ये धारामण्डपं तोययन्त्रं च अपि स्थापनीयम्।

वाटिकायां जलयन्त्र निर्माण विधानम् –

**क्षेत्रां सप्त विभागा भाजितमतो भद्रं च भागत्रयं**

**तन्मध्ये जलवापिका जिनपदैरेकांशतो वेदिका।**

**स्तम्भैर्द्वादशभिश्च मध्यरचितः कोणेषु कूपान्वितः**

**कर्तव्यो जलयन्त्र एष विधिवत् भोगाय पृथ्वीर्भुजाम्।।** [१८१]

वाटिकायां जनवापिका निर्माण हेतु क्षेत्रस्य सप्त–सप्त विभागाः चतुर्दिक्षु करणीया। तेषां भागत्रये भद्रं निर्मितव्यम्। तन्मध्ये चतुर्विंशति (२४) पदोपरि जलवापिकायाः निर्माणं कारयेद्। तदनन्तरं तन्मध्ये भागैकेन वेदिका स्थाप्या। केन्द्रभागे द्वादश(१२) स्तम्भयुक्तं तोयमण्डपं प्रकल्पयेत्।

अपराजितपृच्छायामपि यथोक्तं वाटिका निर्माण विधानस्य वर्णनं प्राप्यते।

एतादृशो मण्डपयुक्त वाटिका उदयपुरनगरे महाराणा संग्रामसिंह (द्वितीय, १७१०–१७३४ ई.स.) समये निर्मितवान्। सा वाटिका **सहेलियो की बाडी** इति नाम्ना विख्याता अस्ति।

---

[180] राजवल्लभवास्तुशास्त्रम्, (जुगनू), अ.९.१८

[181] राजवल्लभवास्तुशास्त्रम्,(जुगनू), अ.९.१९

**►वाटिकायां वृक्षाः -**

राजवल्लभग्रन्थानुसारं वाटिकायां निम्नदर्शित श्लोके दर्शितानां वृक्षाणां वपनं करणीयम्। यथा हि –

**तस्यां चम्पककुन्दजातिसुमनोवल्लीश्चनिर्वालिका**

**जातीहेमसमानकेतकिरपिश्वेतातथा पाटला।**

**नारिंगःकरणोवसंतलतिकाचारक्तपुष्पादिकं**

**जंबीरोबदरी च पूगमधुपाजंगुश्चचूतंद्रमाः।।**

**मालूरः कदलीच चन्दनवटावश्वत्थपथ्याशिवाः**

**चिंचाशोककदम्बनिम्बतरवः खर्जूरिकादाडिमी।**

**कर्पूरागरुकिंशुकाहयरिंपुः पुन्नागकोनिंबुकी**

**प्रोक्तानागलता च बीजनिभृतास्यात्तिंदुकीलांगुली।।**

**द्राक्षैलाशतपत्रिका च बकुलाधत्तूरकंकोलकौ**

**शालास्तलतमालकौमुनिवरोमंदारपारिद्रुमौ।**

**अन्ये भोग्य विचित्रकाद्यसुफलास्तेरोपणीया बुधैः**

**यः प्राप्नोतिन भूतले शुभतरुंतञ्चंपकान्वापयेत्।।** [१८२]

उद्याने मण्डपघटीयन्त्रश्चापि स्थापनीयम्। राजवल्लभग्रन्थे तेषां निर्माणविधानं च स्थानं सूत्रधारमण्डने दर्शितम्। यथा हि –

**आस्थानं प्रतिसेचनाय च घटीयन्त्रः सुसारो भवेत्**

**दोलः स्त्रीजनखेलनाय रुचीरेवर्षावसन्तोत्सवे।**

---

[182] राजवल्लभः,(नारायणभारती), अ.९.२०–२२

**बालाप्रौढवधूः सुमध्यवननितागानैर्मनोहरारिभिः**

**ग्रीष्मेशारदकेथशीतलजलक्रीडाशुभेमण्डपे।।** [१८३]

अर्थात् वाटिकायां आस्थानमण्डपस्य वनस्पतीनां सेचनार्थं तत्र घटीयन्त्रस्य स्थापना करणीया। सारवृक्षस्य काष्ठेन घटीयन्त्रं निर्मापयेत्। तत्रे स्त्रीणां वसन्तोत्सवे अनुरञ्जनार्थं दोला अपि निर्मापनीया। ग्रीष्मे–शरदि शीतलजकक्रीडा हेतुः मण्डपे जलोद्यानस्य प्रबन्धनमपि प्रकल्पयेत्।

**ग्राह्याग्राह्यवृक्षाः** -

गृहे, देवालये, राजप्रासादे वा उद्याने निरुपिताना: वृक्षाः सूत्रधार मण्डनस्य मतानुसारं निम्नदर्शित लक्षणयुक्ताः अशुभवृक्षाः भवति। यथा हि –

**वृक्षाः क्षीरसकण्टकाश्च फलिनस्त्याज्या गृहाद्दूरतः**

**शस्ते चम्पकपाटले च कदली जाती तथा केतकी।** [१८४]

अर्थात् गृह–देवालयश्च उद्यानसमीपे सदुग्धाः, सकण्टकाः, फलिनः वृक्षाः न रोपयेत्। परन्तु गृहाद्दूरतः रोपयितुं शक्यते। चम्पकः, पाटलः, कदली, जाति(जूई) तथा केतकी इत्यादीनां वृक्षाणां रोपणं प्रशस्तं मन्यन्ते। कारणं उपरोक्त अप्रशस्तवृक्षाणां फलं अशुभं प्राप्यते। यथा हि –

**सदुग्धावृक्षा द्रविणस्य नाशं कुर्वन्ति ते कण्टकिनोऽभीतिम्।**

**प्रजाविनाशं फलिनः समीपे गृहस्य वर्ज्याः कलधौतपुष्पाः।।** [१८५]

---

[183] राजवल्लभः,(नारायणभारती), अ.९.२३

[184] राजवल्लभवास्तुशास्त्रम्,(जुगनू), अ.१.२८

[185] राजवल्लभवास्तुशास्त्रम्,(जुगनू), अ.१.२९

अग्राह्यवृक्षाणां फलं सूत्रधार मण्डनस्य मतानुसारं निम्नदर्शितं वर्तते। यथा –

सदुग्दवृक्षाणां फलं धननाशः, सकण्टकवृक्षाणां फलं शत्रुभयं तथा फलिनवृक्षाणां फलं संततिनाशः भवति। तथा सुवर्णवर्णपुष्पाः अपि गृहसमीपे अशुभं जायते।

बृहत्संहिताग्रन्थेऽपि एतावत् शुभाशुभवृक्षाणां वपन-विषयक वर्णनं वराहमिहिराचार्यः दर्शितः। यथा हि –

**आसन्नाः कण्टकिनो रिपुभयदाः क्षीरिणोऽर्थनाशाय।**

**फलिनः प्रजाक्षयकरा दारुण्यपि वर्जयेदेषाम्।।**

**छिन्द्याद्यदि न तरुस्तान् तदन्तरे पूजितान् वपेदन्यान्।**

**पुन्नागाशोकारिष्टवकुलपनसान् शमीशालौ।।** [१८६]

अर्थात् कण्टकयुक्ता वृक्षाः गृहसमीपे रिपुभयदाः भवेयुः, सदुग्धा वृक्षाः धननाशकाः भवेयुः, फलिनो वृक्षाः सन्ततिहानिकारकाः भवेयुः। सदुग्धानां तथा सकण्टकाणां वृक्षाणां काष्ठमपि गृहनिर्माणे वर्जयेत् इति वराहमिहिराचार्यः निर्देशयति। एतेषां वृक्षाणां काष्ठमपि दोषकारकाः भवति। यदा एते वृक्षाः गृहसमीपे पूर्वां स्यात् तदा तन्मध्ये पुन्नागः, अशोकः, अरिष्टः, बकुलः, पनसः इत्यादीनां पूजितान् वृक्षाणां वपनं करणीयम्। तेन अशुभवृक्षाणां दोषनिवारणं भवति।

**दिग्विभागेन वृक्षारोपण विचारः -**

बृहत्संहितायां दिशानुसारेण वृक्षारोपण विचारः यथा-

**याम्यादिष्वशुभफला जातास्तरवः प्रदक्षिणेनैते।**

**उदगादिषु प्रशस्ताः प्लक्षवटोदुम्बराश्वत्थाः।।** [१८७]

---

[186] बृहत्संहिता,(अच्युतानन्द झा), अ.५३.८६-८७

अर्थात् पूर्वदिशायाम् अश्वत्थवृक्षः अशुभः भवति, दक्षिणदिशायां प्लक्षः शुभः भवति, वारुण्यां वटवृक्षः अशुभः भवति तथा उत्तरदिशायाम् औदुम्बरवृक्षः अप्रशस्तः भवति। परन्तु तासां विपरीत दिशायां ते वृक्षाः प्रशस्ताः भवन्ति। यथा पूर्वदिशायां वटवृक्षः प्रशस्तः भवति, दक्षिणदिशायाम् औदुम्बरः, पश्चिमदिशायाम् अश्वत्थः, उत्तरदिशायां प्लक्षवृक्षः प्रशस्तः भवति। यथोक्तं बृहद्वास्तुमालायामपि –

**सौम्यादेः शुभदौ कपित्थक- वटावौदुम्बराश्वत्थकौ।।**[१८८]

अर्थात् गुहस्योत्तरे कपित्थकः, पूर्वदिशायां वटः, दक्षिणे औदुम्बरः तथा पश्चिमे अश्वत्थवृक्षः शुभदौ मन्यन्ते। गर्गाचार्यः अपि यथोक्तं निर्दिशयति यत् –

**वर्जयेत् पूर्वतोऽश्वत्थं प्लक्षं दक्षिणस्तथा।**

**न्यग्रोधं पश्चिमे भागे उत्तरे चाप्युदुम्बरम्।।**

**अश्वत्थे तु भयं ब्रूयात् प्लक्षे ब्रूयात्पराभवम्।**

**न्यग्रोधे राजतः पीडा नेत्रामयमुदुम्बरे।।**

**वटः पुरस्ताद्धन्यः स्याद्दक्षिणे चाप्युदुम्बरम्।**

**अश्वत्थः पश्चिमे भागे प्लक्षस्तूत्तरतो भवेत्।।**[१८९]

अन्येमाचार्याणां मतानुसारेणापि निम्नदर्शितरुपेण दिग्विभागे वृक्षारोपणं करणीयम्। यथा हि–

---

[187] बृहत्संहिता,(अच्युतानन्द झा), अ.५३.८५

[188] बृहद्वास्तुमाला, (चरणीविचार), श्लो.११,पृ–११३

[189] बृहद्वास्तुमाला, टीप्पणी, पृ–११४

ईशाने धात्री, नैर्ऋत्ये चिञ्चिणी, आग्नेय्यां दाडिमं, वायव्ये बिल्ववृक्षं तथा तन्मध्ये विविध प्रकाराणाम् आम्रवृक्षाणां वपनं करणीयम्। याम्यनैर्ऋत्ययोर्मध्ये जम्बुकदम्बकौ, शम्भुपूर्वयोः मध्ये पनसः आम्रश्च प्रशस्तः। वाटिकायाः बहिः पूर्वे रोपयेद्वंशवृक्षः, सौम्ये शमीः, पश्चिमे खदिरः दक्षिणे बकुलो अरिष्टनाशाय वपयेत्।[१९०]

वाटिकायां प्रथमं वाटिका आम्राणां, द्वितीयाश्वत्थं, तृतीया वटवृक्षाणां च चतुर्थी प्लक्षवाटिका, पञ्चमी निम्बवृक्षाणां, षष्ठी जम्बुकवाटिका, च सप्तमी चिञ्चिणीवृक्षसम्भूता एताः वाटिकाः परिकीर्तिताः। एतासां वाटिकानाञ्च आम्रवाटिका प्रशस्ता मन्यन्ते।[१९१]

**वृक्षारोपणमुहूर्ताः -**

**बृहद्वास्तुमालायाम् –**

**लतागुल्मवृक्षरोपणे हस्तपुष्याश्विनीध्रुवैः।**
**विशाखा-मृग मूलाह्व-वारुणैश्च प्रशस्यते।।**
**गुरौ केन्द्रे शुभे शुक्रे विधौ वारिणि वोदये।**
**शुभयुक्तेक्षिते बन्धो सद्वारे वा शुभोदये।।**[१९२]

यथा हस्त, पुष्य, अश्विनी, रोहिणी, विशाखा, मृगशीर्ष, मूल, शतभिषा, ध्रुव नक्षत्राणि इत्यादीनां नक्षत्राणां तथा गुरौ केन्द्रे, शुक्र शुभस्थाने, चन्द्रः जलराश्यां वा जलचर लग्ने, चतुर्थस्थानं शुभग्रहयुक्तमेवं शुभग्रहाणां दृष्टयां तथा शुभवासरे लता-गुल्म-वृक्षादीनां रोपणं शुभं भवति।

---

[190] बृहद्वास्तुमाला, श्लो.२४-२८,पृ-११६-११७

[191] बृहद्वास्तुमाला, (चरणीविचार), श्लो.२९-३०,पृ-११७

[192] बृहद्वास्तुमाला, श्लो.४२-४३,पृ-११९

बृहस्पतिमतानुसारमपि सोमवारयुते मूलनक्षत्रे च धनलग्ने वृक्षारोपणं शुभं भवति। द्वितीय योगः– गुरुवासरे, रेवती नक्षत्रे जीवलग्ने वृक्षारोपणं कार्यमिति।[१९३]

## १०.नगरे अधिवासः-

### वर्णानुसारमेवं कर्मोपजीविनामावासः -

प्राचीन भारते नगर–निवेशने जन–सन्निवेशनं वास्तुशास्त्रस्य ग्रन्थेषु विस्तृतरुपेण वर्णनं विद्यन्ते। शुक्रनीति, कौटिलीय अर्थशास्त्रं तथा पुराणादिषु अन्यग्रन्थेषु अपि नगरे जनावास सम्बन्धितं वर्णनं प्राप्यते। एतेषु स्पष्टं भवति यत् प्रचीन समये वर्णव्यवस्थायाः, आश्रमव्यवस्थायाः पूर्णतः अनुपालनं भवति स्म। सर्वे जनाः स्व–स्व कर्तव्यं (कर्म) वा दायित्वं सम्यक्रुपेण व्याहरन्ति स्म।

वेदेषु मनुष्याणां कर्मादीनामाधारोपरि ब्राह्मणः, क्षत्रियः, वैश्यः, शूद्रः तथा दस्यु इति पञ्चवर्णाः विभाजिताः विद्यन्ते। एतेषां चतुर्वर्णानाम् आर्यः तथा द्युः अनार्यः इति ज्ञायन्ते।[१९४]

नगरे पृथक्–पृथक् वर्णानामेवमन्यव्यावसायजाविनां सन्यासिनामादीनामावासीय व्यवस्था अपि निश्चितासीत्। एतावत् व्यवस्था तत्कालस्य अनुरुपमेवं सर्वथा योग्यमासीत्। तेन कारणात् समाजः सुसङ्गठितमेवं मानवीयजीवनं सुखप्रदमासीत् एतादृशा जातिवर्णाधिवासः नगरे विप्रः– क्षत्रियः– वैश्यः– शुद्राणामतिरिक्तमन्य विभिन्न व्यवसायोपजीविनां – कर्मोपजीविनामावासीय भवनानां समुचतिं– सम्यक् निवेश–व्यवस्था आसीत्। प्राचीन–भारतस्य–नगरनिवेशव्यवस्थायाः एतत् एकं महत्त्वपूर्णमङ्गमासीत्। तदरिक्तं नगरे राजवेश्मस्य सन्निवेशनार्थं योग्यस्थान निर्धारणमपि महत्त्वपूर्णं विषयः आसीत्।

---

193 बृहद्वास्तुमाला, श्लो.४४,पृ–१२०

194 वैदिक सम्पत्ति, खण्ड–४, पृ–५६२

कौटिलीय अर्थशास्त्रम्[१९५], अपराजितपृच्छा[१९६], शुक्रनीति[१९७] इत्यादिषु ग्रन्थेषु विभिन्न वर्णानां तथा विभिन्न व्यवसायोपजीविनां निवेश–व्यवस्थायाः प्रसङ्गे राजवेश्मस्य सन्निवेशस्य उल्लेखो प्राप्यते तथा राजप्रासादस्य निवेशनं नगरस्य ब्रह्मस्थाने– केन्द्रस्थाने कृत्वा अन्यानामावासानां स्थापना करणीयमिति निर्देशो वर्तन्ते। मयमतम् इति ग्रन्थेऽपि यथोक्तम्–

**ब्रह्मांशादपरांशो यदभिष्टं तत्र नृपवासम्।**[१९८]

परन्तु राजप्रसादनिवेशनं तथा तस्याङ्गानां निर्माणविधानं पृथक्रुपेण समराङ्गणसूत्रधारग्रन्थे राजाभोजेन प्रदत्तम्। अन्य ब्राह्मणादि वर्णानां तथा विविधकर्मोपजीवीनां जनानां च निवेश–व्यवस्था जातिवर्णाधिवासः इति शिर्षकान्तर्गतं चतुष्षष्ठि वास्तुपदमण्डलानुसारं निर्मितव्यमिति वर्णनं वर्तते। वस्तुतः राजाभोजस्य मतानुसारं नगरस्य केन्द्रियभागे राजवेश्मः तथा राजोचित् सर्वप्रकाराणां निवेशः यथा – राजवेश्मः, दूतावासः, राजसेवकानां भवनानि, मन्त्रीनिवासः, सेनापतिआवासः, राजमहिषीनिवासः, अन्तःपुरम्, युवराजावासः, राजपरिवारभवनानि, क्रिडास्थानम्, पुष्पोद्यानम्, जलोद्यानम्, सरोवराः इत्यादीनां स्थापयेत्।

प्राचीन भारतीय नगरनिवेशने सामान्य जनाधिवासस्य सम्बन्धितं भारतीय स्थापत्यग्रन्थेषु तथा अन्यप्राचीनग्रन्थेषु उपलब्ध विभिन्न वर्णानुरुपं तथा निवेश व्यवस्थायां

---

195 कौटिलीय अर्थशास्त्रम्, अधिकरण–२, अ.४,पृ–१११

196 अपराजितपृच्छा, ७२.३२,४८

197 शुक्रनीति, अ.१

198 मयमतम्, अ.१०.७१

स्पष्टं भवति यत् – तत्कालीक नगर निवेशने प्रत्येकनागरिकाणां स्वेच्छानुसारं यत्र–तत्र यथामति दिशायां स्वस्य भवननिर्माणस्य अधिकारः नास्ति। अपितु सवर्णानां कृते भिन्न–भिन्न दिशामुपदिशायां वास्तुपदमण्डलस्य भिन्न–भिन्न देवपदोपरि निवासव्यवस्था कृते स्थानं संरक्षितमासन्। साम्प्रतिकाले प्रत्येकनागरिकाः स्वेच्छानुसारं यथामति कस्यामपि दिशायां स्वस्यानुकूलेन स्वभवनस्य निर्माणं कर्तुं शक्नुवन्ति। प्राचीनकालीक एतावत् सद्व्यवस्थापने स्पष्टं भवति यत् तत्काले प्रथमं वास्तुशास्त्रीय निर्देशानां पालनं भवति स्म तथा द्वितीय नगरे प्रत्येक दृष्टिकोणेन सद्व्यवस्था सुचारुरुपेण भवति स्म।

नगरे विप्रादिवर्णानामेवं विभिन्न कर्मोपजीवीनां सामान्यजनानां निवेश–व्यवस्था सम्बन्धितं स्थापत्यग्रन्थेषु एवं प्राचीन भारतीय ग्रन्थेषु भिन्न–भिन्न प्रकारस्य प्रकाशः

भारतीय वास्तुशास्त्रस्य अनन्यग्रन्थ समराङ्गणसूत्रधारे आवासीय भवन–विभाजनस्य अष्टदिशा–उपदिशायां भिन्न–भिन्न वर्णानां तथा भिन्न–भिन्न व्यावसायिकजनानां तथा अधिकारिवर्गानामावासीय भवनानां स्थापनस्य निर्देशं राजाभोजेन प्रदत्तम्।

**►पूर्वदिशा** -

भोजराजा समराङ्गणसूत्रधारग्रन्थे नगरस्य पूर्वभागः अत्यन्धिक महत्त्वपूर्णं मन्यते। यथा हि –

**पूर्वभागे बलाध्यक्षान् राज्ञो मुख्यांस्तथा बले।** [१९९]

अर्थात् नगरस्य पूर्वभागे प्रशाशकवर्गीयजनानां भवननिवेश हेतुरुत्तमं वर्तते इति प्रतीतम्। अस्मिन् दिशायां निवाासिताः प्रमुखप्रशासकवर्गीयजनाः अर्थात् सेनाध्यक्षः तथा राजप्रमुखः सन्ति। तथा –

---

[199] समराङ्गणसूत्रधार, अ.१०.९६ (जुगनू)

**नगरस्य बहिः प्राच्यां लिङ्गस्थान् विनिवेशयेत्।** [२००]

तदुपरान्त भोजराजा नगरस्य बहि प्राच्यां लिङ्गनिवेशनमपि कार्या इति कथितम्।

कौटिलीय अर्थशास्त्रानुसारं नगरस्य पूर्वदिशायां गन्ध,पुष्पमाला,विभिन्नप्रकारस्य धान्य तथा रसादि विक्रेतानां व्यापारिकानां तथा प्रधानकारवानां गृहाणि तथा क्षत्रियाणां निवासस्थानानि उत्तमं भवेयु: इति आचार्यकौटिल्य: मन्यते। यथा हि –

**गन्धमाल्यधान्यरसपण्या: प्रधानकारव:**

**क्षत्रियाश्च पूर्वां दिशमधिवसेयुः।** [२०१]

अग्निपुराणेऽपि –

**पूर्वतः क्षत्रियान् दक्षे।** [२०२]

चतुर्वर्णेषु विप्रवर्णानां निवेश हेतु अधिकतया ग्रन्थेषु उत्तरदिशा उत्तमं मन्यन्ते। परन्तु अपराजितपृच्छायाम् –

**ब्राह्मणः पूर्ववास्तव्याः।** [२०३] इति दर्शितम्।

शिल्परत्नग्रन्थेऽपि किञ्चित भेद: वर्तते यथा –

**वैश्यानां वणिजां प्राच्याम् .......।** [२०४] इति विद्यते।

**►अग्निकोण (दक्षिण-पूर्व)-**

---

[200] समराङ्गणसूत्रधारः, अ.१०.१०२ (जुगनू)

[201] अर्थशास्त्रम्, अधिकरण-२, अ.४

[202] अग्निपुराणम्, १०६.१२

[203] अपराजितपृच्छा, ७२.४१

[204] शिल्परत्न, अ.५,पृ-२३

राजाभोजस्य मतानुसारं नगरस्य आग्नेयकोणे प्रधानतः अग्निद्वारा जीवीकोपार्जनं कृत्वा जनानामावासस्थानानि कारयेत्। यथा– सुवर्णकारः, लोहकारः, सेनाध्यक्षः, राजमुखी तथा नानासैन्यादीनां तथा अग्निहोत्री, यज्ञशाला इत्यादीनां स्थापना आग्नेयकोणे कार्या। यथा हि –

**सुवर्णकारानाग्नेयां तथा वह्न्युपजिविनः।**

**निवेशयेत् कर्मकारानन्यानपि विधानवित्।।** [२०५]

तदरिक्तम् –

**निवेशयेत् तथाग्नेययां बलं नानाविधं सुधीः।।** [२०६]

चतुरङ्गीणीसेनायाः निवेशनमपि नगरस्य आग्नेयकोणे करणीयम्। अग्निुराणेऽपि यथोक्तं दिशानिर्देशं प्राप्यते। यथा हि –

**आग्नेये स्वर्णकर्मशिन्युरस्य विनिवेशयेत्।**

**...............आग्नेये विविधं बलम्।।** [२०७]

यत्रेऽपि आग्नेयकणे स्वर्णकार–कर्मकारस्य निवासः तथा सैन्य शिबिरानां निर्माणस्य निर्देशः प्रतिपादितमस्ति। कौटिलीय अर्थशास्त्रे कौटिल्यः कथयति यत्–

**पूर्वदक्षिणं भागं महानसं हस्तिशाला कोष्ठागारं च।**

**दक्षिणपूर्वं भागं भण्डागारमक्षपटलं**

**कर्मनिषद्याश्च।।** [२०८]

---

205 समराङ्गणसूत्रधारः, अ.१०.८९ (जुगनू)

206 समराङ्गणसूत्रधारः, अ.१०.९६ (जुगनू)

207 अग्निुराणम्, १०६.६,८

208 अर्थशास्त्रम्, अधिकरण–२,अ.४

दक्षिण–पूर्व दिशायां महानसम्, हस्तिशाला, कोष्ठागार, कुप्यगृहम् तथा आयुधागारादीनां स्थानं शुभं मन्यन्ते।

**►दक्षिणदिशा –**

दक्षिणदिशायां वैश्यजनानां, जुवारिजनानां, चक्रिकानां, नट तथा नर्तकानां गृहस्थापनं कार्या इति। यथा हि –

**वैश्यानामक्षधूर्तानां चक्रिकाणां च दक्षिणे।**

**नटानां नर्त्तकानां च गृहाणि विनिवेशयेत्।।** [२०९]

तथा – **श्रेष्ठिनो दक्षिणाशायां तथा देशमहत्तरान्।**

**याम्येकहारान् कुर्वर्ति ................।।** [२१०]

यथा श्रेष्ठिजनानां भवनानि नगरस्य दक्षिणदिशायां स्थपनीयम्। तथा कहारानपि याम्ये एव स्थापनीयम्। तथा–

**श्मशानानि तथा तत्स्थान् याम्यायां स्थपतिः सुधीः।।** [२११]

इति अपि राजाभोजः दर्शितः।

अग्निपुराणेऽपि समराङ्गणसूत्रधारानुसारमेवम् –

**दक्षिणे नृत्यवृत्तीनां .. ......गृहाणि च।** [२१२]

इति निर्देशं प्राप्यते। कौटिलीय अर्थशास्त्रेऽपि एतवती व्यवस्था दृश्यते यथा हि –

---

209 समराङ्गणसूत्रधारः, अ.१०.९० (जुगनू)

210 समराङ्गणसूत्रधारः, अ.१०.९७ (जुगनू)

211 समराङ्गणसूत्रधारः, अ.१०.१०२ (जुगनू)

212 अग्निपुराणम्, १०६.७

**नगरधान्यव्यावहारिक कार्मान्तिकबलाध्यक्ष......**

**दक्षिणां दिशमधिवसेयुः।**[२१३]

दक्षिणदिशायां नट–वेश्यानामतिरिक्तं नगराध्यक्षः– धनाध्यक्षः– व्यापाराध्यक्षः– यन्त्रागारादीनां निरीक्षकः– सेनाध्यक्षः इत्यादीनां निवासस्थानानि, मदिरा मांषान्नादीनां आपणानां निवेशनमपि तत्रेव दक्षिणदिशायां कारयेत्।

अपराजितपृच्छाग्रन्थानुसारम् –

**........क्षत्रियाश्चेव दक्षिणे।**[२१४] दक्षिणे क्षत्रियाणामपि आवासस्थानानि स्थपनियमिति। तथा –

शिल्परत्नग्रन्थेऽपि –

**.........दक्षिणे गणिकावाटम्।**[२१५]

दक्षिणे गणिका–वेश्यानां निवासगृहाणि स्थापनीयमिति दर्शितम्।

**►दक्षिण–पश्चिम (नैर्ऋत्यकोण)–**

राज्ञः भोजस्य मतानुसारं नैर्ऋत्यकोणे–

**निवेशयेत् सौकरिकान् मे(यी ? षी)कारान् मृगच्छिदः।**

**कैवर्तान् नैर्ऋताशायां दमनाधिकृतांस्तथा।।**[२१६]

---

[213] अर्थशास्त्रम्, अधिकरण–२, अ.४

[214] अपराजितपृच्छा, ७२.४६

[215] शिल्परत्न, अ.५,पृ–२३

[216] समराङ्गणसूत्रधारः, अ.१०.९१ (जुगनू)

यथा नैर्ऋत्यककोणे सौकरिका:-सुकरोपजीवी- मेषीकारा:- मृगच्छिदा:- केवटा: -मस्त्यकारा:- दमनाधिकारी इत्यादीनां आवासस्थापनं दक्षिण-पश्चिमदिशायां (नैर्ऋत्यकोणे) कर्तव्यम्। तेन सह अत्र –

**..........ककुभि निर्ऋत्यैः।**[२१७]

ककुभिजनानां निवासा: अपि नैर्ऋत्यकोणे एव स्थापनीयम्।` आचार्यकौटिल्य: नगरस्य खरोष्ट्रगुप्तिस्थानमेवं खरनामेवमुष्ट्रानां आवासस्थानानि तथा प्रयोगशालानाां निर्माणस्य निर्देशो करोति स्म। यथा हि –

**पश्चिमदक्षिणं भागं खरोष्ट्रगुप्तिस्थानं कर्मगृहं च।**[२१८]

तथा – **दक्षिणपश्चिमभागं कुप्यगृहमायुधागारं च।**[२१९]

नैर्ऋत्यकोणे कुप्यगृहं तथा शस्त्रागार:, सुवर्ण-रौप्यानामतिरिक्तमन्य वस्तूस्थापनस्थानमपि कारयेत्। समराङ्गणसूत्रधार:अर्थशास्त्रद्वयेषु ग्रन्थेषु दक्षिण-पश्चिमदिशायां पशूनामेवं तत्सम्बन्धितं जनानां निवासा: श्रेयस्करो भवति इति मान्यता किञ्चिदंशे समानता दृश्यते।

अग्निपुराणे –

**नटानां चक्रिकादीनां कोवर्तादेश्च नैर्ऋते।**[२२०]

इति दर्शयित्वा नट-चक्रिकादीनां तथा केवर्तादि जनानां निवासहेतु नैर्ऋत्यकोण: शुभं कथितम्। तथा-

---

[217] समराङ्गणसूत्रधार:, अ.१०.९७ (जुगनू)

[218] अर्थशास्त्रम्, अधिकरण-२, अ.४

[219] अर्थशास्त्रम्, अधिकरण-२,अ.४

[220] अग्निपुराणम्, १०६.७

**काण्डारन्नैर्ऋत्ये न्यसेत्।** [२२१]

काण्डारः अर्थात् राजकीय केम्प चालकाः अपि दक्षिण–पश्चिमदिशायां न्यसेत् इति दर्शितम्।

**►पश्चिमदिशा** –

समराङ्गणसूत्रधारग्रन्थे निर्दिष्टमस्ति यत् –

**रथेषु कौशलं येषां येषां स्यादायुधेषु च।**

**वारुण्यां दिशि तान् सर्वान् पुरस्य विनिवेशयेत्।।** [२२२]

तथा– **कोशपालमहामत्रादेशिकान् कारुकानपि।**

**निर्यामकांश्च कुर्वति सलिलाधिपतेर्दिशि।।** [२२३]

रथशस्त्रादीनां निर्माता–कलाज्ञाताः– कोशाध्यक्षाः– महामात्राः– आदेशिकाः– शिल्पयः– कलाकाराः– नियमाकाः इत्यादीनामावासस्थानानि नगरस्य पश्चिमदिशायां स्थापनियानि।

यथोक्तम् अर्थशास्त्रेऽपि तथा अग्निपुराणेऽपि नगरस्य पश्चिमदिशायां विनिवेश सम्बन्धितं दिशानिर्देशो प्राप्यते। तेषु किञ्चित् नियमेषु समानता परिलक्षिता विद्यते।

अर्थशास्त्रानुसारम् –

**उर्णासूत्रवेणुचर्मशास्त्रावरणकारवः शूद्राश्च पश्चिमां दिशमधिवसेयुः।** [२२४]

---

221 अग्निपुराणम्, १०६.१०

222 समराङ्गणसूत्रधारः, अ.१०.९२ (जुगनू)

223 समराङ्गणसूत्रधारः, अ.१०.९८ (जुगनू)

224 अर्थशास्त्रम्, अधिकरण–२, अ.४

पश्चिमदिशा उर्णासूत्रं- वंशकार- चर्मकारः- शस्त्रनिर्माता- शूद्रजनादीनां निवासहेतु उपयुक्तमस्ति। एतावत् अग्निपुराणेऽपि वर्णनं प्राप्यते। यथा हि –

**रथानामायुधानां च कृपाणानां च वारुणे।**

**पश्चिमे च महामात्यान्कोषपालांश्च कारुकान्।।** [२२५]

पश्चिमदिशायां रथ-शस्त्रादीनां चालकानामेवं महामात्य- कोषपलः- शिल्पिनां भवनानां निवेशनानां निर्देशो विद्यते।

शिल्परत्नग्रन्थानुसारमपि –

**सूनानां पश्चिमे गृहम्। रजकानां तु पश्चिमे।** [२२६]

यथा पश्चिमदिशायां मांषविक्रेतानामेवं रजकानां निवासाः स्थापनीयाः।

**►उत्तर-पश्चिमदिशा (वायव्यकोण)-**

राजाभोजस्य मतानुसारम् –

**कर्मस्वधिकृता ये च ये चापि परिकर्मिणः।**

**शौण्डिका ये च तान् सर्वान् वायोर्दिशि निवेशयेत्।।** [२२७]

विभिन्न कार्योपजीविनां, भृत्यादिजनानां सुराविक्रेताणां, शौण्डिकानां निवासव्यवस्था वायव्यकोणे कार्या। तेन सह वायुकोणे ककुभि- कुर्वीत- दण्डनाथः- सनायकाः इत्यादीनामावासस्थानानि अपि निर्मितानि इति राजा भोजः निर्देशयति। यथा हि –

**वायोः ककुभि कुर्वित दण्डनाथान् सनायकान्।** [२२८]

---

[225] अग्निपुराणम्, १०६.११

[226] शिल्परत्न, अ.५,पृ-२३-२४

[227] समराङ्गणसूत्रधारः, अ.१०.९३ (जुगनू)

कौटिल्यः अपि कथयति यत् –

**पश्चिमोत्तरं भागं यानरथशालाः**

**उत्तरपश्चिमं भागं पण्यभैषज्यगृहम्।।** [२२९]

नगरस्य वायव्यकोणे आचार्यकौटिल्यस्य मतानुसारं यानशालायाः तथा रथशालायाः निवेशनं कार्यम् इति। तदतिरिक्तं वायव्यकोणे पण्यभैषज्यगृहाणि अपि निर्मितव्यानि।

शिल्परत्नग्रन्थे ग्रन्थकारः –

**जालिकानां तु वायव्ये। वायव्ये कारुकादीनाम्।** [२३०]

इति जालिकादीनामेवं कारुकादीनां गृहविधानं प्रतिपादयति स्म।

**►उत्तरदिशा –**

**यतिनामाश्रयान् ब्रह्मवत्सानां च तथा सभाम्।**

**प्रपाश्च पुण्यशालाश्च कुर्याद् दिशि धनेशितुः।।** [२३१]

सन्यासिकुटीर– ब्रह्मज्ञानिसभा– प्रपा– धर्मशाला– सभागृहं– पुण्यशालादीनां निर्माणं नगरस्य उत्तरदिशायां करणीयम्। तदरिक्तं सौम्यदिशायाम् –

**विप्राः सौम्या दिशो भागे ...........।** [२३२]

---

[228] समराङ्गणसूत्रधारः, अ.१०.९९ (जुगनू)

[229] अर्थशास्त्रम्, अधिकरण–२, अ.४

[230] शिल्परत्न, अ.५,पृ–२३–२४

[231] समराङ्गणसूत्रधारः, अ.१०.९४ (जुगनू)

[232] समराङ्गणसूत्रधारः, अ.१०.१०० (जुगनू)

तथा – **पुरोहित ज्योतिषकानुत्तरस्यां निवेशयेत्।** [२३३]

इति अपि राजा भोजः निर्देशति। एतत् प्रकारेण उत्तरदिशायां आध्यत्मिकजनानां निवासव्यवस्थायाः आयोजनं विद्यते।

कौटिलीय अर्थशास्त्रानुसारम् –

**नगरराजदेवतालोहमणिकारवो ब्राह्मणाश्चोत्तरां दिशिमधिवसेयुः।** [२३४]

नगरस्य उत्तरे नगरदेवता– राजदेवता– कुलदेवतायाः आयतानि स्थापनियम्। तथा लोहकारः– मणिकारः– ब्राह्मणानां निवासस्थानानि निर्मितानि। तदुपरान्त कौटिल्यः –

**उत्तरः पूर्वो वा श्मशानवाटः।** [२३५] इति दर्शितम्। तथा शिल्परत्नग्रन्थे ग्रन्थकारः दर्शयति यत् नगरस्य सौम्ये पुष्पोद्यानं तैलविक्रेतृणां गृहाणि निर्मितानि। यथा हि –

**उत्तरे पुष्पवाटिका।, तैलविक्रयिणां सौम्ये।** [२३६]

अग्निपुराणानुसारं नगरे –

**ब्राह्मणा यतयः पुण्यवन्तश्चोत्तरे।** [२३७] स्थापनियानि इति विद्यते।

तथैव अपराजितपृच्छाग्रन्थेऽपि यथा हि –

**प्रशस्ताश्चोत्तरे शूद्राः।** [२३८] तथा **निवेश्याश्चोत्तरे शूद्राः।** [२३९]

---

233 अर्थशास्त्रम्, अधिकरण–२, अ.४

234 अर्थशास्त्रम्, अधिकरण–२, अ.४

235 अर्थशास्त्रम्, अधिकरण–२, अ.४

236 शिल्परत्न, अ.५,पृ–२३–२४

237 अग्निपुराणम्, १०६.९

238 अपराजितपृच्छा, ७२.४१

यथा नगरस्य उत्तरदिशायां शुद्रजनानां गृहाणि निर्मितानि इति।

**▶ उत्तर-पूर्व (इशानकोण)-**

समराङ्गणसूत्रधारग्रन्थानुसारं नगरस्य उत्तर-पूर्वदिशायां केवलं द्वौ प्रकाराणां व्यवसायजीवीनां निवास कृते आरक्षणमस्ति। राजाभोजस्य मतानुसारं पूर्वोत्तरदिशायाम् –

**घृतविक्रयिणो ये च फलविक्रयिणश्च ये।**

**निवेशिताः प्रशस्यन्ते पुरस्येशानदिग्गताः।।**[२४०]

नगरस्य इशानकोणे घृतविक्रेतृणां तथा फलविक्रेतृणां गृहनिवेशं प्रशस्तं भवति। आचार्यकौटिल्यस्य मतानुसारम् –

**उत्तरपूर्वं भागं कोशो गवाश्वं च।**[२४१]

नगरस्य पूर्वोत्तरदिशायां कोशालयः, अश्वशाला तथा गोशालायाः निर्माणं करणीयम्। अग्निपुराणेऽपि यथोक्तं नगरस्य पूर्वोत्तरभागं फलादिविक्रेता वणिजानामावासहेतु श्रेयस्करं मन्यते। यथा हि –

**फलाद्यादि विक्रियिण ईशाने च वणिग्जनाः।**[२४२]

---

239 अपराजितपृच्छा, ७२.४६

240 समराङ्गणसूत्रधारः, अ.१०.९५ (पुष्पेन्द्र)

241 अर्थशास्त्रम्, अधिकरण-२, अ.४

242 अग्निपुराणम्, १०६.९

समराङ्गणसूत्रधारग्रन्थस्य रचयिता राजाभोजः जातिवर्णाधिवासान्तर्गतं विशेष दिशानिर्देशो प्रदत्तम्। यथा वैश्यजनानां, वैद्यानां तथा विशेषतः सेनायाश्च निवेशनं नगरे, ग्रामे, खेटे इत्यादयेषु सर्वतोदिशायामुद्दिष्टो विभागे आवश्यरुपेण स्थापनीयमिति निर्देशितम्। यथा हि –

**निधेया वणिजो वैद्या मुख्याश्चापि चतुर्दिशम्।**

**चतुर्दिशं विशेषेण स्थापयित बलानि च।।**[२४३]

**सर्वतोदिशमुद्दिष्टो विभागो नगरे यथा।**

**तथा ग्रामेषु खेटेषु सेनायाश्च निवेशने।।**[२४४]

ग्रन्थकारराज्ञःभोजस्य सम्भवतः वैश्यजनाः अर्थात् व्यापारिकवर्गः। व्यापारिकाः मानवानां प्रतिदिनस्य व्यावहारिकजीवने उपयुक्ताः भवन्ति। प्रतिदिनं उपयुक्त वस्तूनां क्रय–विक्रयस्य कृते व्यापारिकाः उपयोगिनः भवन्ति। यदा व्यापारिकाः नगरस्य सर्वदिक् वसेयुः तदा नगरजनानां कृते प्रतिदिनमुपयुक्तं वस्तूनां प्राप्तिः सरलतया भविष्यति इति प्रतितिर्भवति। एतादृशीनां नगरस्य चतुर्दिक् वैद्यानां निवासे नगरजनाः स्वस्य अस्वास्थस्य समये सुलभतया वैद्यानां सम्पर्कमपि कर्तुं शक्नुवन्ति इति आशयः। यथोक्तं नगरस्य सर्वदिक्षु सेनायाः निवेशने नागरिकानां सुरक्षा सम्यक्रुपेण भविष्यति इति कारणात् नगरस्य सर्वदिक्षु वैश्यजनानां, वैद्यानां तथा सेनायाः निवेशनमावश्यकरुपेण कार्यमिति राज्ञःभोजस्य मन्तव्यमस्ति।

अग्निपुराणेऽपि उपरोक्तकारणात् यथोक्तं नगरस्य चतुर्दिक् वैद्यानामेवं सेनायाः स्थापना करणीया इति दर्शितम्। यथा हि –

**दिक्षु वैद्यान् ..........बलानि च चतुर्दिशम्।**[२४५]

---

[243] समराङ्गणसूत्रधारः, अ.१०.१०१ (पुष्पेन्द्र)

[244] समराङ्गणसूत्रधारः, अ.१०.१०३ (पुष्पेन्द्र)

अन्येषु ग्रन्थेषु अपि एतादृशे नगरे जातिवर्णाधिवासस्य व्यवस्थायाः समर्थनं विद्यते।

मृच्छकटिकम् ग्रन्थे **नगररक्षिन्**[२४६] इति शब्दः दृश्यते। एषः शब्दः तत्कालिक नगर-रक्षकानां कृते प्रयुक्तः। नगर-रक्षकाः निशाकाले अधिककाल पर्यन्तं नगरस्य मार्गोपरि सञ्चरणं कृत्वा नगरस्य सुरक्षां कुर्वन्ति स्म। यथा हि –

**राजमार्गो हि शून्योऽयं रक्षिणः सञ्चरन्ति च।**[२४७]

अन्यग्रन्थानामनुशीलने विदितं भवति यत् नगरे आवासीयव्यवस्थायाः अन्तर्गतं ब्राह्मणादि वर्णानां तथा विभिन्न व्यवसायोपजीवि - जानानामेवम् - अधिकारिवर्गस्य जनानामावासीय व्यवस्थायां मन्त्रिणां भवनानि राजप्रासादस्य समीपे स्थाप्या इति वर्णितम्। समराङ्गणसूत्रधारग्रन्थे सेनाध्यक्षस्य भवनस्य स्थापना राजप्रासादस्य समीपस्थ करणीयम्। अन्याधिकारिणां यथा राजप्रमुखः, महामन्त्री, आदेशिकाः, नियामकाश्च इत्यादीनां निवेश-व्यवस्था राजप्रासादस्य दुरमुयुक्तं मन्यते। राजवेश्मसमीपस्थ स्वर्णकारः- वैश्याः-सौकरिकाः- रथकाराः- भृत्यः- सन्यासिजानाः- घृतविक्रेताः इत्यादीनां निवासव्यवस्था करणीयमिति राज्ञः भोजः मन्यते। उपर्युक्त विभिन्न राजकीयाधिकारिणां निवासः राजवेश्मसमीपस्थ न स्थापनीयमिति सम्भवतः तेषां कार्ये कदाचिताशङ्का भविष्यति इति कारणात् राजप्रासादस्य समीपे न स्थापनीयमिति।

युक्तिकल्पतरुग्रन्थेऽपि एतद्विषयक उल्लेखो प्राप्यते। यथा हि –

---

[245] अग्निपुराणम्, १०६.१२

[246] मृच्छकटिकम्, अङ्क-९

[247] मृच्छकटिकम्, अङ्क-१

**मन्त्रिणो भवनान्तिके।** [248]

मन्त्रिणां निवासस्थानं राजप्रासादस्य दूरं स्थाप्यं तथा द्वयोः मन्त्रिणोः आवासस्थानानि समीपस्थे न कार्याणि कारणं द्वौ मन्त्रीणां परस्परं प्रतिवेशी भवन्ति तथा एतौ राज्ञस्य विरुद्धं षड्यन्त्रं कारयिष्यन्ति। यथा हि –

**मन्त्रिणः प्रतिवेशित्वं कदाचिदपि नाचरेत्।**

**तयोर्हि प्रतिवेशित्वे दुर्म्मन्त्रोऽपि जायते।।** [249]

तदतिरिक्तं विशिष्ट पदाधिकारिणां भवनानि नगरस्य एकस्मिन् भागे भवेत् तदा एतेषां राज्ञस्य विरुद्धं सङ्गठनमपि कर्तुं शक्नुवन्ति। यथा हि –

**नियोगिनां स्थितिं कुर्य्यान्नगरे चान्तरेऽन्तरा।**

**नियोगि-मन्त्रणिोर्दृष्टिः कार्य्यध्वंसाय कल्पते।।** [250]

**मन्त्रणिोऽदूरवसतिः कर्म्म कुर्य्यान्न सत्वरम्।।** [251]

यथा समराङ्गणसूत्रधारग्रन्थानुसारं ब्राह्मणादि चतुर्वर्णानां तथा भिन्न-भिन्न व्यावसायिक-कर्मोपजीवीनामेवं राजकीयाधिकारिणां भवनानां विन्यासं नगरस्य कस्मिन् भागे करणियमिति निम्नदर्शित कोष्टकरुपेण स्पष्टी क्रियते –

---

[248] युक्तिकल्पतरु, नगरयुक्ति, पृ-३४

[249] युक्तिकल्पतरु, नगरयुक्ति, १६१

[250] युक्तिकल्पतरु, नगरयुक्ति, १६२

[251] युक्तिकल्पतरु, नगरयुक्ति, १६३

| ईशाना | पूर्वा | आग्नेया |
|---|---|---|
| फलविक्रेता घृतविक्रेता | क्षत्रिय, राजप्रमुखा:, सेनाध्यक्षभवनम् | चतुरङ्गिणी सेना, अग्न्युपजीवी, लोहकार:, स्वर्णकार:। |
| ब्राह्मण:, ज्योतिषी, पुरोहित:, धर्मशाला, पेयजलम्, ब्रह्मज्ञानीनां सभाभवनम्, सन्यासीकुटीरम्। | ब्रह्मस्थानम् | वैश्य, द्युतक्रिडक:, चक्रिक:, नट:, नर्तक:, व्यापारिका:, स्मशान। |
| भृत्यादि, सुराविक्रेता, दण्डनाथ:। | रथनिर्माता, अस्त्रशस्त्रनिर्माता, कोषाध्यक्ष:, महामन्त्री, आदेशिक:, कलाकार:, शिल्पी, नियामक:, शुद्रजना:। | सौकारिक:, नैषीकार:, आखेटका:, मत्स्यजीवी, दमनाधिकारी, याम्येकहार:। |
| नैऋत्या | पश्चिमा | वायव्या |

## ११. नगरे देवप्रासादस्थापनम् –

अध्यात्मः, धर्मः, आस्था च अस्माकं भारतीय संस्कृत्याः प्राणः अस्ति। एतेषां सर्वेषां केन्द्रः ईश्वरः अस्ति। अतः प्रत्येकेषु नगरेषु, ग्रामेषु ईश्वरस्य आलयः अनिवार्योऽस्ति। यथा नगरे, ग्रामे देवालयस्य निर्माणं कथं करणीयं, कस्य देवानां मन्दिरं कस्मिन् दिशायामुपदिशायां, कस्मिन् दिशाभिमुखं निर्मितव्यमित्यादि विधानं पश्यामो।

समराङ्गणसूत्रधारग्रन्थे राजाभोजः नगरस्य अन्तः तथा बाह्य भिन्न–भिन्न देवानां भिन्न–भिन्न दिशायां मन्दिराणि निर्मितानि इति निर्देशयति। यथा हि

**स्थाप्यन्ते ये यथा देवा नगरे सर्वतोदिशम्।**

**बाह्यान्तरासु भूमिषु ब्रूमहे तानतः परम्।।** [२५२]

सूत्रधारमण्डनस्य राजवल्लभग्रन्थानुसारम् –

**पूर्वापरास्याः पुरसम्मुखाश्च देवाः शुभा नोत्तरदक्षिणाश्च।**

भङ्ग पुरस्यापि पराङ्मुखास्ते कुर्वन्ति घातार्कजनादेनेशाः।। [२५३]

अतः देवानां मुखानि पूर्व–पश्चिम दिशायोः वा नगरस्य सम्मुखो शुभो भवन्ति। नोत्तरदक्षिणामुखाः शुभाः भवन्ति। यदा ब्रह्मा, विष्णुः, सूर्यः एवं शिवः पृष्ठभागः नगरस्य दिशि भवेत् तदा तन्नगरस्य विनाशो भवति।

ज्ञानप्रकाशदीपार्णवग्रन्थे भगवन् विश्वकर्मणः चतुर्दिक्षु देवानां मुख सम्बन्धितं दर्शनं कारयति। एतत् निम्नदर्शित कोष्टकरूपेण स्पष्टी क्रियते –

(१) पूर्वाभिमुखदेवाः –ब्रह्मा, विष्णुः, शिवः, बाणलिङ्गम्, राजलिङ्गम्, मुखलिङ्गम्, सूर्यः, इन्द्र;, कार्तिकेयः, जिनः।

(२) आग्नेयाभिमुखदेवाः – अग्नि, आग्नेयकोणस्य दिक्पालः।

---

[252] समराङ्गणसूत्रधारः(पुष्पेन्द्र), अ.१०.१०७

[253] राजवल्लभवास्तुशास्त्रम्(जुगनू), अ.४.१२

(३) दक्षिणाभिमुखदेवाः – नागेशः, क्षेत्रपालः, निऋति, भैरवः, अघोरशिवः, लिनः, भृङ्गराजः, कुबेरः, गान्धर्वः, ग्रहाः, मातृका, नकुलीशः, नागः, चण्डीशः, हनुमान, यमः, वैतालः, पितृगणाः, यक्षः, असुरः, राक्षसः, भूतः, प्रेतः, पिशाचः एवमन्य क्षुद्रजाति देव–देव्यानां निवेशनं स्थाप्यम्।

(४) नैर्ऋत्याभिमुखदेवाः – निर्ऋति, क्षेत्रपालाः, भैरवः, हनुमान च।

(५) पश्चिमाभिमुखदेवाः – ब्रह्मा, विष्णुः, सूर्यः, इन्द्रः, स्कन्दः, अग्नि, वरुणदेव;, द्विजराजः, रैवतः, जिनः।

(६) वायव्याभिमुखदेवाः – वायुदेवः– दिक्पालः।

(७) उत्तराभिमुखदेवाः – कुबेरः, शिवलिङ्गम्, ब्रह्मा, जिनः, गणेशः, विष्णोः दशावतारः।

(८) ईशानाभिमुखदेवाः – ईशः– दिक्पालः।

(९) चतुर्दिशाभिमुखदेवाः – शिवलिङ्गम्, ब्रह्मा, जिनः, यज्ञमण्डपः, होमशाला।[२५४]

**नगरे बर्हिर्देवतायतनम् –**

राज्ञःभोजस्य मतानुसारं नगरस्य बर्हिः चतुर्दिशं समारभ्य नगरस्य प्राकारपरिखान्ततः शतं, सार्धशतं वा द्विशतं च मानेन देवतानां स्व–स्व प्रासादः स्वस्य परिवारदेवतानां देवतायतनयुक्तं नगराभिमुखं स्थाप्यम्। यथा हि –

**चतुर्दिशं समारभ्य प्राकारपरिखान्ततः।**
**बर्हिः शते शते सार्धे धनुषां द्विशतेऽपि च।।**[२५५]

---

[254] ज्ञानप्रकाशदीपार्णव, अ.७.१–१७

[255] समराङ्गणसूत्रधारः(पूष्पेन्द्र), अ.१०.१०८

तत्र सर्वेषु प्रासादेषु चित्र–विचित्र वनोद्यानमपि निर्मितव्यम्। देवप्रासादस्य निवेशने नगरस्य पूर्वदिशायाः मन्दिरस्य मुखं पश्चिमदिशायां, नगरस्य पश्चिमदिशायाः मन्दिरस्य मुखं प्राच्यां, सौम्यदिशायाः मन्दिरस्य मुखं पूर्वदिशायां तथा याम्यायाः मन्दिरस्य मुखं वारुण्यां स्थापनीयमिति भोजराजस्य मतम्। यथा हि –

**प्राच्यां प्रत्यङ्गमुखान् कुर्यात् प्राङ्गमुखांश्चाम्बुभृदिशि।**

**याम्योदक्पार्श्वयोस्तस्य प्रादक्षिण्येन वंशगान्।।**

**दक्षिणस्यां न कुवर्ति त्रिदशानप्युदङ्मुखान्।** [२५६]

यथोक्तम् अपराजितपृच्छायामपि निर्देशः प्राप्यते। यथा –

**नोत्तराभिमुखाः कार्या न देवा दक्षिणामुखाः।**

**पूर्वापरामुखाः कार्या वास्तुशास्त्रेषु गीयते।।** [२५७]

अर्थशास्त्रऽपि आचार्यकौटिल्यः नगरस्य परिखायाः बर्हिः यथोचित् स्थानेषु देवतानां निवेशनं कार्या इति निर्देशयति। यथा हि –

**बहिः परिखायाः ...........यथादिशं च दिग्देवताः।** [२५८]

नगरनिवेशने यन्नगरे स्व–स्व दिशायां देवतानां निवेशनं भवेत् तदा तन्नगरे सर्वप्रकारस्य समृद्धिः– ऐश्वर्यादि सर्वसुखाना चिरकाल पर्यन्तं नगरजनाः उपभोगं कुर्वन्ति। यथा हि –

**निवेश्यन्ते स्वदिग्भागेष्वेवं यस्मिन् सुरोत्तमाः।**

**सम्यक्समृद्धिमासाद्य चिरं नन्दति तत्पुरम्।।** [२५९]

---

256 समराङ्गणसूत्रधारः(पूष्पेन्द्र), अ.१०.११२

257 अपराजितपृच्छा, ७२.१७

258 अर्थशास्त्रम् , अधिकरण–२,अ.४

259 समराङ्गणसूत्रधारः(पुष्पेन्द्र), अ.१०.१२३

**नगरस्य आभ्यन्तर देवतायतनम् –**

समराङ्गणसूत्रधारग्रन्थानुसारं नगरस्य बहिः यद् देवतायतनस्य स्थापनं क्रियते तथैव नियमानुसारं नगरस्य अन्तः अपि सर्वदेवतानां स्वस्य दिशायां धामन्नां स्थापनीयम्। यथा हि –

**विधानं यद् यथा प्रोक्तं सुरधाम्नां पुराद् बहिः।**
**तत् तथाभ्यन्तरेऽपि स्यात् कार्यं स्वस्वदिगाश्रयम्।।**[२६०]

विश्वकर्माचार्यस्य मतानुसारं नगरस्य मध्यभागे देवालयानां स्थापनं करणीयमिति। यथा हि –

**देवानां वास्तुभूमिस्तु प्रायो दैर्ध्यान्विता मता।**
**पुरस्य मध्यभागे तु चतुरश्रापि सा मता।।**[२६१]

अतः प्रायशो देवालयनिर्माणाय वास्तुभूमिः तावत् दैर्ध्यान्वितैव प्रशस्तमिति मन्यते। सर्वेषु ग्रामेषु नगरेषु वास्तुमध्यभागे चतुरश्रप्रमाणेन भूमिः स्वीकरणे तत्रे दोषो न विद्यते इति।

नगरस्य आभ्यन्तरे नगरस्य मध्यभागे ब्रह्मा, इन्द्रः, बलरामः एवं कृष्णः एतेषां मन्दिरं स्थाप्यम् इति। यथा हि –

**मध्ये पुरस्य कर्तव्यं गृहमम्भाजजन्मनः।**
**निवेशनं तथेन्द्रस्य तथैव हलिकृष्णयोः।।**[२६२]

एवमेव नगरस्य अन्तः अन्यस्थानेषु मातरः, यक्षः, गणाधीशः च रुद्रादि देवानां वेश्मभिः विना अपि नगरस्य चत्वरेषु, मार्गेषु प्रतिष्ठितं कर्तुं शक्यते। यथा हि –

**मातृयक्षगणाधीशान् शिवकान् भूतसङ्घकान्।**

---

[260] समराङ्गणसूत्रधारः(पुष्पेन्द्र), अ.१०.१२९

[261] विश्वकर्मवास्तुशास्त्रम्, अ.११.१–२

[262] समराङ्गणसूत्रधारः(पूष्पेन्द्र), अ.१०.१३०

**विनापि वेश्मभिः कुर्यात् पुरे चत्वरमार्गगान्।।** [२६३]

आचार्यकौटिल्यः अपि स्वरचित अर्थशास्त्रे नगरस्य मध्ये दुर्गा, विष्णु, जयन्त, इन्द्रः, शिवः, वरुणः अश्विनकुमारौ, लक्ष्मीमदिरा आदि देवतानां स्थापनायाः उल्लेखं करोति। यथा हि –

**अपराजिताप्रतिहतजयन्तवैजयन्तकोष्ठाकान**

**शिववैश्रवणाश्विनश्रीमदिरागृहं च पुरमध्ये कारयेत्।** [२६४]

विश्वकर्मवास्तुशास्त्रग्रन्थेऽपि नगरस्य मध्ये लक्ष्म्यादि देवीनां मन्दिराणि स्थापनीयानि इति निर्देशो प्राप्यते। यथा हि –

**मध्ये लक्ष्म्यादिदेवीनां मन्दिरं कारयेद्बुधः।** [२६५]

शिल्परत्नग्रन्थे न केवलं ग्रामेषु, नगरेषु अपितु तीर्थस्थलेषु, नदीतटेषु, वनोपवनेषु, समुद्रतटेषु, नदीनां सङ्गमेषु, पर्वतोपरि, गिरिपार्श्वे, उद्यानेषु एवं भवनेषु तथा अन्य मनोरमस्थलेषु देवतायतनस्य निवेशनस्य निर्देशं प्राप्यते। यथा हि –

**तीर्थान्ते तटिनीतटे जलनिधेस्तीरे सरित्सङ्गमे,**

**शैलाग्रऽद्रितटे वनपवनयोरुद्यानदेशे तथा।**

**सिद्धाद्यायतनेषु वा गुरुवरो ग्रामे पुर पत्तने**

**वान्यत्रापि मनोरमे सुरसमिज्जायै क्षितिं कल्पयेत्।।** [२६६]

---

263 समराङ्गणसूत्रधारः(पूष्पेन्द्र), अ.१०.१३१

264 अर्थशास्त्रम्, अधिकरण–२, अ.४

265 विश्वकर्मवास्तुशास्त्रम्, अ.९.९४

266 शिल्परत्न, ९.१

## १२. राजप्रासादनिर्माणविधानम् –

राजधानीनगरे राजवेश्मनिर्माणमनिवार्यमस्ति। यत्र राजा निवसति तन्नगरं राजधानी इति परिकीर्तितम्। यथा राजधानीनगरे राज्ञः तथा राजसम्बन्धितमन्य भवनानां निवेशनमनिवार्यरुपेण स्थापयेत्।

राजवल्लभग्रन्थानुसारम् –

**ग्रामेवाथपुरेनरेन्द्रभवनंतत्षोडशांशंभवैत्**

**मध्यात्पश्चिमदिकसमाश्रितमिदंदुर्गेभवेत्भूवशात्।।**

**द्वारद्दक्षिणवामतश्चपुरतःकार्यास्त्रयश्चत्वराः**

**सर्वंवास्तुगृहादिवासरचनाभूपेच्छयाकारयेत्।।** [२६७]

अर्थात् ग्रामस्य वा नगरस्य भूमिप्रमाणस्य षोडशांशेन राजप्रासादस्य प्रमाणं गृहीत्वा राजप्रासादस्य निर्माणं नगरस्य मध्यात् पश्चिमदिशायां दुर्गसमाश्रितं करणीयम्। राजवेश्मस्य दक्षिणवामतश्च पुरतः त्रयश्चत्वराः कार्या। अन्य सर्ववास्तुगृहादिवासरचना नृपेच्छया स्थापयेत्।

विश्वकर्मवास्तुशास्त्रम् इति ग्रन्थेऽपि राजनिवेशस्थाननिर्देशम् आचार्यविश्वकर्मणः निर्दिशयति। यथा हि –

**शुभदा चतुरश्रा भूर्भूमिपानां विशेषतः।**

**पुरस्य मध्यभागे वा निर्दिष्टे वा स्थलोत्तमे।।**

**भूपहर्म्यं प्रकर्तव्यं तल्लक्षणमनोहरम्।** [२६८]

---

[267] राजवल्लभः(नारायणभारती), अ.४.३६

[268] विश्वकर्मवास्तुशास्त्रम्, अ.१२.१-२

विविधनगरेषु चतुरस्रा वास्तुभूमिरेव भूपालभवनादिनिर्माणाय स्वीकरणीयम्। इति विजयादि सम्पत्तिप्रदायका भवति। क्वचित् दैर्घ्यान्विता भूरपि भवति चेत् दोषो न विद्यते। तत्फलं मध्यमः। नगरस्य मध्यभागस्थितां भूमिं स्वीकृत्य तत्र राजभवनं मनोहरं–सुन्दरं–अलङ्कृतं निर्मितव्यम्।

राजनिवेशानन्तर्गतं यद्यपि राजवेश्म, सभा, न्यायालयः, गजशाला, अश्वशाला, गोशाला, चित्रशाला, विद्याशाला आदि विविधानि अङ्गानि राजभवन–सन्निवेशे चिन्तनीयमस्ति। प्राचीन भारतीय नगर–निवेश पद्धत्यां एतानि सर्वाणि अङ्गानि नगरस्य पुरकाङ्गरुपेण प्रकल्पितमस्ति। अतः एतस्मिनअध्याये राजवेश्मसभादि कतिपयातिविशिष्ट निवेशाङ्गानां महत्त्वपूर्ण सिद्धान्तानां विवेचनं क्रियते।

**►राजप्रासादः –**

प्राचीनकालिक नगरनिवेशनेषु **राजवेश्म** वा **राजप्रासादः** नगरस्य अत्यन्तं महत्त्वपूर्णमङ्गमासीत्। अतः तन्निमार्णे विशेषचिन्तनं क्रियते, ध्यांन ददाति स्म। राजप्रसादः समस्त नगरस्य केन्द्रमासीत्। प्राचीन ग्रन्थेषु राजवेश्मस्य राजप्रासादः, राजगृहम्, राजभवनम्, राजगेहम्, राजनिकेतनम्, राजहर्म्यम्, भूहर्म्यम्, भूपभवनम्, नरेन्द्रालयमित्यादि अनेकानि नामानि उपलब्धानि। अनेके शब्दाः उपलब्धाः सन्ति। राजप्रासादस्य सन्निवेश–हेतु नगरे सर्वप्रथमं भू–परिग्रहं क्रियतेस्म। अनन्तरं सुरक्षा तथा शासनादि विभिन्न सुविधा–दृष्ट्या नगरस्य मध्यभागोपयुक्तं मन्यते स्म।

हरिवंशपुराणे अपि नगरनिर्माणार्थं उन्नतस्थलस्य परिग्रहणं क्रियते स्म तथा प्रवेश समीपे नन्दनवनसदृशं वनसंयोजनमपि क्रियते स्म। विश्वकर्मीयशिल्पशास्त्रज्ञ शिल्पयः तत्र राज्ञस्य इच्छानुसारं नानाप्रकारस्य शिल्पकर्माणां प्रयोगः कुर्वन्ति स्म।

अश्वघोषः विरचितं सौन्दरानन्देऽपि यथोक्त राजप्रासादानां विवरणं प्राप्यते। यथा हि –

**सरिद्विस्तीर्णपरिखं स्पष्टाञ्चितमहापथं शैलकल्पमहावप्रं गिरिव्रजमिवापरम्।**

**पाण्डुराट्टालसुमुखं सुविभक्तान्तरापणं हर्म्यमाला परिक्षितम्।** [२६९]

समराङ्गणसूत्रधारग्रन्थे राजप्रासादस्य सन्निवेशसम्बन्धितं प्रदत्तम् –

**कृते पुरनिवेशऽथ चतुःषष्टिपदाश्रये।**

**नियुक्तपरिखासालगोपुराट्टालकेऽपि च।।**

**विभक्तेरथ्ये परितः प्रविभाजितचत्वरे।**

**क्रमादन्तर्बहिः क्लृप्तदेवतायतनस्थितौ।।** [२७०]

राज्ञभोजस्य निर्देशानुसारं चतुःषष्टि (६४) वास्तुपदमण्डलाधारे नगरस्य विविधाङ्गोपाङ्गानां यथा वप्र, परिखा, प्राकार, गोपुरम्, अट्टालकः इत्यादीनां निर्माणं कृत्वा अनन्तरं मार्गव्यवस्था, प्रतोली, चत्वरः आदीनां निर्माणं कार्यम्। तत्पश्चात् क्रमशः नगरस्य अन्तस्थ तथा बाह्यदेवतानां स्थापनं करणीयम्।

राजवेश्म पूर्वोत्तरप्लवने वा पूर्वे उन्नतप्रदेशे मैत्रदेवपदे वा यथावर्णाक्रमायातं चतुरश्रं समं शुभभूमौ नगरस्य मध्यभूभागे वा अन्य उन्नतस्थले राजप्रासादः निर्मितव्यम्। यथा हि –

**प्रागुदक्प्रवणे देशे प्राग्द्वाराभ्युन्नतेऽथवा।**

**यशः श्रीविजयधायि मैत्रं पदमधिष्ठितम्।।**

**पुरमध्यादपरतोदिक्स्थं कुर्यान्नृपालयम्।।** [२७१]

परन्तु दुर्गनिवेशने –

---

[269] सौन्दरानन्द, १.४२–४३

[270] समराङ्गणसूत्रधारः(जुगनू), अ.१५.१–२

[271] समराङ्गणसूत्रधारः(जुगनू), अ.१५.३–४

**दुर्गेषु भूवशात् कार्यं यद्वा दिक्ष्वपरास्वपि।**

**विवस्वद्भूधरार्यम्णां कार्यमन्यतमे पदे।।** [२७२]

दुर्गनिवेसने सुविधानुसारं भूवशात् विवस्वान- पृथ्वीधर वा अर्यमापदे अपि राजप्रासादस्य स्थापना कर्तुं शक्यते।

कौटिलीय अर्थशास्त्रेऽपि यथोक्तम् -

**वास्तुक प्रशस्ते देशे .........।**

**............. मध्ये वासगृहम्।।** [२७३]

तदुपरान्त अपराजितपृच्छा[२७४], शिल्परत्न[२७५] तथा शुक्रनीति[२७६] आदि ग्रन्थेषु राजप्रासादस्य सन्निवेश-हेतुः नगरस्य मध्यभागः वा अन्य उत्तम-स्थलस्य प्रशस्तं दर्शितम्।

अपराजितपृच्छायां नगरस्य निवेश्यभूम्यां वास्तुपदमण्डलस्य विभिन्नदेवपदेषु विभाजितं कृत्वा पश्चिमदिशायां मैत्रपदोपरि राजप्रासादः-देवप्रासादः निर्मापनीयम्। यथा हि -

**देववेश्मराजवेश्म मैत्रपदे समाश्रितम्।।** [२७७]

विश्वकर्मवास्तुशास्त्रेऽपि मैत्रपदे प्रहरण-निवेशः मध्यभागे राजवेश्म स्थापनस्य निर्देशः प्राप्यते। यथोक्तम् -

---

272 समराङ्गणसूत्रधारः(जुगनू), अ.१५.५

273 कौटिलीय अर्थशास्त्रम्, अधिकरण-१, अ.१९

274 अपराजितपृच्छा, अ.७२

275 शिल्परत्न, अ.५

276 शुक्रनीति, अ.५

277 अपराजितपृच्छा, ७६.१

**मित्रभागे प्रहरनस्थानमुक्तं मनीश्वरैः।** [२७८]

**मध्यभागे राजवेश्म नवसौधतलावधि।** [२७९]

परन्तु समराङ्गणसूत्रधारग्रन्थे राजवेश्म–निवेशनम् –

**विमुञ्चेद् ब्रह्मणः स्थानमिन्द्रध्वजयुतं नृणाम्।।**

**तत्राशुभानि वेश्मानि निवेशाश्चासुखावहाः।** [२८०]

अर्थात् राजप्रासादस्य निवेशनं इन्द्रध्वजयुक्त ब्रह्मणस्य पदे न कर्तव्यम्। तत्र कस्यापि भवन–गृह–वेश्मादीनां निर्माणं त्याज्यमस्ति। तत्र निर्मितं भवनमशुभं भवति।

मानसारग्रन्थेऽपि राजवेश्मनिर्माणसम्बन्धितं वर्णनं प्रााप्यते। मानऋषिमतानुसारं चक्रवर्ती,अधिराजः, नरेन्द्रः, पाष्णिकादि राज्ञां राजप्रासादानां स्थापना इन्द्रः– वरुणः– अर्यमा–विवस्वान्– भूधरः– कुबेरः– रुद्रः– रुद्रजयः इत्यादीनां भिन्न–भिन्न देव–पदोपरि कर्तव्या इति उल्लेखो दृश्यते। मानसारग्रन्थे विभाजितराज्ञामधिकारोपरि राजप्रासादानां निर्माणं वास्तुपदमण्डलस्य भिन्न–भिन्न देवपदेषु करणीयमिति निर्देशः दृश्यते।[२८१] तथा राजहर्म्यस्य द्वारस्थापनविषये –

**सर्वेषां मूलहर्म्यानां पूर्वद्वारं प्रकल्पयेत्।** [२८२]

आचार्य पाणिनि नगरे राजप्रासादस्य निवेश्यभूमिं **प्रासादीयाभूमिः** इति संज्ञां प्रदत्तम्। यथा हि –

---

278 विश्वकर्मवास्तुशास्त्रम्, अ.१२.९

279 विश्वकर्मवास्तुशास्त्रम्, अ.१२.१०

280 समराङ्गणसूत्रधारः(जुगनू), अ.१५.४७

281 मानसार,अ.४०

282 मानसार,अ.४०.४५

**प्रासादोऽस्यां भूमौ स्यादिति।** [२८३]

अर्थशास्त्रे आचार्यकौटिल्यानुसारं राजप्रासादस्य निवेशनार्थं परिगृहीतभूम्या: विस्तार: नगरविस्तारस्य **नवभागे ..... कारयेत्।** [२८४] इति।

राजप्रासादस्य सन्निवेशपूर्वेण सन्निवेशसम्बन्धितं कश्चित कार्याणां चिन्तनं क्रियते स्म। तेषां प्रयुक्तानां विविधानां वस्तूनां सङ्कलनं कुर्वन्ति स्म। यथा– वनेषु काष्ठ: आनयित्वा तेहां सङ्ग्रहणं करणीयम् इत्यादि। समराङ्गणसूत्रधारग्रन्थे वनप्रवेश: नामक: अध्याय: पृथक् रुपेण वर्तते। तत्रे गृह–निवेशने उपयोगहेतु वृक्षाणां परीक्षणं कृत्वा तेषामानयनार्थं वैज्ञानिकमेवं पारिभाषिकं पद्धत्यानामुल्लेखो वर्तन्ते। [२८५] राजप्रासादस्य निर्माणकार्यस्य दायित्वं वास्तुविद्याविशेषज्ञशिल्पिनां सन्ति। राजवेश्मादि भवनेषु सौन्दर्य–अलङ्करणकार्यस्य तथा तत्कालीक सुविकसितकलाया: प्रदर्शनमपि तत् वास्तुविशारदस्य दायित्वमस्ति।

समराङ्गणसूत्रधारग्रन्थे वर्णित त्रयेषु नगरेषु राजप्रासादस्य निर्माणसम्बन्धितं वर्णनं प्राप्यते। यथा हि –

**ज्येष्ठे पुरे विधातव्यं ज्येष्ठं राजनिवेशनम्।**

**मध्यमे मध्यमं कार्यं कनिष्ठं च कनियसि।।** [२८६]

अर्थात् ज्येष्ठनगरे ज्येष्ठ राजप्रासाद:, मध्यमनगरे मध्यमराजनिवेश: तथा कनिष्ठनगरे कनिष्ठराजवेश्म: निर्मितव्यमिति। तस्य प्रमाणमपि राजा भोज: प्रदत्तम्। यथा –

---

283 पाणिनिकालीन भारतवर्ष, पृ–१४३

284 अर्थशास्त्रम्, अधिकरण–२,अ.४

285 समराङ्गणसूत्रधार:(जुगनू), अ.१६

286 समराङ्गणसूत्रधार:(जुगनू), अ.१५.७

**त्रिचत्वारिशंता युक्ते ज्येष्ठं स्याद् द्वे धनुःशते।**

**मध्यं शतं द्वाषष्टिः शतं साष्टकमन्तिमम्।।** [२८७]

राजप्रासादस्य प्रमाणम् – ज्येष्ठराजप्रासादस्य विस्तारः – २४३ धनुषः

मध्यमराजवेश्मस्य विस्तारः – १६२ धनुषः

कनिष्ठराजप्रासादस्य विस्तारः – १०८ धनुषः ग्रहणीयम्।

मयमतम् इति ग्रन्थेऽपि राजप्रासादप्रमाणविषयकं मयऋषिः दर्शितम्। राजवेश्म प्रमाणं दण्डमानेन कार्यम्। राजवेश्मस्य विस्तारः शत्चतुश्चत्वारिशंत् (१४४) दण्डतः संवर्द्धयेत्तु अष्टविशंतिशतम् (१२८) दण्डैः कर्तव्यम्। वेश्मव्यासं द्वात्रिशंत् (३२) दण्डान्तं स्थपयेत्। एतत् प्रकारेण द्वात्रिशंत्दण्डादात् प्रारभ्य राजप्रासादस्य द्वात्रिशंत् ज्येष्ठाज्येष्ठ प्रमाणं नगरादीनां विस्तारप्रमाणानुसारं प्राप्यते। [२८८] तथा–

**इष्टव्यासायामं प्रागेवालं विचिन्त्य कर्तव्यम्।**

**तस्माद्धीनं यत्तन्निष्पन्नं वास्तु येन केनापि।।**

**अशुभमवनीपतेस्तत् सततं विपदां पदं भवति।**

**पौराणां यद्वस्तु वर्धितुमिच्छेद् बहिस्ततस्तस्मात्।।**

**प्रागुत्तरदिशि वृद्धिः शस्ता परितस्तु वा न्याय्या।** [२८९]

एतेन स्पष्टं भवति यत् राजप्रासादस्य इष्टव्यासायामं विचिन्त्य तस्य निर्माणं कार्यम्। येन केनापि तस्माद् हीनं यत् निष्पन्नं जातम् तदा राज्ञं कृते अशुभं तथा सततं विपदास्पदं

---

287 समराङ्गणसूत्रधारः(जुगनू), अ.१५.६

288 मयमतम्, अ.२९.१–९

289 मयमतम्, अ.२९.१०–१२

भवति। यदा यद्वास्तु वर्धितुमिच्छेद तदा तस्मात् बर्हिः प्रागुत्तरदिशि वा प्रासादं परितो चतुर्दिक् वृद्धिः शस्ता भवति।

विश्वकर्मवास्तुशास्त्रम् इति ग्रन्थेऽपि राजप्रासादस्य निर्माणविषयक वर्णने –

**चूलीहर्म्यसमायुक्तं पक्षिशालाभिरन्वितम्।**

**पञ्चाशतदण्डमानादि दण्डपञ्चशतावधि।।**

**प्रमाणमिह निर्दिष्टं भूमिपालस्य मन्दिरे।**

**अथवा भागमानेनकायेन्नृपमन्दिरम्।।** [२९०]

भूपालभवनास्य विस्तारः पञ्चाशत्दण्डकमारभ्य पञ्चशतीदण्डकावधिकं तस्मात्प्राकारसदृशं विद्वांशोमुनिभिर्निर्दिष्टम्। तथा दैर्घ्यप्रमाणं तु तदपेक्षया द्विगुणितं कार्यम्। इत्थं वास्तुप्रणेतृणां मतानुसारं राजभवनस्य प्रमाणं स्वीकरणीयम्। अथवा क्वचित्तु ग्रामनगरादिनिर्माणाय यावत्संख्याकप्रमाणमङ्गीकृत्वा तां तु भवनं द्वादशभागात्मिकामष्टभागात्मिकां वा विभज्य तत्रैक भागोपरि तादृशं भूपालभवनं स्थापयेत्।

समराङ्गणसूत्रधारग्रन्थे राजनिवेशस्य विविधानि अङ्गानि परिकल्पितानि दृश्यते – (१) शासनोपयिकः (२) आवासोपयिकः तथा (३) विलास–भवनम्।

(१) शासनोपयिकः -

शासनोपयिकः अर्थात् राजधानी तथा अन्य शासन–सञ्चालने उपयुक्तं राजनिवेशः।

(२) आवासोपयिकः–

290 विश्वकर्मवास्तुशास्त्रम्, अ.१२.३–४

आवासोपयिकः अर्थात् राजमहिषी, अन्य राज्ञी, राजकुमार, युवराज, राजमन्त्री, सेनापति, राजपुरोहित, अमात्य आदीनां निवासहेतु वेश्मनां निवेशनम्।

(३) विलास–भवनम् –

राजवेश्मनां विभाजनं वर्गद्वयमस्ति। निवास–भवनं तथा विलास–भवनम्ः। निवास–भवनान्तर्गतं राज्ञानां निवासार्थं पृथ्वी– जय– विभूषणम्– मुक्तकोण– सर्वतोभद्र– शत्रुमर्दनमादि प्रकाराणां राजप्रासादाः सन्ति।[२९१]

राजप्रासादस्य निमार्णं राजाभोजस्य मतानुसारम् –

**एकाशीत्या पदैर्भाक्तिं विधेयं नृपमन्दिरम्।**[२९२] निवेशनीयम्।

तथा राज्ञःभोजस्य निर्देशानुसारम् –

**वास्तौ विभक्ते पुरवत् क्लृप्तेऽमरपदव्रजैः।।**

**तत्र मैत्रपदस्थाने निवेशायावनीपतेः।**[२९३]

अर्थात् नगरवत् राजवेश्मनस्याङ्गानां निवेश्य भूम्याः एकाशीतिवास्तुपदमण्डलाधारेण वास्तुदेवपदानां विभक्तिर्विन्यासः प्रप्रथमं कृत्वा पश्चिमदिशायां मैत्रपदोपरि राजनिवेशस्य निवेशनं करणीयम्। अथवा –

**श्रीवृक्षं सर्वतोभद्रं मुक्तकोणमथापरम्।**

**यमिच्छेन्नृपतिः कुर्यात् प्रासादं शुभलक्षणम्।।**[२९४]

---

291 समराङ्गणसूत्रधारः(जुगनू), अ.३०

292 समराङ्गणसूत्रधारः(जुगनू), अ–१५.९

293 समराङ्गणसूत्रधारः(जुगनू), अ.१५.१५–१६

294 समराङ्गणसूत्रधारः(जुगनू), अ.१५.११७

यस्मिन् इच्छेन्नृपतिः श्रीवृक्षं– सर्वतोभद्रं– मुक्तकोणं वा यथापरं कोऽपि एकः शुभलक्षणयुक्तः राजप्रासादस्य निवेशं कुर्यात् इति राजा भोजः मन्यते।

मानसारग्रन्थेऽपि राजवेश्मनां विभाजनं चक्रवर्तीमहाराजः– नरेन्द्रादीनां कृते तेषां परिमाणाधारेण नववर्गेषु मानमुनिः विभाजनं कृतम्।[२९५]

विलासभवनानान्तर्गतं विलासार्थं समराङ्गणसूत्रधारग्रन्थे विभिन्नप्रासादानां वर्णनं प्राप्यते। यथा हि –

**क्षोणीविभूषणं त्वाद्यं पृथिवीतिलकं परम्।**

**प्रतापवर्धनं चान्यच्छ्रीनिवासं ततोऽपि च।।**

**लक्ष्मीविलाससंज्ञं च पञ्चमं परिकीर्तितम्।**[२९६]

अर्थात् क्षोणीविभूषणम, पृथ्वीतिलकः, प्रतापवर्धनम्, श्रीनिवासः तथा लक्ष्मीविलासः इत्यादि संज्ञकानि राजवेश्मानि परिकीर्तितानि। तथा –

**एतानि पञ्चदशराजनिवेशनानि पृथ्वीजयप्रभृति यानि निरुपतितानि।**[२९७]

एतावत् समराङ्गणसूत्रधारग्रन्थे राजा भोजः पञ्चदश राजप्रासादाः निरुपिताः।

अपराजितपृच्छाग्रन्थेऽपि यथोक्तं षड्भेदानां प्रासादानामुल्लेखो प्राप्यते। यथा हि–

**माडश्च मौडः शुद्धश्च शिखरं च चतुर्थकम्।**

**तुङ्गारः सिंहकश्चेव षड्भेदा राजवेश्मनाम्।।**[२९८]

---

[295] मानसारः, अ.४०

[296] समराङ्गणसूत्रधारः(पूष्पेनद्र), अ–३०.१६९

[297] समराङ्गणसूत्रधारः(पूष्पेनद्र), अ.३०.१४०

[298] अपराजितपृच्छा, ६०.३०

**►राजनिवेशाङ्गानि –**

प्राक्काले राजभवनस्य सन्निवेशस्य प्रारम्भे दुर्गनिर्माणं भवति स्म। तस्य प्रमुखम् उद्देश्यं राजभवनाङ्गानां सुरक्षा एवं व्यवस्था आसीत्। राजनिवेशाङ्गानि यथा– महाद्वारं– गोपुरं– पक्षद्वारं– वप्र– परिखा– प्राकार– अट्टालक– इत्यादीनां निवेशनविधानं समराङ्गणसूत्रधारग्रन्थे राजनिवेशाध्याये प्राप्यते।[२९९] कालन्तरे राजेश्वर्य तथा राजभोगः एवं राजशासनादीनां विकासः जातः तदा तेषामन्तर्गतं स्वतः निवेशाङ्गानां वृद्धिः अभवत्। शास्त्रीय दृष्ट्या राजसन्निवेशे प्रप्रथमं स्थानावासीय भवनानां सन्ति। तत्पश्चात् विलासभवनानां स्थानमागच्छन्ति।

पुनः तेषामनिवार्योपकर–भवनानि यथा– सभा– गजशाला– अश्वशाला–आयतन अर्थात् राजानुजीविनां राजपत्नी– मन्त्री– सेनापति– प्रतीहार– पुरोहित– सामन्तादीनां निवास–स्थानं राजभवनात् न्यूनमानेन रचनीयम्। अत्र समराङ्गणसूत्रधारग्रन्थे प्राप्त नृपवासप्रासादस्य विभिन्न निवेशाङ्गानां नामोल्लेखो निम्नदर्शितमस्ति –

(१) राजगृह–निवासः

(२) धर्माधिकरण–स्थानम्

(३) कोष्ठागारः

(४) पशु–पक्षी–भवनम्

(५) महानसम्

(६) आस्थानमण्डपम् (सभाजनाश्रयः)

(७) भोजनशाला

(८) वाद्यशाला

---

[299] समराङ्गणसूत्रधारः(जुगनु), अ.१५

(९) वन्दि–मागध–वेश्म

(१०) चर्मायुधशाला।

(११) स्वर्णरजतकर्मकारनिवेशः

(१२) गुप्तकोष्ठागारः

(१३) सङ्गीत–प्रेक्षागृहम्

(१४) रथशाला

(१५) गजशाला

(१६) वापी

(१७) अन्तःपुरम्

(१८) राजकुमारी–भवनम्

(१९) क्रिडालयः

(२०) भूपाल– अन्तःपुरम्

(२१) अवस्करभवनम् (जलपात्रस्थानम्)

(२२) वजमहिषी–भवनम्

(२३) राजपत्नी–भवनम्

(२४) अरिष्टागारः

(२५) अशोकवाटिका

(२६) स्नानगृहम्

(२७) धारागृहम्

(२८) लतामण्डपयुक्तं लतागृहम्

(२९) दारुशैल,दारुगिरि

( ३० ) पुष्पवीथ्या

( ३१ ) पुष्पवेश्म

( ३२ ) यन्त्रकर्मान्तभवनम्

( ३३ ) वापी एवं पेयगृहम्

( ३४ ) अन्यकोष्ठागार:

( ३५ ) आयुधमन्दिरम्

( ३६ ) भाण्डागारम्

( ३७ ) उलोखलभवनम् तथा शिलायन्त्र भवनम्

( ३८ ) दारुकर्मान्त भवनम्

( ३९ ) भेषजमन्दिरम्

( ४० ) नागस्थानम्

( ४१ ) व्यायामशाला

( ४२ ) नाट्यशाला

( ४३ ) चित्रशाला

( ४४ ) क्षीरगृहं– गौशाला

( ४५ ) पुरोहितसदनम्

( ४६ ) अभिषेचनकस्थानम्

( ४७ ) दानस्थानम्

( ४८ ) अध्ययनभवनम्

( ४९ ) शान्तिस्थानम्

( ५० ) चामरवेश्म

(५१) छत्रधाम

(५२) मन्त्रवेश्म

(५३) अश्वशाला

(५४) राजकुमारसदनम्

(५५) राजकुमार–विद्याधिगम–शाला

(५६) युवराजभवनम्

(५७) राजमाताभवनम्

(५८) शिबिकागृहम्

(५९) शयनगृहम्

(६०) आसन– सिंहासन–गृहम्

(६१) राजहस्तिशाला

(६२) गजाभिषेचनकस्थानम्

(६३) कमल–पक्षीयुक्त सरोवरः

(६४) राजपितृव्य–स्थानम्

(६५) राजमातुल–स्थानम्

(६६) सामन्तभवनम्

(६७) देवकुलभवनम्

(६८) ज्योतिर्विद्– भवनम्

(६९) सेनापतिप्रासादः

(७०) शस्त्रकर्मान्त–शस्त्रभवनम्

(७१) सभाभवनम्।[300]

विश्वकर्मवास्तुशास्त्रम् इति ग्रन्थेऽपि राजनिवेशाङ्गानां विधानं विस्तृतरुपेण वर्तते। यथा हि –

**मेषे वा वह्निभागे वा मन्त्रिहर्म्यं प्रकल्पयेत्।**

**आकाशे वाऽथ पवने सेनानाथस्य मन्दिरम्।।**

**प्रासादभित्तिमभितो बहिर्वा तच्च कल्पयेत्।**

**पुरोहितादिनिलयैस्सहितं वा विशेषतः।।**

**द्वितियावरणे वाऽपि तृतीयावरणेऽपि वा।**[301]

भूपभवनवास्तुभूमौ मेषभागे वा वह्निभागे सचिवहर्म्यम्, अकाशपदेऽथवा वायुभागे सेनापतिहर्म्यश्च राजप्रासादभित्तेरन्त:स्थले वा बहि:भागे वा द्वितीयादिप्राकारान्तरे वा योग्यस्थले पुरोहितयामरक्षका: राजकीयात्पबन्धुसुह्यदादिनिलयसहितं स्थापयेत्।

भूधरभागे वा रुद्रस्थाने न्यायशालाम्, ईशाने राजकीयकुलदेवतालयम्, सावित्रपदे कोशमन्दिरम्, मित्रभागे आयुधागारम्, वास्तुभूमध्यभागे अर्थात् ब्रह्मस्थाने पूर्वोक्तनृपनवसौधतल मनोहरं भूपभवननिर्माणश्च प्रकल्पनीय:।[302] तथा–

**सोमे वा दन्तके भागे भोजनागारमीरितम्।**

**विशालमापभागे वा कल्पयेच्छिल्पकर्मवित्।।**

**किन्नरे भास्करे वाथ विहारस्थलमिष्यते।**

---

300 समराङ्गणसूत्रधार:(जुगनू), अ.१५.१८–४९

301 विश्वकर्मवास्तुशास्त्रम्, अ.१२.६–८

302 विश्वकर्मवास्तुशास्त्रम्, अ.१२.८–१०

**तत्रैवोद्यानभूमिञ्च निर्दिशेत्तुष्टिहेतवे।।**

**गान्धर्वे वारणस्थानं पुष्पके वाजिमन्दिरम्।**

**भृङ्गराजकभागे च भिषक्शालादयो मताः।।** [३०३]

कुत्रात्र राजवास्तुभूमौ सोमभागे वा दन्तके वा भोजनालयं मध्यहर्म्येण मिलितं वा वियुक्तं वा कृत्वा पट्टमहिष्यादीनामन्तःपुरश्च कारयेत्। अपि चात्र किन्नरस्थाने विहारस्थलं प्रमोदवर्धकं कारयित्वा तत्रैव भागान्तरे कुन्दचम्पकादिलतापुष्पनिवहैः तथा फलवृक्षैश्च पूरितमिद्यानश्च स्थापयेत्। गन्धर्वभागे जगस्थानं, पुष्पदेवभागे वाजिबन्धनस्थानं च भृङ्गराजपदे भिषग्वाद्यकारलेखावाहकयामरक्षकादीनां राजसेवकानामालयादीश्च रचयेत्।

अत्र गजाश्वशालानिर्माणे तु भूपालसम्पन्महिमादिस्फूर्तये राज्यलक्ष्मी विवृद्धये च कतिपयानामेवोत्तमवारणामुत्तमवाजनिाश्च स्थानमुक्तं न तु तेषां संख्येयानां सततवासस्थानात्मिका शाला कर्तव्येति चिद्वानां शिल्पविदां मतम्।

अत्र आचार्यविश्वकर्मणः विविधक्रियाशैलीनां वर्णनमपि प्रदत्तम्। यथा हि –

**पाञ्चाली मागधी चान्या शौरसेनी च वाङ्गिकी।**

**कोशली चापि कालिङ्गी द्राविडीति क्रियाकला।।**

**प्रसिद्धा शिल्पकार्येषु कल्पनाशतशोभिनी।** [३०४]

एवमत्र राजवेश्मनिवेशने पाञ्चाल्यादिक्रियाशैल्याः प्रसिद्धाः। तादृशी क्रियाशैली तावत् स्वकीय कल्पनादि प्रभावेन सर्वेष्वपि लोकेषु प्रसिद्धमासीत्। तेषु सप्तविधा मुख्या कीर्तिता। यथा –

---

[303] विश्वकर्मवास्तुशास्त्रम्, अ.१२.१४–१६

[304] विश्वकर्मवास्तुशास्त्रम्, अ.१२.१२–१३

(१) पाञ्चालीशैली

(२) मागधीशैली

(३) शौरशैली

(४) वाङ्गीशैली

(५) कोशलीशैली

(६) कालिङ्गीशैली

(७) द्राविडीशैली।

**देशभेदेन भूपालः स्वेच्छया तां समाश्रयेत्।** [३०५]

अथापि भूपालेच्छया यया कयापि वा शैल्या भवनादिनिर्माण कृते पूर्वनिर्दिष्ट मानभागस्थानादिषु न कोऽपि भेदः, परन्तु कल्पनाविशेषेष्वित्यादिक शिल्पकार्यज्ञैरीत्या कारयेत्। अर्थात् स्वस्वदेशीय शिल्पयः प्राप्त्यादिवशादयमेव रचनाकार्यः कुर्वन्ति स्म। अथापि सार्वभौमादयो महाधनिकाः स्वेच्छया वा जनतुष्टये वा एकत्रैव बहुविधशैल्युपेत भवनादि रचनां कारयेयुः इत्यर्थोऽपि **स्वेच्छया तां समाश्रयेत्** इति प्रतीयते।

अपराजितपृच्छायामपि राजवेश्मनिवेशानन्तर्गतं निवेश्य विविधाङ्गानां सूचीः प्राप्तं भवति।

मानसारग्रन्थेऽपि राजनिवेशाङ्गानां विधानं प्राप्यते। परन्तु तत्रे निवेश्याङ्गानां संख्या द्वाचत्वारिंशत् प्रदत्तमस्ति।

समराङ्गणसूत्रधारग्रन्थानुसारं कस्यापि राजनिवेशने आवास–निवेशने तथा शासन–निवेशने निवेश–क्रमे भिन्नतां प्रतीतं भवति। कोऽपि स्मारकराजभवने आवास–शासन

---

305 विश्वकर्मवास्तुशास्त्रम्, अ.१२.१३

द्वयोर्संस्थानां संमिश्रणं दृश्यते।  राजस्थानप्रदेशे अनेकानि राजभवनानि एतादृशानि परम्परायाः पुष्टिं कुर्वन्ति। संस्कृतकाव्य कादम्बरी तथा हर्षचरितादि काव्येषु अपि राजभवनानां द्विविधा (आवास–शासन) निवेश प्रक्रियायाः अवलम्बनं दृश्यते, वास्तुशास्त्रीय दृष्ट्या अन्तःशालाबहिःशालारुपेण परिकल्पितं शक्यते। मुगलानां राजभवने अपि एतादृशी परम्परा वर्तते। तत्रे निवेशित दीवान–ए–आम  दीवान–ए–खास एतत् अन्तःशालाबर्हिशालायोः अनुगामी आसीत्।

राजा भोजः स्वरचितसमराङ्गणसूत्रधारग्रन्थे राजनिवेशान्तर्गतं वर्णित भिन्न–भिन्न उपकरणेषु सभा, अश्वशाला, गजशालादीनां उल्लेखं विशेषरुपेण प्रतिपादयति। एषः ग्रन्थे एतेषामुपकरणानां निर्माणविधानवर्णनं पृथक्–पृथक् अध्याये उपलब्धमस्ति।

राजप्रासादस्य उपर्युक्त विभिन्नाङ्गानामुल्लेखने स्पष्टं भवति यत् राजनिवेशने कक्ष्या–श्रेणी निवेशनं प्रमुखमङ्गमासीत्। यथा –

**स कक्ष्या धन्विभिगुप्तास्तिस्त्रोऽतिक्रम्य वाजिभिः।**

**पदातिपरे कक्ष्ये द्वे जगाम नरोत्तमः**

**स सर्वाः समतिक्रम्य कक्ष्या दशरथात्मजः।**

**संनिवर्त्य जनं शुद्धान्तः पुरमत्यागात्।।**[३०६]

रामायणे दशरथस्तथा रामस्य राजप्रासादस्य वर्णनं तथा महाभारतेऽपि एतादृशी परम्परा विद्यते। अर्थात् कक्ष्या–निवेश शास्त्रमेवं कला द्वयोर्दृष्ट्या राजप्रासादस्य प्रमुखं वैशिष्ट्यमासीत्। मध्यकालः एवमुत्तरकालिकःराजप्रासादेषु कक्ष्यायाः सन्निवेशनं सर्वप्रमुखाङ्गरुपेण दृश्यते।

---

[306] वाल्मीकि रामायणम्, अयोध्याकाण्ड, सर्ग–१७.२०–२१

निवासभवनेऽपि कक्ष्यायाः महत्त्वमस्ति। सम्राटः हर्षस्य राजप्रासादे चत्वारि कक्ष्यानि आसन्। एतानि कक्ष्यानि बहुविशालानि आसन्।[३०७]

सौन्दरानन्दे नन्द–प्रासादस्य कक्ष्याः अतिविशाला दर्शितमस्ति।

यथा हि –

**प्रासादसंस्थो भगवन्तमन्तः प्रवष्टिमश्रौषमनुग्रहाय।**

**अतस्सत्वरावानहमभ्युपेतो गृहस्यकक्ष्यामहतोऽभ्यसूयन्।।**[३०८]

यथा भगवन्तः बुद्धः द्वारोपरि स्थितः तदा नन्दः तेषां मेलनार्थमनुग्रहाय राजवेश्मतः बहिरार्गच्छति स्म तदा शीघ्र बहिर्न आगन्तुं शक्नोति स्म तदा सः कक्ष्यायाः महद्विशालयायाः असूयन् –तिरस्कारं प्रदर्शयति स्म इति।

इति संक्षेपेण नृपप्रासाद–प्रासादाङ्गानां लक्षण–विधानस्य वर्णनमस्ति।

**►सभाभवनम्**

सभाभवनं वास्तोः प्राचीनतमं संस्थानमस्ति। वैदिकवाङ्मये तथा विशेषरुपेण रामायणमेवं महाभारते अनेकस्थानोपरि तेषामुल्लेखमेवं वर्णनं प्राप्यते। डॉ.डी.एन. शुक्लानुसारम् अथर्ववेदे (१९.५५.६), तैतिरीयसंहिता (३.४.८.६), तेतिरीयब्राह्मण (१.१.१०.३) तथा छान्दोग्योपनिषदे (८.१४) नैक – स्तम्भ–युक्त सभायाः वर्णनं प्राप्यते।[३०९]

महाभारते एकं पर्व सभा–पर्व इति नाम्ना ग्रथितमस्ति। तत्रे यमसभा, इन्द्रसभा, वरुणसभा, कुबेरसभा, ब्रह्मसभादीनां प्रकीर्तनं दृश्यते। एतेषां सभाभवनानां विशेषता

---

307 प्राचीन भारत मे नगर तथा नगर–जीवन, पृ–२६९

308 सौन्दरानन्द, सर्ग.६.८

309 वास्तुशास्त्र, भा.१, हिन्दू सायन्स ऑफ आर्किटेक्चर, पृ–३६७

प्राचीनकालादारभ्य वर्तमानकाल पर्यन्तं स्तम्भ–बहुल–वास्तु वैशिष्ट्यानां कारणात् प्रख्यातमस्ति।

समराङ्गणसूत्रधारग्रन्थे राजाभोजेन अष्ट प्रकारानां सभा–भवनानां समुल्लेखं प्रदत्तम्। यथा हि –

**नन्दा भद्रा जया पूर्णा सभा स्याद्भाविता तथा ।**

**दक्षा च प्रवरा तद्वद् विदुरा चाष्टमी मता।।** [३१०]

अर्थात् नन्दा, भद्रा, जया, पूर्णा, भावित। दक्षरा, प्रवरा, च विदुरा इति अष्टविधा सभायाः उल्लेखं वर्तते। एतेषां प्रथम पञ्च नन्दा, भद्रा, जया, पूर्णा, भाविता सभायाः निर्माणे षट्त्रिशंत् (३६) स्तम्भानां निवेशनस्य निर्देशनमपि राजाभोजः दत्तम्। यथा हि–

**स्तम्भान् षट्त्रिंशदेतासु पञ्चस्वपि निवेशयत्।** [३११]

अन्य दक्षा, प्रवरा, विदुरा च सभा स्तम्भरहिता स्थापनीयम् तथा दक्षानाम्नी सभायाः परितो तृतीयालिन्द वेष्टिता, सप्तमी प्रवरासभा द्वारैर्युक्ता प्रकल्पनीयम्। यथा हि –

**दक्षेति षष्ठि परिस्तृतीयालिन्दवेष्टिता।**

**प्रवरा सप्तमी द्वारैर्युक्तैषा परिकीर्तिता।।** [३१२]

तथा **प्राग्ग्रीवद्वारसंयुक्ता विदुरेत्यष्टमी सभा।** [३१३] इति वर्णितम्।

---

310 समराङ्गणसूत्रधारः(जुगनू), अ.२७.१

311 समराङ्गणसूत्रधारः(जुगनू), अ.२७.६

312 समराङ्गणसूत्रधारः(जुगनू), अ.२७.७

313 समराङ्गणसूत्रधारः(जुगनू), अ.२७.८

राज्ञ:भोजस्य मतानुसारम् –

**निसृष्टसौध (धे) यैर्वा स्यादेकस्यां वा यदा दिशि।**

**नन्दा भद्रा जया पूर्णा क्रमेण स्युः सभास्तदा।।**[३१४]

राजप्रासादस्य चतुर्दिक् वा एकस्यां दिशि नन्दा, भद्रा, जया, पूर्णा च चत्वारि सभाः क्रमेण स्थापयेत्।

विश्वकर्मवास्तुशास्त्रम् इति ग्रन्थेऽपि विभिन्नसभायाः वर्णनं प्राप्यते। तेषां स्तम्भ–बहुलतायाः वैशिष्ट्यं दृश्यते। दक्षिणभारते मण्डप–वास्त्वानां स्तम्भ–बहुलतायां वैशिष्ट्यम् उत्कर्षमभवत्। तत्रे मण्डपानां शतमण्डपम्, सहस्त्रमण्डपम् इत्यादि संज्ञा स्तम्भसंख्या सूचकं तथा मण्डपसंज्ञा द्योतकमस्ति। प्राचीनकालील मुगलानां तथा राजस्थानप्रदेशेषु राजनिवेशने सर्व सभामण्डपाः, आस्थानमण्डपाः आदि सर्वेषु मण्डपेषु स्तम्भबाहुल्यतायाः साक्षात् दर्शनं भवति।

मानसारग्रन्थेऽपि तृतीय, अष्टादश, चतुत्रिंशत्तमे अध्याये सभा–भवनानामुल्लेखें प्राप्यते।[३१५]

डॉ.पी.के. आचार्यस्य मतानुसारं सभा–भवनानां निर्माणं न्याय–सम्बन्धित व्यवहारः, व्यापारिकमेवं राजनैतिककार्याणि इत्यादि कार्याणां कृते भवति स्म।[३१६]

---

[314] समराङ्गणसूत्रधारः(जुगनू), अ.२७.४

[315] मानसार, अ.३,१८,३४

[316] वैदिक इन्डिया, भा.२,पृ–४२६–२७, वास्तुशास्त्रम्, भा.१

हिन्दु सायन्स ऑफ आर्किटेक्चर, पृ–३६७तः उद्धृत।

हर्षचरितम् ग्रन्थे सभाभवने राजमन्त्रिणाः एकत्रितं भूत्वा आवश्यक–महत्त्वपूर्ण विषयोपरि परामर्शं चिन्तनं च कुर्वन्ति स्म। इति वर्णनं प्राप्यते। अस्मिन् ग्रन्थे सभानाम् **आस्थानम्** एवं **राजसभा** इति संज्ञां दत्वा दर्शितं यत् –

राज्यवर्द्धनस्य मृत्योः पश्चात् हर्षः अत्रेव स्वस्य प्रमुख कर्मचारिणः सह मन्त्रणां–गोष्ठीं कृतवान् इति।[३१७]

मयमतम् इति ग्रन्थेऽपि सभानां लक्षणं निर्माणविधानं च मान–प्रमाणं सहितं मयऋषिः प्रतिपादयति। यथा –

**हलाङ्गवत्कुड्ययुता सरङ्गका विरङ्गका वाप्यथ गर्भगेहका।**

**सभेति सभ्यैरुदिता सनातना सभालयत्वादिह सभ्यमार्गणम्।।**[३१८]

सभायाः भित्ति लाङ्गलवत्, मध्यभागः रङ्गयुक्तः वा रङ्गरहितः, गर्भगृहयुक्तं भवेत्। सभा सभानुरुपं सभ्यैरुदिता भवेत् तथा सभ्यजनानां मार्गः सभागारभिः निर्धारितं भवति इति प्राचीनविद्वज्जनैः कथितम्।

**►गजशाला –**

समराङ्गणसूत्रधारग्रन्थे राजप्रासादस्योपकरणरुपेण गजानां निवास–हेतु षट्विध गजशालानां वर्णनं प्राप्यते। यथा हि –

**लक्षणं गजशालानामिदानीमभिदध्महे।**

**चतुरश्रीकृते क्षेत्रे भागैभक्ते ततोष्टभिः।।**

**मध्ये द्विभागविस्तारं स्थानं कुर्वति हस्तिनः।**[३१९]

---

[317] हर्षचरितम्, एक सांस्कृतिक अध्ययन, पृ–२०५

[318] मयमतम्, अ.२५.२३७

गजशाला चतुरस्रा निर्मितव्यम्। गजशालायाः निर्माणे सर्वप्रथम निवेस्य क्षेत्र चतुरस्रं कृत्वा पुनः ततोऽष्टभिः विभाजनं कृत्वा मध्ये द्विभागेन विस्तृतं गजस्थानं निर्मितव्यम्। तथा –

**कल्प्याः प्रासादवद् भागा ज्येष्ठमध्याधमाः क्रमात्।।**[३२०] इत्यानुसारं कार्यम्।

षट्विध गजशालानां नामानि निम्नदर्शितमस्ति। यथा –

(१) सुभद्रा गजशाला

(२) नन्दिनी गजशाला

(३) सुभोगदा गजशाला

(४) भद्रिका गजशाला

(५) वर्षणी गजशाला

(६) प्रमारिका गजशाला।[३२१]

एतेषां प्रथमतः पञ्च पर्यन्तं गजशालाः शुभाः मन्यते, षष्ठि गजशाला अप्रशस्त मन्यते। राज्ञः भोजस्य मतानुसारं षष्ठि प्रमारिका नामक गजशाला धनधान्यनाशका भवति। यथा –

**शाला प्रमारिका धान्यधनजीवितहारिणी।**
**तदेतां वर्जयेत् कुर्यादन्याः सर्वार्थसिद्धये।।**[३२२]

---

319 समराङ्गणसूत्रधार(सुदर्शनकुमार), अ.३२.१–२

320 समराङ्गणसूत्रधार(सुदर्शनकुमार), अ.३२.२

321 समराङ्गणसूत्रधार(जुगनू), अ.३२

322 समराङ्गणसूत्रधारः(सुदर्शनकुमार), अ.३२.१०

तथा अन्य षट् गजशाला सर्वमनोरथ–कार्यसिद्धिदा सन्ति, तत् कारणात् कार्यसिद्धयर्थं निर्माणयोग्या सन्ति।

बृहद्वास्तुमालाग्रन्थानुसारम् –

**भागे- दक्षिण- वमके च करिणां शाला हरेर्द्वारतः।**

**कर्तव्या सुदृढोन्नता च कलशैर्घण्टादिभिर्भूषिता।।**[323]

गजशाला राजप्रासादस्य सिंहद्वारस्य दक्षिणभागे एवं वामभागे स्थापनीयम्।

समराङ्गणसूत्रधारग्रन्थानुसारम् –

**तद्बहिर्भागिकोऽलिन्दो बहिस्तस्यापि चाापरः।**

**भागेनैकेन भित्तिः स्याद् द्वितीयालिन्दकाद् बहिः।।**[324]

गजशालायाः बहिर्भागे द्वि–अलिन्दः एवं भित्तिः निर्मापनीयमिति राजाभोजः निर्दिशयति स्म। प्रथमालिन्दो बर्हिः तथा तस्यापि अपरः च द्वितीयालिन्दो तथा पुनः तस्यापि अपरः भागेनैकेन भित्तिः निर्मितव्या। तथा –

**तस्या द्वारप्रदेशे तु कर्तव्यौ कर्पूरावुभौ।**[325]

समराङ्गणसूत्रधारग्रन्थे वर्णित षट्प्रकाराणां गजशालानां भिन्न–भिन्न संज्ञा तेषु निर्मितविभिन्नाङ्गाधारोपरि वर्तते। तेषां लक्षणानि निम्नदर्शितानि –

(१) **सुभद्रागजशाला –**

**द्वे द्वे वातायने कुर्याद् भित्तौ दिक्षु तिसृष्वपि।**

---

323 बृहद्वास्तुमाला, श्लोक–७,पृ–११२

324 समराङ्गणसूत्रधारः(सुदर्शनकुमार), अ.३२.३

325 समराङ्गणसूत्रधारः(सुदर्शनकुमार), अ.३२.४

**प्राग्ग्रीवोऽग्रे भवेच्छाला सुभ्रेयमुदाहृता।।** [३२६]

एषा गजशालायाः भित्तौ चतुर्दिक् द्वे–द्वे वातायनानि सहितमग्रभागे प्राग्ग्रीवो भवेत् तदा सा गजशाला **सुभद्रागजशाला** इति नाम्ना प्रख्याता।

(२) **नन्दिनीगजशाला –**

**अस्या एव यदा पक्षप्राग्ग्रीवौ भवतो मुखे।**

**नन्दिनी नामतः शाला तदा स्यात् गजवृद्धये।।** [३२७]

उक्त सुभद्रागजशालायाः मुखे द्वि पक्षप्राग्ग्रीवो भवेत् तदा सा शाला **नन्दिनिगजशाला** इति नाम्ना विख्याता। सा शाला गजवृद्धये शुभा मन्यते।

(३) **सुभोगदागजशाला –**

**अस्या एव यदा स्यातां प्राग्ग्रीवौ पार्श्वयोर्द्वयोः।**

**तदा सुभोगदा नाम तृतीया परिकीर्तिता।।** [३२८]

उक्त नन्दिनीगजशालायाः द्वयोर्पार्श्वे प्राग्ग्रीवौ रचयेत् तदा सा शाला **सुभोगदागजशाला** इति नामा विख्याता।

**(४) भद्रिकागजशाला –**

**अस्या एव यदा पृष्ठे प्राग्ग्रीवः क्रियतेऽपरः।**

**भद्रिका नाम शाला स्यात् तदा द्विरदपुष्टिदा।।** [३२९]

---

326 समराङ्गणसूत्रधार(जुगनू), अ.३२.५

327 समराङ्गणसूत्रधार(जुगनू), अ.३२.६

328 समराङ्गणसूत्रधार(जुगनू), अ.३२.७

329 समराङ्गणसूत्रधारः(जुगनू), अ.३२.८

उक्त भद्रिकागजशालायाः पृष्ठेऽपि अन्य प्राग्ग्रीवस्य निर्माणं क्रियते तदा सा शाला **भद्रिकागजशाला** इति नाम्ना कीर्तिता। एषा चतुर्थी शाला गजानां कृते पुष्टिप्रदायका भवति।

(५) **वर्षणीगजशाला** –

**पञ्चमी चतुरश्रा स्याद् वर्षणी नाम पूजिता।**[३३०]

चतुरश्राकारा पञ्चमी गजशाला **वर्षणीगजशाला** इति नाम्ना प्रख्याता।

**(६) प्रमारिकागजशाला –**

**प्राग्ग्रीवालिन्दनिर्यूहहीना षष्ठि तथापरा।**

**शाला प्रमारिका ....................।।**[३३१]

या गजशाला प्राग्ग्रीव, अलिन्द, निर्यूहादीनां रहिता भवति सा गजशाला प्रमारिकागजशाला इति नान्मा ज्ञायते। एषा गजशाला अशुभा मन्यते। तथा अन्ते –

**प्रमारिकेति प्रथितेह शाला सा प्राणस्यद्रविणच्छिद्रे स्यात्।**

**कुर्यादतस्तां न यथोदितास्तु कार्याः परा जीवितवित्तवृद्ध्यै।।**[३३२]

अर्थात् प्रमारिका नामक गजशाला प्राण–शस्य–द्रव्यादीनां विनाशकारिका भवति। यथा गजानां कृते कदापि प्रमारिकागजशाला न रचनीया। अन्य सुभद्रादि पञ्च शुभागजशाला जीवित–धनवृद्ध्यै निर्मितव्या।

विश्वकर्मवास्तुशास्त्रमनुसारम् –

---

[330] समराङ्गणसूत्रधारः(जुगनू), अ.३२.९

[331] समराङ्गणसूत्रधारः(जुगनू), अ.३२.९–१०

[332] समराङ्गणसूत्रधारः(जुगनू), अ.३२.११

**दृढबन्धनसंयुक्तक .......................।**

**गजशाला व्यापिकां स्थापयेद्वालुकान्विताम्।।**[३३३]

अर्थात् गजशाला दृढबन्धनयुक्तमेवं व्यापितकां वालुकेन अन्विता कार्या।

**► अश्वशाला** –

समराङ्गणसूत्रधारग्रन्थे अश्वशाला निर्माण सम्बन्धितं विस्तृतं वर्णनं प्राप्यते। अस्मिन् ग्रन्थे अश्वशालायाः प्रतिपादनं वैज्ञानिकमेवं पारिभाषिकमस्ति। अत्रे राजा भोजः अश्वशालायाः अङ्गोपाङ्गानां निवेशनम्, अश्वशालीय विधानम्, अश्वबन्धनस्थानानां प्रक्रिया पद्धति तेश्च अश्वशालायाः उपभवनानां प्रतिपादनमावश्यकरुपेण कार्यमिति दर्शयति।

राजाभोजेन समराङ्गणसूत्रधारग्रन्थे अश्वशालायाः सन्निवेश–हेतवे उपयुक्तस्थान लक्षणं निर्दिशयेत्। यथा हि –

**स्थलप्रदेशे विपुले गुप्ते रम्ये शुचौ तथा।।**

**समे च चतुरश्रे च स्थिते(रे) मङ्गल्यमेव च।**

**स्थानं हयानां कर्तव्यं प्रदेशे सुपरिक्रमे।।**[३३४]

अश्वशालायाः निर्माण हेतु समतलभूमिः एवं ब्रृहदा तथा सुन्दरा–मनोरमा समचतुरश्रा माङ्गल्या गुप्ता इत्यादीनां लक्षणयुक्ता भूमिः प्रशस्ता मन्यन्ते।

**मङ्गल्य रमणीये च चतुरश्रे मनोनुगे।**

**शुभे च विहितं सद्म भवेत् कल्याणकारकम्।।**[३३५]

---

[333] विश्वकर्मवास्तुशास्त्रम् (जुगनू), अ.३८–३९.१४

[334] समराङ्गणसूत्रधारः(जुगनू), अ.३३.३–४

[335] समराङ्गणसूत्रधारः(जुगनू), अ.३३.१६

ग्रन्थकार: शुभे, रमणीये, मनोज्ञे चतुरश्रेच स्थाने निर्मितं वाजीसदनं शीघ्रं कल्याणकारी भवति इति दर्शयति।

अश्वशाला कृते निम्नस्थानं सर्वथा वर्जितमस्ति तथा शल्ययुक्त: वल्मीकशर्कराभिश्च स्थानमपि वर्जितमस्ति। यत्र द्रुमस्थाणुयुक्ता, गुल्मयुक्ता, चैत्य, दिवंगतानां स्मृतिधाम, खण्डितभवनमित्यादी भूमौपरि अश्वशाला न स्थापनीयम्। यथा हि –

**निम्न गुल्मद्रुमस्थाणुचैत्यायतनवेश्मभिः।**

**वल्मीकशर्कराभुश्च वर्जिते तत् समाचरेत्।।** [३३६]

अस्माकं भारतदेशे विविध: भिन्न–भिन्न ऋतव: आगच्छन्ति, अत: प्रत्येक ऋतुषु अश्वशालां अश्वानां अनुकूलमेवं उचितं व्यवस्था प्रदानस्य निर्देशो समराङ्गणसूत्रधारग्रन्थे प्राप्यते। ग्रन्थानुसारम् –

**ग्रीष्मे कार्यं सुसंमृष्टं सिक्तं तत्र महीतलम्।**

**वर्षास्वनम्बुपङ्कं च शिशिरे संवृतं शुभम्।।**

**तिष्ठेयुस्तत्र तुरगा नातिसङ्कीर्णशङ्किनः।**

**अस्पृशन्तो मिथः कार्याः सर्वाबाधविवर्जिताः।।** [३३७]

अर्थात् ग्रीष्मऋतौ जलसीञ्चनमधिकं कार्यं, वर्षाकाले अम्बुपङ्केन व्याप्तं न भवेत् इति अवधानं स्थापनीयम्, शिशिरे सम्यक्रुपेण आवृतं करणीयम्। तेन तत्रे अश्वा: नातिसङ्कार्णशङ्किनः एवं सुखेन तिष्ठेत्। तेषां बन्धनव्यवस्था एतावत् करणीयं यथा परस्परं अस्पृश्यन्तो तथा सर्वाबाधविवर्जित: भवेत्।

---

[336] समराङ्गणसूत्रधार:(जुगनू), अ.३३.५

[337] समराङ्गणसूत्रधार:(जुगनू), अ.३३.३२–३३

**अश्वशालानिर्माणे निषिद्धस्थानानि तन्निवेशनफलम्**

**चितायतनवल्मीकग्रामधान्यखलेषु च।**

**विहारेषु च कर्तव्यमश्वानां न निवेशनम्।।** [३३८]

स्मशाने,वल्मीकयुक्त–ग्रामधान्यखलेषु एवं विहारभूमौ अश्वशालायाः स्थापनं न कार्यं कारणम् –

**भवन्ति स्वामिनः पीडा ग्रामधान्यखलेषु च।**

**श्मशाने वेश्मकरणान्नराणां मृत्युमादिशेत्।।**

**स्थानं विहारवल्मीकविहितं स्यादनर्थकम्।**

**तन्नित्यसन्तापकरं क्षयकृच्च तपस्विनाम्।।** [३३९]

यदा ग्रामधान्यखलेषु अश्वशालायाः निर्माणं भवेत् तदा निर्माता पीडां प्राप्नोति। श्मशानभूमौ अश्वशालायाः निर्माणफलं मृत्युः। विहारस्थानेषु तथा वल्मीकयुक्तभूमौ अश्वशालायाः निर्माणं भवेत् तदा तत्र अनर्थं स्याद् तथा तपस्विनां कृते सदैव सन्तापकरमेवं क्षयदायकं भवति।

अश्वशालानिवेशस्थानम् –

**स्ववेशमवास्तोः कर्तव्यं पदे गन्धर्वसञ्ज्ञके।।**

**अथवा पुष्पदन्ताख्ये स्थानं वासाय वाजिनाम्।** [३४०]

अश्वशाला राजप्रासादस्य वास्तुपदमण्डलानुसारं गन्धर्वपदोपरि वा पुष्पदन्तस्य पदोपरि स्थापनीयम्।

---

338 समराङ्गणसूत्रधारः(जुगनू), अ.३३.१०

339 समराङ्गणसूत्रधारः(जुगनू), अ.३३.११–१२

340 समराङ्गणसूत्रधारः(जुगनू), अ.३३.१–२

**►अश्वशालाप्रमाणम्** –

समराङ्गणसूत्रधारग्रन्थे अश्वशालायाः निवेशने तत्छालायाः विस्ताराधारेण तेषां त्रिविधप्रकाराणामुल्लेखो प्रवर्तते। (१) ज्येष्ठशाला (२) मध्यमशाला (३) कनिष्ठशाला। यथा त्रिविधशालाप्रमाणम् –

**अरत्निशतमात्रं यज्ज्येष्ठं तत् परिकीर्तितम्।**

**अशीत्यरत्निकं मध्यं षष्ठ्यरत्न्यधमं भवेत्।।**[३४१]

ज्येष्ठअश्वशाला १००अरत्नि प्रमाणेन, मध्यमअश्वशाला ८० अरत्नि प्रमाणेन तथा कनिष्ठअश्वशाला षष्ठी (६०) अरत्नि प्रमाणेन निर्मापनीयम्। राजवल्लभग्रन्थेऽपि अश्वशालाप्रमाणं दर्शितम्। यथा हि –

**तुरगंमाणांगृहवामभागेशाला चतुःषष्टिकरा विधेया**

**शतार्धतोमध्यमिका च दैर्ध्येकनीयसीतैर्दशभिर्विहीना।**

**व्यासे च ज्येष्ठा तिथिहस्तमाना त्रयोदशैलादशभिः क्रमेण**

**तद्बाह्यभित्तिश्च करप्रमाणा पञ्चार्धपञ्चाब्धिकरोदयं स्यात्।।**[३४२]

गृहस्य वामभागे अश्वशालायाः निर्माणं कार्या। तत्प्रमाणं निम्नदर्शितमस्ति। यथा – उत्तमा अश्वशालायाः विस्तारः चतुःषष्ठि(६४) हस्तप्रमाणेन तथा दैर्ध्यमानं पञ्चा दश(१५) हस्त्रप्रमाणेन स्वीकरणीयम्। मध्यमा अश्वशालायाः विस्तारः पञ्चाशत्(५०) हस्तप्रमाणेन तथा दैर्ध्यमानं त्रयोदश(१३) हस्तप्रमाणेन स्थापनीयम्। कनिष्ठ अश्वशालायाः विस्तारः चत्वारिंशत् (४०) हस्तप्रमाणेन तथा दैर्ध्य एकादश(११) हस्तप्रमाणेन करणीयम्।

---

341 समराङ्गणसूत्रधारः(जुगनू), अ.३३.२–३

342 राजवल्लभ (नारायणभारती), अ.९.२४

तद्बाह्यभित्तिरुच्चमानम् उत्तमा अश्वशालायाः, मध्यमा अश्वशालायाः तथा कनिष्ठ अश्वशालायाः क्रमशः सार्धपञ्च (५.५०) हस्तप्रमाणेन, पञ्च (५) हस्तप्रमाणेन तथा चतुर्हस्त (४) प्रमाणेन निर्मितव्यम्।

अश्वशालायाः सन्निवेशहेतु उपयुक्त स्थानलक्षणं राज्ञ भोजेन समराङ्गणसूत्रधारग्रन्थे निर्दिशयेत्। यथा– अश्वशालायाः निर्माणं समतला, बृहद्,
विस्तृता तथा गुप्ता, सुन्दरा, मनोरमा, शुचौ तथा समचतुरस्त्रा, माङ्गल्या भूमौ करणीयम्। यथा हि –

**स्थलप्रदेशे विपुले गुप्ते रम्ये शुचौ तथा।**

**समे च चतुरश्रे च स्थिते(रे) मङ्गल्यमेव च।।**[३४३]

तथा इतोपि ग्रन्थकारः कथयति यत्–

**मङ्गल्यरमणीये च चतुरश्रे मनोयुगे।**

**शुभे च विहितं सद्म भवेत् कल्याणकारकम्।।**[३४४]

वाजिशाला शुभे च रमणीय, मनोज्ञ, चतुरश्रे स्थाने स्थाप्येत् तदा सा शाला सद्यः कल्याणकारी भवति।

अश्वशालायाः अधःभूमि गुल्म, शुष्कवृक्षाः– चैत्य– मन्दिरं– वल्मीक– शर्कराभिश्च वर्जितं भवेत्।

## १३. दुर्गनिर्माणविधानम् –

---

343 समराङ्गणसूत्रधारः(सुदर्शन), अ.३३.३–४

344 समराङ्गणसूत्रधारः(सुदर्शन), अ.३३.२–१६

प्राचीनकाले दुर्गनिर्माणं वास्तुशास्त्रस्य महत्त्वपूर्णं क्षेत्रमासीत् एवं नगरस्यापि एकं महत्त्वपूर्णं तथा आवश्यकमङ्गमासीत्। वास्तुशास्त्रानुसारेण दुर्गनिर्माणं यदा क्रियते तन्नगरे निवासिता: जना: तथा राज्ञ: अत्यधिकं सुरक्षितं भवति तथा शत्रुसेनाया: आक्रमणे दुर्गस्य अन्त: स्थित्वा राज्ञ: स्वसैन्येन सह सरलतया एवं सुरक्षिततया प्रतिघातं कर्तुं शक्यन्ते। विश्वकर्मप्रकाशग्रन्थे स्वयं भगवन् विश्वकर्मा कथयति यत् –

**अथातः श्रृणु विप्रेन्द्र दुर्गाणां करणं तथा।**

**येन विज्ञातमात्रेण अबलः सबलो भवेत्।।** [३४५]

दुर्गनिर्माण विधानस्य श्रवण मात्रेण अबल: अपि शीघ्रं सबल: भवति इति।

शिल्परत्नग्रन्थानुसारम् –

**दुर्गं दुर्गममुक्तं दुर्लङ्घ्यं दुरवगाहमतिमात्रम्।**

**रक्षार्थं च जयार्थं त्वरिभिरभेद्यं च दुर्गमिष्टं स्यात्।।** [३४६]

दुर्गं, दुर्लङ्घ्यमेवं दुरवगाहम् अस्ति इति दुर्गम्। रक्षार्थं, जयार्थं था शत्रूद्वारा अभेद्यम् इति दुर्गमिष्टं भवति।

मयमतम् इति ग्रन्थेऽपि एतादृशी दुर्गस्य व्याख्या प्राप्यते। यथा हि –

**दुर्गं दुर्गममुक्तं दुर्लङ्घ्यं दुरवगाहं च।**

**रक्षार्थं च जयार्थं हयरिभिरभेद्यं च दुर्गमिष्टं स्यात्।।** [३४७]

दुर्गनिवेशस्य इतिहास: मानवानां विकासेन सह वर्तते। प्राचीनकाले मानवा: पर्वतगुहायां, वृक्षोपरि इत्यादीनां वा स्थलेषु निवासनं कृत्वा हिंसकपशुभ्य: स्वस्य रक्षां कुर्वन्ति

---

[345] विश्वकर्मप्रकाश:, अ.११.१

[346] शिल्परत्न, ५.११

[347] मयमतम्, अ.१०.४८–४९

स्म। प्रकृत्याः प्रकोपात् अपि सुरक्षा प्राप्यन्ते स्म। मानवाः प्रारम्भिकजीवने (प्राचीनकाले) उच्च–विशाल–दुर्गम पर्वतानां घनानां वनानामुपयोगं सुरक्षार्थं कुर्वन्ति स्म, किन्तु सामुहिक–भ्रमणकारी जीवने तथा समतल भूमौ निवासिने स्वस्य सुरक्षा हेतु कण्टकवृक्षाणां वा विस्तृत परिखायाः निर्माणं कृत्वा स्वस्य तथा स्वजनानां सुरक्षां कुर्वन्ति स्म। मानवसभ्यतायाः उत्पत्तिः विकासक्रमेण सह मानवः एवं मानवस्य रिपुः भयकारकः भविष्यति। मानवाः स्वजीवनस्य यापनस्य सुविधा प्राप्त्यर्थं कार्यं कुर्वन्ति तथा स्वसुरक्षा हेतु नूतन रक्षात्मकं साधनानामाविष्कारमपि संशोधयन्ति। एतादृशेन क्रमेण दुर्गनिमार्ण कार्यस्य प्रारम्भः जातः। शनैः शनैः विकासस्य समस्त व्यवस्थायां राज्ञः प्रतिष्ठापनं जातम् तदा दुर्गनिवेशनमेम् आवश्यकमङ्गम् अभूत्। फलतः दुर्गानां सन्निवेशनस्य परम्परायाः विकासः जातः।

भारतीय वास्तुशास्त्रीय ग्रन्थेषु प्राप्त विवराणनुसारं नगरं, ग्रामः तथा दुर्गनिवेश पद्धत्यां भेदाः नास्ति, अपितु दुर्गाकाराणां भेदाः प्रवर्तन्ते। नगर–ग्रामः दुर्गस्वरूपे वा दुर्ग नगर वा ग्राम स्वरूपे सन्निवेष्टं भवति स्म। अर्थात् तत्काले शासनपद्धत्यां तथा शासनव्यवस्थायां सार्वभौमिक वा केन्द्रिय साधनानि उपलब्धानि नासीत्। तेषां कस्यापि विशाल– विस्तृत भूभागोपरि प्रशासनिक सद्व्यवस्था तथा शान्तिरक्षायाः प्रबन्धनं कर्तुं शक्यते। अतः ग्राम–नगरादिषु सर्वे जनाः एतत् कारणात् लघु–लघु ग्रामाणि, नगराणि, राजधानी इत्यादीनां निवेश पद्धति समाना आसीत्। वैदिक कालिक भारते सुदुर अन्तः नगरस्य सन्निवेशनं दुर्गस्वरूपे एव भवति स्म। तत्कालिक दुर्गः विस्तृतमेवं दीर्घं भवति स्म। तत्काले दुर्गनिर्माणं सूर्यउर्जायां पक्वईष्टिकाया वा पाषाणेन निर्मीयते स्म। एतादृशो दुर्गनिर्माणे नगरनिर्माणं जायते तदा तन्नगरं धनधान्यैः तथा भोज्यपदार्थैः परिपूर्णं भवति।[३४८]

---

[348] शोधपत्रिका (राजस्थान के दुर्ग), पृ–२

रामायणे च महाभारते लङ्का, अयोध्या, इन्द्रप्रस्थ, मथुरा, द्वारका इत्यादीनां नगराणां वर्णने विदितं भवति यत् तानि नगराणि दुर्गस्वरूपे आसीत्। लङ्कानगरं त्रिकूटः नामकः उन्नतः पर्वतोपरि तथा चतुर्दिक् समुद्रेन परिवेष्टितमासीत्। अर्थात् लङ्कानगरे जलदुर्गं तथा पर्वतदुर्गं दुर्गद्वयमासीत्।

स्थापत्यकला तथा वास्तुशास्त्र सम्बन्धित भारतीय साहित्येषु विशेषतया मनुस्मृतिः, शुक्रनीतिः, कौटिलीयअर्थशास्त्रम्, युक्तिकल्पतरुः, शिल्परत्नम्, मानसारः, मयमतम्, समराङ्गणसूत्रधारः इत्यादिषु प्रभृतिग्रन्थेषु नैक प्रकाराणि दुर्गाणि एवं तेषां रचनागत विशेषतायाः उल्लेखं प्राप्यन्ते। विशेषतः युक्तिकल्पतरु एवमन्य वास्तुशास्त्रीय ग्रन्थेषु दुर्गाणां प्रमुखतः वर्गद्वयेषु विभाजितं वर्तन्ते। यथा – (१) प्राकृतिकदुर्गम् तथा (२) कृत्रिमदुर्गम्।

प्रकृति प्रदत्त जटिलमेवं दुरुह भौगोलिक परिस्थितियुक्त स्थानोपरि अवस्थितं दुर्गं **प्राकृतिकदुर्गम्** इति प्रख्यातम्। सुदृढ नगरे परिवेष्टित विविध निवेश युक्त मानव सर्जित दुर्गं **कृत्रिमदुर्गम्** इति नाम्ना विख्यातम्। गिरिदुर्गं, वनदुर्गमेवं कृत्रिमदुर्गम् एतानां त्रयाणां लक्षणयुक्तं दुर्गं **मिश्रितदुर्गम्** इति नाम्ना ख्यातम्।

मध्यकालिक दुर्ग रचना प्राचीनकालिक दुर्गरचनायाः अपेक्षया किञ्चित् भिन्नमासीत्। सुरक्षाबल वास्तुविद्यायाः इतिहासे भारतवर्षे मध्यकालिक दुर्गाणां विशेषं महत्त्वं दृश्यते। भारतीय मध्यकालिक दुर्गाणि चीन तथा युरोपीय शैल्याः अपेक्षया भिन्नं दृश्यते। सामान्यतः दुर्गस्य भित्ति बृहद्, दीर्घ, विस्तृतमेवं उन्नतं भवति। तत्र मध्ये–मध्ये उन्नत अट्टालकः एवं द्वारं निर्मीयते स्म। भारतवर्षे मध्यकालीक लघु–लघु पर्वतोपरि द्वि–त्रि भित्तियुक्त निर्मित दुर्गसंख्या अधिकं दृश्यन्ते। दुर्गनिर्माण समये यत् मार्गेण शत्रूणां प्रवेशस्य तथा आक्रमणस्य सम्भावना वर्तन्ते तद् मार्गोपरि सुरक्षा हेतु विशेषरूपेण प्रबन्धं क्रियते स्म। सामान्यतया नगरनिर्माणम्

उन्नत पर्वतोपरि वा जलमध्ये क्रियते स्म। कारणं सूत्रधार मण्डनः राजवल्लभग्रन्थे दर्शयति। यथा हि –

**सिंहोवैरिपराभवं प्रकुरुते तिष्ठन्गिरेर्गव्हरे**

**दुर्गस्थोनृपतिः प्रभूतकटकं शत्रुजयेत्संगरे।**

**कैलासेनगरं शिवेनरचितं गौर्यादिसंरक्षणं**

**दुर्गं पश्चिमसागरे च हरिणान्येषां किमत्रोच्यते।।**[३४९]

पर्वतस्य गुहायां स्थितः सिंहः यथा शत्रूनां विनाशः करोति तथैव गिरिगव्हरदुर्गस्थो नृपतिः प्रभूतशत्रुसैन्यस्य विनाशं करोति। यथा गौर्यादीनां संरक्षणार्थं शिवः कैलासपर्वतोपरि नगरं रचितम्। यथावत् पश्चिमसमुद्रे जलमध्ये द्वारकानगरस्य रचना श्रीकृष्णः कृतवान्। यथा नगरस्य सुरक्षा हेतु दुर्गम् आवश्यकमस्ति।

मयमतम् इति ग्रन्थेऽपि दुर्गनिर्माण वर्णने नगरनिवेश योजनायां परिखा, प्राकारादि सन्निवेशनस्य आवश्यकता दर्शितम् एतत् सर्वं दुर्गनिवेशने अपि आवश्यकं मन्यन्ते।[३५०] महाभारते राज्ञां कृते आदेशमस्ति यत् –

**यत्पुरं दुर्गसम्पन्नं धान्यायुधसमन्वितम्।**

**दृढप्राकारपरिखं हस्त्यश्वरथसङ्कुलम्।**

**........राजा तत्पुरं स्वयमादिशेत्।।**[३५१]

---

[349] राजवल्लभः,(नारायणभारती), अ.४.२

[350] मयमतम्, अ.१०

[351] महाभारत, शान्तिपर्व,६७.६,१०

अर्थात् यन्नगरस्य निर्माणं करणीयमस्ति तत्र धान्यं, आयुधं, सुदृढप्राकार:, परिखा, गजा: अश्वयुक्तदुर्ग–सम्मपन्नं कार्या। मोहेनजोदडोहडप्पा नगरे अपि दुर्गमासीत्। मोहेनजोदडोनगरस्य उत्खनने प्राप्त दुर्गावशेषे सुरक्षात्मकं भित्ति: ४० फुट विस्तृतमेवं ३५ फुट उन्नतासीत्। तेषां मृणमयी भित्ति: आसीत्। नगरस्य पश्चिम तथा उत्तरदिशायां द्वाराणि आसन्। एतत् पूर्वनियोजित पद्धत्या: विकसितरूपमासीत्। एतेन स्पष्टं भवति यत् प्राचीनकाले दुर्गनिवेशस्य प्रारम्भ: पुर वा नगरनिवेशनेन सह भवति वा द्वयो: विन्यास: संयुक्तरूपेण भवति स्म।

विश्वकर्मवास्तुशास्त्रग्रन्थानुसारम् –

**दुर्गाणां स्थापनं प्रायो भूपानामात्मरक्षकम्।**

**तस्माच्छिल्पिगणैः कार्यं न तत्र नगरादिकम्।।** [३५२]

भूपालादीनां, योधादिनां, बन्धूनामन्येषाञ्च रक्षणार्थमेव नगरे दुर्गस्य रचना कुर्यात्।

यथोक्तं मानसारग्रन्थेऽपि –

**शत्रुभूपालहित्यर्थं नृपरक्षणदुर्गकम्।** [३५३]

दुर्गनिर्माणस्य मुख्य उद्देश: राज्ञस्य रक्षणमीति आसीत्। तदुपरान्त कौटिलीय अर्थशास्त्रऽपि यथा –

**चतुर्दिशं जनपदान्ते साम्परायिकं दैवकृतं दुर्गं कारयेत्।** [३५४]

इति निर्देशो प्राप्यते। अत: यत्र राज्ञस्य आत्मरक्षाया: दुर्ग: शसक्त: साधनमासीत् तत्र नगरस्य प्रतिरक्षाया: अपि एकं महत्त्वपूर्णं अङ्गमासीत् इति स्पष्टं भवति। अत: एव आचार्यकौटिल्य:

---

[352] विश्वकर्मवास्तुशास्त्रम्, अ.१०.१

[353] मानसार, १०.४

[354] अर्थशास्त्रम्, अधिकरण–२, अ.३

सीमा–प्रदेशेषु दुर्गनिर्माणस्य निर्देशं प्रदत्तम्। तत्र नगरे वा जनपदे शत्रूणाम् आगमनं स्थगितं कर्तुं शक्यते। वर्तमानकालेऽपि भारतवर्षे यत्र–तत्र प्राचीन नगरेषु दुर्गाणाम् अवशेषाः उपलभ्यन्ते। एतेषां सर्वेषां विशेषतः भारतीय स्थापत्यस्य दक्षता एवं सामान्यतः भारतीय स्थापत्यविज्ञानस्य वैशिष्ट्यस्य विलक्षण स्मारकः वर्तन्ते।

डॉ. शुक्लस्य मतानुसारं रामायणे तथा महाभारते अयोध्या, लङ्का, इन्द्रप्रस्थ, द्वारका, मथुरेत्यादीनां नगराणां प्रथमं दुर्गरूपेन सन्निवेशनं जातम्, पुनः कालान्तरे विस्तारस्य एवं प्रसारस्य बहुमुखी आवश्यकतायाः कारणात् दुर्गं नगरस्य अन्तः स्थित्वा जनावासाः दुर्गं परितो बहिः अपि निर्माणं जातम्। प्राचीने भारते प्रत्येक– नगरं सुरक्षितमेवं दुर्गाकाररूपेण आसीत्। परन्तु दुर्गः सर्वदा नगरस्य विकासेन सह समविस्तृतं न भवति अतः कालान्तरे दुर्गः नगरस्य अभ्यन्तरे स्थितः दृश्यते।[३५५]

कालान्तरे दुर्गनिवेशस्य सिद्धान्तेषु आवश्यकं परिवर्तनं जातम्। नित्याक्रमणां कारणात् रक्षा–व्यवस्थायाः विशेषरूपेण महत्त्वं दुर्गाय दीयते स्म। विचार–विमर्श – अनुभवाधारेण दुर्गस्य निवेशस्य विविधानामङ्गानां सिद्धान्तानां विवेचनं कृत्वा दुर्गस्य प्राकारः, दुर्गस्य वैशिष्ट्यं, न्यूनतादीनां भिन्न–भिन्न सिद्धान्तानां रचना कृता। दुर्गस्य निवेशने कस्य स्थानोपरि केन प्रकाराणि भवनानि निर्मितव्यानि इति केन प्रकारेण रक्षा–व्यवस्था भविष्यति, दुर्गनिर्माणं कस्मिन् स्थले आदर्शं भविष्यतेत्यादीनां विस्तृतं प्राचीन शिल्पशास्त्रीय ग्रन्थेषु विद्यन्ते। एतेषु ग्रन्थेषु दुर्गनिमेश हेतु निर्दिष्ट स्थलं जटिलमेवं विकटं वर्तते।

**►दुर्गप्रभेदाः –**

---

[355] भारतीय वास्तुशास्त्र, वास्तुविद्या तथा पुरनिवेश, अ.५,पृ–१२२

वास्तुशास्त्रीय ग्रन्थेषु एवं पौराणिक साहित्येषु दुर्गस्य चत्वारिंशतः (४) द्वादश(१२) प्रकारानां प्रभेदाः वर्णितानि वर्तन्ते।

समराङ्गणसूत्रधारग्रन्थे राजा भोजः दुर्गस्य विन्यासस्य कृते पर्वतः, वनं, जलं, प्राकारःच एतानि स्थलानि प्रशस्तं दर्शयति।

मनुस्मृतिग्रन्थेऽपि एतावत् धन्वदुर्गम्, महीदुर्गम्, जलदुर्गम्, वृक्षदुर्गम्, नृदुर्गम् एवं गिरिदुर्गं एतानि षड्विधानि दुर्गाणि प्रोक्तानि। यथा हि —

**धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव वा।**

**नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत्पुरम्।।** [३५६]

कौटिलीयअर्थशास्त्रेऽपि –

**अन्तःद्वीपं स्थलं वा, निम्नावरुद्धौदकं प्रास्तरं गुहां वा पार्वतं ...... अटवीस्थानम्।** [३५७] इति चत्वारि दुर्गाणि प्रमुखतया वर्णितानि वर्तन्ते। यथा – जलदुर्गम्, पर्वतदुर्गम्, मरुदुर्गम् तथा वनदुर्गम्।

मानसारग्रन्थेऽपि यथोक्तम् –

**गिरिदुर्गं वनदुर्गं सलिलं पङ्कदुर्गकम्।**

**रथा(थ) दुर्गं देवदुर्गं मिश्रदुर्गं तथैव च।।** [३५८]

इति सप्तदुर्गाणां वर्णनं मानऋषिः वर्णयति। तथा मयमतम् इति ग्रन्थेऽपि –

**गिरिवनजलपङ्केरिणदेवतमिश्राणि सप्तदुर्गाणि।** [३५९]

---

356 मनुस्मृति, ७.७०

357 अर्थशास्त्रम्, अधिकरण–२,अ.३

358 मानसार, १०.४५–४६

इति वर्णनं दृश्यते। शिल्परत्न ग्रन्थानुसारमपि यथा हि —

**दुर्गं तु पार्वतं वन्यमौदकं चैरणं तथा।।**

**दैवकं धावनं चैव कृतकं चेति सप्तधा।** [३६०]

शिल्परत्नाकारानुसारं पर्वतदुर्गम्, वनदुर्गम्, जलदुर्गम्, ऐरणदुर्गम्, दैवकदुर्गम्, धावनदुर्गम् एवं कृतकदुर्गम् इति सप्तधा दुर्गाणि प्रकीर्तितानि।

राजवल्लभग्रन्थे सूत्रधार मण्डनः अपि दुर्गनिर्माण विषयक वर्णने कथयति यत् —

**भूदुर्गं जलदुर्गमद्रि विषये दुर्गं भवेद् गह्वरे।**

**तेषांमुत्तममद्रिमूर्ध्निरचितंतद्वैरिणांदुर्गमम्।।** [३६१]

यथा भूदुर्गम्, जलदुगम्, पर्वतदुर्गम् तथा गह्वरदुर्गम् इति चत्वारि दुर्गाणि।

अग्निपुराणे षडविधा दुर्गप्रकाराः वर्णिताः वर्तन्ते। यथा –

**षण्णामेकतमं दुर्गं तत्र कृत्वा वसेद् बली।**

**धनुदुर्गं महीदुर्गं नरदुर्गं यथैव च।।**

**वार्क्षञ्चैवाम्बु दुर्गञ्च गिरिदुर्गञ्च भार्गव।**

**सर्वोत्तमं शैलदुर्गमभेद्यं चान्यभेदनम्।।** [३६२]

---

359 मयमतम्, अ.१०.३६

360 शिल्परत्न, ५.८–९

361 राजवल्लभः, (नारायणभारती), अ.४.३

362 अग्निपुराणम्, अ.२२२.४–५

यथा धनदुर्गम्, महीदुर्गम्, नरदुर्गम्, वृक्षदुर्गम्, जलदुर्गम्, गिरिदुर्गं च इति षडविधा दुर्गाणां निर्माणं नृपेण निर्मापनीयम्।

विश्वकर्मप्रकाशग्रन्थे मुख्य अष्टप्रकारस्य दुर्गाणां वर्णनं विद्यते। यथा–

**प्रथमं मृण्मयं प्रोक्तं जलकोटं द्वितीयकम्।।**

**तृतीयं ग्रामकोटं च चतुर्थं गिरिगह्वरम्।**

**पंचमं पर्वतारोहं षष्ठं कोटं च डामरम्।।**

**सप्तमं वक्रभूमिस्थं विषमाख्यं तथाऽष्टकम्।** [३६३]

अर्थात् (१) मृण्यमयदुर्गम्, (२) जलदुर्गम्, (३) ग्रामकोटम्, (४) गिरिगह्वरम्, (५) पर्वतारोहम्, (६) डामरदुर्गम्, (७) वक्रभूमिदुर्गम्, (८) विषमाख्यदुर्गम्। इति अष्ट दुर्गाणि प्रोक्तानि। तथा आकरानुसारेण अपि दुर्गाणां दश प्रकाराणि वर्णितं वर्तन्ते। यथा – (१) चतुर्द्वारयुक्त चतुरस्र दुर्गम्, (२) वृत्ताकारं दीर्घ द्वि द्वाराणि युक्तम्, (३) एक मार्गयुक्तं त्रिकोणाकारम्, (४) वृत्ताकारं दीर्घ चतुर्द्वाराणि युक्तम्, (५) अर्धचन्द्राकारदुर्गम्, (६) चतुर्द्वार युक्तं गौस्तनाकारदुर्गम्, (७) धनुषाकारदुर्गम्, (८) मार्गकण्टकदुर्गम्, (९) पद्मपत्राकारदुर्गम्, (१०) छत्राकारदुर्गम्।

**(१) जलदुर्गम्** –

जलदुर्गम् अर्थात् प्रवाहितं वा अप्रवाहितं जलं तन्मध्ये सुरक्षितस्थानोपरि नगरस्य निर्माणं करणीयम्। वा नगस्य चतुर्दिक् जलरूपी दुर्गं जलदुर्गं स्यात् एतत् जलदुर्गम् इति नाम्ना प्रख्यातम्। जलदुर्गं सरिताभिः वा समुद्रैः चतुर्दिक् परिवेष्टितमस्ति। एतत् अन्तर्द्वीपीयनगरमपि

[363] विश्वकर्मप्रकाश, अ.११.४–६

वक्तुं शक्यते। अप्रवाहमय जलराशिनां मध्ये स्थित: उच्चस्थल: जलदुर्गस्य (नगरस्य)निर्माणार्थमुपयुक्तम् उत्तमं स्थानं भवति। जलराशि एव एतत् नगरस्य रक्षार्थं प्राकृतिकं साधनमस्ति। विश्वकर्मवास्तुशास्त्रम् इति ग्रन्थे जलदुर्गस्य लक्षणं आचार्य विश्वकर्मा प्रतिपादयति यत् –

**पारावारेण नद्या वा संवृतं स्थलमुत्तमम्।**

**कथितं शिल्पशास्त्रज्ञैर्नाम्ना सलिलदुर्गकम्।।** [३६४]

समुद्रेण वा नद्या वा महता जलाशयेन वा यद्विशालस्थलमावृत्तं तत् स्थलं दुर्गनगरनिर्माणार्थमुत्तमं भवति इति शिल्पशास्त्रज्ञैः कथयन्ति। एतत् सलिलदुर्गनगरमिति अपि शास्त्रज्ञैः वदन्ति। इदमेव द्वीपदुर्गमिति अपि केचित् कथयन्ति। मानसारग्रन्थानुसारम् –

**समुद्रैश्च नदीभिश्च संवृतं जलदुर्गकम्।।** [३६५]

इति मानऋषि: अपि दर्शयति। मयमतानुसारमपि –

**नद्यब्धिपरिवृतं यज्जलदुर्गं ............।।** [३६६]

इति लिखितं दृश्यते। तथा शिल्परत्नग्रन्थेऽपि यथोक्तम् –

**नद्यब्ध्यावृतकं यज्जलदुर्गं ............।।** [३६७]

इति उल्लेखो प्राप्यते।

---

364 विश्वकर्मवास्तुशास्त्रम्, अ.१०.१२

365 मानसार, १०.४९

366 मयमतम्, अ.१०.३८

367 शिल्परत्न, ५.१४

रामायणेऽपि –

**नादेयं पार्वतं वान्यं कृत्रिमं च चतुर्विधम्।** [३६८]

इति वर्णनं प्राप्यते। लङ्कानगरं तथा द्वारिकानगरं जलदुर्गस्य उत्तममुदाहरणं वर्तते। यथा राजवल्लभग्रन्थेऽपि सूत्रधारमण्डनः लिखति यत् –

**दुर्गं पश्चिमसागरे च हरिणाऽन्येषां किमत्रोच्यते।** [३६९] इति।

आचार्य कौटिल्यः एतत् जलदुर्गस्य **औदक-दुर्गम्** इति व्याख्या कृत्वा आपतकाले जनपदस्य सुरक्षार्थमुपयुक्तं भवति इति कथयति। [३७०] तथा विश्वकर्मवास्तुशास्त्रग्रन्थे जलदुर्गस्य मध्यभागे राजनिवेशनं तथा अन्येषाम् अमात्यादीनाम् आवास-भवनानि निर्मितव्यानि तथा अन्येषां भवनानि अनुकूलेन स्थापनीयानि इति निर्दिष्टानि। तथा दुर्गस्य अन्तः चतुर्दिक् अस्त्र-शस्त्रादि उपकरणाणि युक्तं सेनानां निवेशनमपि करणीयमिति दर्शितम्। यथा हि –

**मध्यस्थराजभवनममात्यादिस्थलोज्जलम्।**

**स्थलानुकूलतः स्थाप्यमन्यवासादिकं पुनः।।**

**सेनावासं ससम्भारं स्थापयेच्च समन्ततः।**

**ससालं सहितं वीरैर्यामिकैस्तटरक्षकैः।।** [३७१]

**(२) पङ्कदुर्गम्** –

यत् दुर्गं चतुर्दिक् पङ्केन परिवेष्टितं सुरक्षितं भवति स दुर्गः यथा नाम **पङ्कदुर्गम्** इति नाम्ना विख्यातम्।

---

368 वाल्मीकि रामायणम्, युद्धकाण्ड, सर्ग-३.२०

369 राजवल्लभ, (नारायभारती) अ.४.२

370 अर्थशास्त्रम्, अधिकरण-२, अ.३

371 विश्वकर्मवास्तुशास्त्रम्, अ.१०.१४-१५

मानसारग्रन्थानुसारम् –

**पर्वतं (त) कन्दरैर्युक्तं दुष्प्रवेशं च शत्रुभिः।**

**दुर्गं तु कृत्वा नृपतिस्तिष्ठेत्तत्पङ्कदुर्गकम्।।** [३७२]

अर्थात् पङ्केन सह पर्वतकन्दरैर्युक्तं सुरक्षितं स्यात् तथा शत्रुभिः दुष्प्रवेशं स्यात्। मयमतम् इति ग्रन्थेऽपि —

**पङ्कयुतं पङ्कदुर्गं स्यात्।** [३७३]

तथा शिल्परत्नग्रन्थेऽपि यथोक्तम् —

**जलं चेज्जलदुर्गं पङ्कयुक्तं वा।।** [३७४] इति वर्णितं दृश्यते।

**(३) वनदुर्गम्** –

वनमध्ये नगरनिर्माणं क्रियते, तन्नगरं परितो विभिन्नं कण्टकयुक्त लताभिः परिवेष्टितमस्ति। नगरं परितो वनरूपि दुर्गः स्यात् इति वनदुर्गम्।

विश्वकर्मवास्तुशास्त्रग्रन्थानुसारं वनमध्ये विरचितं दुर्गं वनदुर्गम् इति वनदुर्गस्य परिभाषा। यथा –

**वनमध्यगतं दुर्गं वनदुर्गमुदीरितम्।** [३७५]

समराङ्गणसूत्रधारग्रन्थस्य मतानुसारम् –

**कण्टकिद्रुमनीरन्ध्रनद्धे साम्भसि कानने।**

---

372 मानसार, १०.४६

373 मयमतम्, अ.१०.३८

374 शिल्परत्न, ५.१४

375 विश्वकर्मवास्तुशास्त्रम्, अ.१०.६

**गूढ प्रवेशमार्गे भूर्भूलदुर्गेति कीर्तिता।।**[३७६]

वनदुर्गस्य निवेशनम् एतादृशं करणीयं यत् तस्य प्रवेशमार्गः अत्यन्तं गूढः भवेत् तथा तत्र कण्टकद्रुमानाम् आधिक्यं वर्तन्ते च जलाशयाः अपि तत्र स्थिताः वर्तन्ते।

अर्थशास्त्रे वनदुर्गस्य द्वौ प्रभेदौ वर्णितं वर्तते। यथा हि –

**खञ्जनोदकं स्तम्भगहनं वा वनदुर्गम्।**[३७७]

खञ्जनोदकं स्तम्भगहनं च इति वनदुर्गस्य द्वौ प्रभेदौ आचार्य कौटिल्यस्य मतानुसारम्। खञ्जनम् अर्थात् नगरं चतुर्दिक् सघन कण्टकद्रुमैः परिवेष्टितमस्ति तथा उदकस्य अभावः तत्र न वर्तते, भूः पङ्कयुक्ता वा भेजयुक्ता ( ?) वर्तते। एतावत् लक्षणयुक्तं दुर्गं खञ्जन वनदुर्गम् इति प्रख्यातम्। स्तम्भगहनम् अर्थात् जलाशयेन सह बृहद्– उन्नतवृक्षैः सुशोभितमस्ति इति स्तम्भगहनवनदुर्गमिति विख्यातम्। मनुस्मृत्यां मनुः वनदुर्गं **वार्क्षदुर्गम्**[३७८] इति कथ्यते। वार्क्ष अर्थात् घनैः वृक्षैः परिवेष्टितं दुर्गं इति वार्क्षदुर्गम्। एतस्य दुर्गस्य उल्लेखं रामायणे अपि **वान्यदुर्गम्**[३७९] इति संज्ञारूपेण प्राप्यते। एतत् दुर्गं वनपालानां सुरक्षाहेतु अधिकमुपयोगी भवति। आपत्काले राज्ञः अपि तत्र गत्वा आत्मरक्षा कर्तुं शक्यते। यथा –

**वनदुर्गमटवी स्थानं आपद्यपसारो वा।**[३८०]

---

376 समराङ्गणसूत्रधार, (शुक्ल), १०.३८

377 अर्थशास्त्रम्, अधिकरण–२, अ.३

378 मनुस्मृति, अ.७.७०

379 वाल्मीकि रामायणम्, युद्धकाण्ड, सर्ग–३.२०–२१

380 अर्थशास्त्रम्, अधिकरण–२, अ.३

विश्वकर्मवास्तुशास्त्रेऽपि वनदुर्गस्य – **उर्ध्वं भूमिभागस्थमन्तस्थं चेति तत्त्रिधा।** [३८१]

यथा दुर्गन्तावत् उर्ध्वदुर्गं, भूमिभागस्थदुर्गम्, अन्तदुर्गमिति त्रिधाः प्रभेदाः विवेचिताः।

उर्ध्वदुर्गम् उन्नतभूमौ स्थितं तथा शिलादि मृत्तिकाभिः परिवेष्टितमस्ति। यथा हि –

**उर्ध्वं तुङ्गभूमिस्थं** .................।

**शिलापरम्परातुङ्गभागस्थे दृढभर्त्तिके।** [३८२]

भूमिभागस्थ वनदुर्गस्य निर्माणं समतलभूमौ कृत्वा तस्य परितो उन्नतप्राकारैः परिवेष्टितं कार्या। यथा हि –

......... **.भूमिस्थं भूतलाश्रितम्।** [३८३]

**तलाश्रितं तु यद्दुर्गं तुङ्गप्रकारसंयतम्।।** [३८४]

तथा अन्तस्थवनदुर्गं भूम्याः अधः सुरङ्गादिमार्गस्थ स्थितं अन्तदुर्गमिति प्रख्यातम्। यथा हि–

**सुरङ्गाश्रितमन्तस्थं बोध्यं शिल्पपरायणैः।।** [३८५]

तथा तत्र –**सुरङ्गादुर्गके स्थाप्यं योधायुधधनादिकम्।।** [३८६] इति अपि आचार्य विश्वकर्मणः दर्शयति। शिल्परत्नग्रन्थेऽपि वनदुर्गस्य निर्माणविषये –

---

381 विश्वकर्मवास्तुशास्त्रम्, अ.१०.६

382 विश्वकर्मवास्तुशास्त्रम्, अ.१०.७–८

383 विश्वकर्मवास्तुशास्त्रम्, अ.१०.७

384 विश्वकर्मवास्तुशास्त्रम्, अ.१०.१०

385 विश्वकर्मवास्तुशास्त्रम्, अ.१०.७

386 विश्वकर्मवास्तुशास्त्रम्, अ.१०.१०

**निर्जल (तल ?) तरुवनगहनं वनदुर्गम् ........।** [३८७] इति दर्शितम्।

**(४) इरिणदुर्गम्** –

यत् दुर्गं मरुस्थले निर्माणं क्रियते एवं तत्र मरुभूम्या कारणात् प्रवेशः दुर्गमं भवति तत् दुर्गं **'इरिणदुर्गम्'** इति ज्ञायते। मनुस्मृत्यां तस्य **'धन्वदुर्गम्'** [३८८] इति संज्ञा दत्तम्। कौटिलीय अर्थशास्त्रानुसारम् –

**.......निरुदकस्तबमिरिणं वा धान्वनम्।** [३८९]

इरिणदुर्गस्य निर्माणं एतावत् स्थानोपरि कर्तव्यं यत् तत्र दुर–सुदुर पर्यन्तं जलस्याभावमेवं शस्य तथा छायायाः अभावः एव वर्तते तथा शत्रुसैन्यानां कृते पेयजलादीनामसुविधाः, अभावः एव वर्तन्ते। जलवृक्षशस्यादीभिः पूर्णतः रहित स्थानोपरि निवेशितं दुर्गं **'निरुदकदुर्गम्'** इति कथ्यते। विश्वकर्मवास्तुशास्त्रग्रन्थानुसारम् –

**सलिलेस्तरुषण्डैश्च लताद्यैश्च विवर्जिते।** [३९०]

यत् दुर्गं जलैर्वृक्षैर्लताभिश्च वर्जितं भवति तत् दुर्गम् इरिणदुर्गमिति उच्यते। तथा इरिणदुर्गं प्राणिभिर्दुष्प्रवेश्ये तुङ्गे वा निम्ने स्थले सोपानपंक्तिरचना समन्वितं कल्पनीयम्। शत्रुसैन्य द्वारा दुर्लङ्घ्यमेवम् अभेद्यं कुर्यात्। तस्य चतुर्दिक् परितो परिखा एवं विस्तृत शालाभिः अपि संयुक्तं कार्या। यथा हि –

**दुष्प्रवेशे स्थले तुङ्गे सोपानानिसमन्विते।।**

---

[387] शिल्परत्न, ५.१३

[388] मनुस्मृति, अ.७.७०

[389] अर्थशास्त्रम्, अधिकरण–२,अ.३

[390] विश्वकर्मवास्तुशास्त्रम्, अ.१०.१६

**निम्ने वाऽथ स्थले क्लृप्तमिरिणं दुर्गमिष्यते।**

**दुर्लङ्घ्यामरिसेनाभिरभेद्याश्च समन्ततः।।**

**परिखां पृथुसालाश्च कल्पयेच्छिल्पकर्मवित्।**[391]

तत्र राजवेश्म, यथा स्थाने मन्त्रिभवनं तथा अस्त्र–शस्त्रादिकमेवं यन्त्रैः संयोजित सेनाभवनस्य स्थापना अपि करणीयम्।[392] मयमतम् इति ग्रन्थेऽपि –

**...........निर्वनोदमिरिणं स्यात्।**[393] इति उल्लेखो दृश्यते। तथा शिल्परत्नग्रन्थेऽपि –

**अक्षयजलत(रु) विपुलैरणगहनसालमैरणं प्रोक्तम्।**[394]

अतः जल तथा वृक्षादीनां रहित मरुस्थले तस्य स्थानं दर्शितम्।

**(५) गिरिदुर्गम् –**

यत् दुर्गं गिरिशिखरोपरि वा पर्वतस्य समीपस्थे वा पर्वताश्रितम् अर्थात् नगरस्य चतुर्दिक् पर्वताः स्थिताः वर्तन्ते वा गिरिगह्वरे स्थितं दुर्गं **'गिरिदुर्गम्'** इति नाम्ना विख्यातम्। समराङ्गणसूत्रधारग्रन्थानुसारम् –

**दुरारोहतया दुर्गे टङ्कच्छिन्न इवान्ततः।**

**समपृष्ठेन्दुयुक्तेऽद्रौ गिरिदुर्गावनिर्भवेत्।।**[395]

---

391 विश्वकर्मवास्तुशास्त्रम्, अ.१०.१६–१८

392 विश्वकर्मवास्तुशास्त्रम्, अ.१०.१९–२०

393 मयमतम्, अ.१०.३८

394 शिल्परत्न, ५.१५

395 समराङ्गणसूत्रधारः, अ.१०.३७

एतत् गिरिदुर्गम् अत्यन्तं दुरारोहम्, एकमेव लघु प्रवेशमार्गयुक्तं, वृक्षैः युक्तं तथा टङ्कच्छिन्नमस्ति। एतादृशं दुर्गं किष्किन्धायाः दुर्गमस्ति। विश्वकर्मवास्तुशास्त्रम् इति ग्रन्थेऽपि एतस्य निवेशस्थानं दर्शितम्। यथा हि –

**गिरिदुर्गमिति प्रोक्तं मुनिभिश्शास्त्रपारगैः।।** [३९६]

गिरिदुर्गस्य स्थानं पर्वतस्य पाद–प्रदेशे, पर्वतस्य मध्यभागे वा पर्वतस्य शिखरोपरि भवति। एतादृशा पर्वतस्य त्रिभागोपरि निवेशयोग्यता कारणात्मानसारग्रन्थे तेषां त्रिधा उपभेदाः दर्शिताः। यथा हि –

**पर्वतावृत(तन्) मध्ये (च) पर्वतस्य समीपके।।**

**पर्वताग्रप्रदेशे तु गिरिदुर्गमिति त्रिधा।** [३९७]

तथा मयमतम् इति ग्रन्थे अपि यथोक्तं गिरिदुर्गस्य स्थानं दर्शितम्। यथा –

**गिरिमध्यं गिरिपार्श्वं गिरिशिखरं पार्वतं दुर्गम्।** [३९८]

यथोक्तं शिल्परत्नग्रन्थे[३९९] अपि गिरिदुर्गस्य त्रीणि स्थालानि दर्शितम्। एतस्य दुर्गस्य निवेश्य स्थालाधारेण त्रिभेदाः प्रवर्तन्ते– गुहास्वरूपम्, गिरिपार्श्वम् तथा प्रान्तरम्। गुहा वा गह्वर संज्ञक पार्वतदुर्गस्य चतुर्दिक् परितो गिरिश्रृङ्खला स्थितमस्ति। राजवल्लभवास्तुशास्त्रग्रन्थे अपि –

---

396 विश्वकर्मवास्तुशास्त्रम्, अ.१०.१९–२०

397 मानसार, १०.४६–४७

398 मयमतम्, अ.१०.३७

399 शिल्परत्न, ५.१३

.............**दुर्गं भवेद् गह्वरे।**[४००] इति उल्लेखो विद्यते। उदाहरणम् इडरनगरं (गुजराते) गिरिगह्वरे स्थितमस्ति।

गिरिपार्श्व गिरिदुर्गं पर्वतस्य समीपस्थ प्रदेशे स्थितमस्ति तथा प्रन्तरदुर्गं गिरिशिखरोपरि निवेष्टितमस्ति। एतस्य दुर्गस्य प्रवेशमार्गः गुप्तः अस्ति। उदाहरणम् – कैलाशनगरम्।

गिरिदुर्गं अन्यदुर्गाणामपेक्षया अत्यधिकं सुरक्षितं मन्यते। कारणं शत्रुसैन्यानां यत्र आक्रमणम् अत्यन्तं कठिनं भवति तथा नगरस्य (दुर्गस्य) रक्षक सैन्यः शत्रुसैन्योपरि सरलतया आक्रमणं कर्तुं शक्नोति स्वस्य सुरक्षा अपि कर्तुं शक्नोति। सम्भवतः एतत् कारनात् सर्वदुर्गानामपेक्षया गिरिदुर्गं प्रशस्तं मन्यते। एतत् कारणात् राजवल्लभग्रन्थस्य रचयिता सूत्रधारमण्डनः अपि गिरिदुर्गमुत्तममिति कथयति यत् –

**भूदुर्गं जलदुर्गमद्रिविषये दुर्गं भवेत् गह्वरे।**

**तेषाामुत्तममद्रिमूर्ध्नि रचितं तद्वैरिणां दुर्गमम्।।**[४०१]

तथा समराङ्गणसूत्रधारग्रन्थेऽपि –

**सर्वेषामेव दुर्गाणां पार्वतीयं प्रशस्यते।**[४०२]

मनुस्मृत्यामपि गिरिदुर्गस्य प्रशंसा प्रवर्तते। यथा हि –

**सर्वेण तु प्रयत्नेन गिरिदुर्गं समाश्रयेत्।**

**एषां हि बाहुगुण्येन गिरिदुर्गं विशिष्यते।।**[४०३]

---

400 राजवल्लभवास्तुशास्त्रम्,(जुगनू), अ.४.३

401 राजवल्लभवास्तुशास्त्रम्,(जुगनू), अ.४.३

402 समराङ्गणसूत्रधारः, अ.९.४०

403 मनुस्मृति, ७.७१

तथा मत्स्यपुराणेऽपि गिरिदुर्गं श्रेष्ठं कथितम्। यथा हि –

**सर्वेषामेव दुर्गाणां गिरिदुर्गं प्रशस्यते।** [४०४]

कौटिल्यः अपि आपत्काले गिरिदुर्गमेव उत्तमं रक्षास्थानं भवति इति कथयति। यथा–

**तेषां नदीपर्वतदुर्गं जनरक्षस्थानं।** [४०५]

शुक्राचार्यः अपि गिरिदुर्गं श्रेष्ठ कथयति। यथा हि –

**पारिखादैरिणं श्रेष्ठं पारिघं तु ततो वनम्।**

**ततो धन्वजलं तस्माद् गिरिदुर्गं ततः स्मृतम्।।** [४०६]

पारिखदुर्गतः श्रेष्ठम् ऐरिणदुर्गं, ऐरिणदुर्गतः परिघदुर्गं, ततो श्रेष्ठं वनदुर्गं तथा वनदुर्गतः श्रेष्ठं धन्वदुर्गं, धन्वदुर्गतः श्रेष्ठं जलदुर्गमस्ति परन्तु एतेषां सर्वेषां दुर्गाणां श्रेष्ठं गिरिदुर्गं स्यात् इति शुक्राचार्यः अपि कथयति।

विश्वकर्मवास्तुशास्त्रग्रन्थेऽपि भगवन् विश्वकर्मणः मतानुसारम् –

**मध्यस्थदेवप्रासाददेवमन्दिरभूषितम्।**

**मन्त्र्यादिपरिवाराणां भवनाद्यैस्समन्वितम्।।** [४०७]

यथा गिरिदुर्गस्य मध्ये देवप्ासादस्य एवं देवमन्दिरस्य निवेशनं कार्यं तथा तस्य प्रवेशमार्गः पूर्वाभिमुखं वा उत्तराभिमुखं स्थापनीयम्। यथा हि –

**प्राचीमुखं प्रकर्तव्यमथतोत्तरदिङ्मुखम्।** [४०८]

---

404 मत्स्यपुराणम्, अ.२१७.७

405 अर्थशास्त्रम्, अधिकरण–२,अ.३

406 शुक्रनीति,(ब्रह्मशङ्कर मिश्र), ४.६.६

407 विश्वकर्मवास्तुशास्त्रम्, अ.१०.४

**(६) महीदुर्गम् –**

महीदुर्गं मानवसर्जितकृत्रिमदुर्गमस्ति। एतत्दुर्गं परिखा–वप्र–प्राकार युक्तमस्ति। तस्य विन्यासं मृत्तिकाभिः वा प्रस्तरैः वा इष्टिकाभिः क्रियते।

समराङ्गणसूत्रधारग्रन्थे एतस्य उल्लेखः प्राकार- परिखायुक्तं दुर्गरूपेण विद्यते।[४०९] सम्भवतः तस्य भित्तयः बृहद्, विस्तृतमस्ति, तस्योपरि सैनिकाः विचरणं कृत्वा बाह्य गतिविधिनामोपरि ध्यानं दातुं शक्यते। महीदुर्गस्य विवेचनं मस्त्यपुराणे, अग्निपुराणे, युक्तिकल्पतरु इत्यादिषु ग्रन्थेषु प्राप्यन्ते।

महीदुर्गस्य निवेशनं पर्वत–वन रहितं समतल भूमौ भवति। तत्र परिखासु क्रुर जलचर प्राणिः स्थापयित्वा शत्रुणां कृते अगम्यमेवं दुर्लङ्घ्य दुर्गं निर्मापनीयम्। प्रायः एतत् दुर्गस्य अधः सुरङ्गस्य निर्माणमपि क्रियते।[४१०]

तदुपरान्त विश्वकर्मप्रकाशग्रन्थे कृत्रिमदुर्गस्य आकारानुसारेण दश प्रकारस्य वर्णनं प्राप्यते। यथा हि –

**चतुरस्त्रं चतुर्द्वारं वर्तुलं च तथैव च।**
**दीर्घद्वाद्वयाक्रान्तं त्रिकोणमेकमार्गकम्।।**
**वृत्तदीर्घ चतुर्द्वारमर्धचन्द्रं तथैव च।**
**गोस्तनं च चतुर्द्वारं धानुषं मार्गकण्टकम्।।**
**पद्मपत्रनिभं चैव (च्छ)छत्राकारं तथैव च।**

---

[408] विश्वकर्मवास्तुशास्त्रम्, अ.१०.५

[409] समराङ्गणसूत्रधारः , अ.१०.३९

[410] युक्तिकल्पतरु, द्वन्द्वयुक्ति–१९.१२९

**दशप्रकाराणि मया प्रोक्तानि द्विजपुङ्गव।।** [४११]

अर्थात् दुर्गाणां दश प्राकारा: निम्नोक्तरूपेण आचार्य विश्वकर्मण: दर्शयति। यत्

(१) चतुर्दिक् चतुर्द्वारयुक्तं चतुरस्त्र दुर्गम्।

(२) दीर्ध द्वि द्वारयुक्तं वृत्ताकारदुर्गम्।

(३) एकमार्गयुक्तं त्रिकोणाकार दुर्गम्।

(४) दीर्ध चतुर्द्वारयुक्तं वृत्ताकार दुर्गम्।

(५) अर्धचन्द्राकार दुर्गम्।

(६) चतुर्द्वारयुक्तं गोस्तनाकार दुर्गम्।

(७) धनुषाकार दुर्गम्।

(८) मार्गकण्टक दुर्गम्।

(९) पद्मपत्राकार दुर्गम्।

(१०) छत्राकार दुर्गम्।

**►दुर्गस्योपरिकोष्ठरचना –**

सूत्रधारमण्डनस्य मतानुसारं दुगस्योपरि कोष्टरचना निम्नदर्शितमानेन करणीयम्। यथा हि –

**प्राकारेऽपि च कोष्ठका दशकरा: सूर्येन्द्रहस्तास्तथा**

**प्रोक्तास्तेन समैव कोणसहिता विद्याधरी मध्यगा।**

**तस्यां वाथ सुवृत्तके च विविधं युद्धासनं कारयेत्**

**प्राकारोदयतो विधेयपरिखा विस्तार उक्तो बुधै:।।** [४१२]

---

[411] विश्वकर्मप्रकाश, अ.१.६–९

मण्डनस्य मतानुसारं प्राकारे वा दुर्गे कनिष्ठकोष्ठस्य व्यासः दश(१०) गजः, मध्यमकोष्ठस्य मानं द्वादश (१२) गजः, ज्येष्ठकोष्ठस्य व्यासमानं चतुर्दश (१४) गजः च निर्मितव्यम्। द्वौ कोष्ठानामन्तरावकाशे कोष्ठानां प्रमाणेन चतुरस्र एक–एक विद्याधरीणां निर्माणमपि आवश्यकमस्ति। विद्याधरि कोष्ठेषु विविधप्रकारस्य योद्धासनम् (शस्त्रागारम्) अपि निर्मापनीयम्। दुर्गस्य चतुर्दिक् तस्य उदयमानस्य द्विगुणितं विस्तृतं परिखायाः निर्माणं कुर्यात्। विद्याधरीकोष्ठयार्मध्ये ३५ हस्तस्य अन्तरालं स्थापनीयम्। तस्य प्रमाणस्य पञ्च (५) हस्त न्यूनाधिकं प्रमाणमपि विद्वद्जनैः स्वीकार्यमस्ति।

**► दुर्गोच्चप्रमाणम् –**

दुर्गस्योदय प्रमाणं नव (९) गजः स्थापनीयम्। किन्तु कनिष्ठदुर्गं पञ्चदश (१५) हस्त, मध्यमदुर्गं सप्तदश (१७) हस्त तथा ज्येष्ठदुर्गं एकोनविंशति (१९) हस्त उदयमानेन कुर्यात् इति केचित् वास्त्वाचार्याणां मतानि सन्ति। एतावत् कनिष्ठदुर्गस्य विस्तारः अष्ट (८) हस्त, मध्यमदुर्गस्य दश (१०) हस्त एवं ज्येष्ठदुर्गस्य विस्तारः द्वादश (१२) हस्त प्रमाणेन कर्तव्यम्। यथा हि –

**दुर्गोदयं नन्दकरप्रमाणं तिथ्या समं सप्तदशैव केचित्।**
**एकोनविंशत् ( ?) पृथुलं त्रयाणां**
**दिक्पा(का ?) लसूर्याष्टकरं (रां ?) वदन्ति।।** [४१३]

दुर्गस्य निर्माणे हस्त वा गजमानं स्वीकर्तुं शक्यते।

**► दुर्गे संग्रहणीय सामग्रीः-**

---

412 राजवल्लभवास्तुशास्त्रम् (जुगनू), अ.४.१५

413 राजवल्लभवास्तुशास्त्रम्,(जुगनू), अ.४.१७

दुर्गे जलखाद्यसामग्रीणां प्रबन्धं पर्याप्तरूपेण आवश्यकमस्ति। तत्र बृहद् वर्षाकाले जलस्य संग्रहणमपि भवेत् एतादृशस्य तत्र जलकुण्डस्य निर्माणमपि कार्यम्। शत्रुसैन्यानाम् आक्रमणकाले दुर्गे निवासिजनानां कृते जलस्य आपूर्ति सरलतया भवेत्। प्रायः दुर्गे जीवन–यापनस्य सर्व सुविधा सुलभतया उपलब्धं कुर्यात्।[४१४]

राजवल्लभग्रन्थे सूत्रधार मण्डनस्य मतानुसारं दुर्गे संग्रहणीय सामग्री निम्नोक्तं सन्तिऽ यथा हि –

**अन्नाद्यैः घृततोयतैललवणैः काष्ठैस्तृणाद्यैस्तथा।**

**यन्त्रोपस्करबाणशस्त्रसुभटैः सम्पूरयेद् भूपतिः।।**[४१५]

अर्थात् दुर्गे नित्यमन्नं, दुग्धं, घृतं, जलं, तैलं, लवणं, काष्ठं, तृणं, यन्त्र सम्बन्धितं सामग्री, बाणाः इत्यादि च शस्त्रमेवम् उत्तमं सुभटैः परिपूर्णं करणीयम्।

► **दुर्गनिर्माणफलम् –**

**वापीकूपतडागदेवभवनान्यारामयागादिकं**

**तीर्थानामवगाहनं च विधिवत् कन्याप्रदानादिकम्।**

**सर्वं पुण्यमिदं नृपः स लभते यः कारयेत्पर्वते**

**दुर्गं सर्वजनाय शर्मजननं विश्राममेकं परम्।।**[४१६]

अर्थात् दुर्गस्य अन्तः नगरे निवसितानां सर्वजन हिताय शत्रुभयरहिताय पर्वतोपरि अत्याधिकं विश्रामप्रदायकं दुर्गस्य निर्माणं यः भूपालः वापी–कूप–तडाग–देवप्रासाद–उद्यान–

---

[414] हिन्दीविश्वकोश, खण्ड–३,पृ–१५–१६

[415] राजवल्लभवास्तुशास्त्रम्,(जुगनू), अ.४.३

[416] राजवल्लभवास्तुशास्त्रम्,(जुगनू), अ.४.१

यज्ञस्थलादीनां निर्माणस्य फलमेवं तीर्थस्नानादीनां पुण्यफलं तथा कन्यादानादीनां सर्वप्रकाराणां पुण्यफलस्य प्रााप्तिं सः नृपः लभ्यते।

**►साम्प्रतिकाले दुर्गस्य उपादेयता –**

मनुष्याणां रक्षात्मक साधनेषु प्राचीनकालादारभ्य आधुनिककालस्य प्रारम्भ पर्यन्तं दुर्गाणां मानवीय इतिहासे सर्वत्र अत्यन्तं महत्त्वपूर्ण भूमिकायाः निर्वहणं दृश्यते।

दुर्गस्य महत्तायाः प्रतिपादनं कृत्वा आचार्य मनुः कथयति। यत् –

**एकः शतं योधयति प्राकारस्यो धनुर्धरः।**
**शतं दशसहस्त्राणि तस्माद् दुर्गं विधीयते।।**[४१७]

यथा दुर्गे स्थितः एकः धनुर्धरः शतं धनुर्धारिणां तथा शतं धनुर्धराः एकसहस्त्रं धनुर्धारिणां योधयन्ति। अतः राज्ञा दुर्गनिर्माणं परमावश्यकमासीत्। दुर्गनिर्माणं द्वि प्रकारेण भवति- स्थायी तथा अस्थायी। इष्टका, प्रस्तर, वज्रलेप(क्रोंक्रीट), द्वारा निर्मित परिखा, वप्र,प्राकार, विभिन्न बन्ध सैन्यावास युक्तं दुर्गं स्थायी दुर्गं प्रख्यातम्। शत्रुभिः आक्रमण सम्भावने किञ्चितकाल पर्यन्तं निर्मित दुर्गम् अस्थायी दुर्गं ज्ञातम्। साम्प्रतिकाले अपि अस्थायी दुर्गे गुप्तता (गोपनं) एवं छद्मावरणमावश्यकमस्ति।

प्राचीन राजाशाही युगे युद्धकाले आक्रमणस्य अपेक्षया प्रतिरक्षा- सुरक्षायाः अधिकतमं महत्त्वमासीत्। तत्काले स्थायी दुर्गनर्माणोपरि अधिकतया महत्त्वं ददाति स्म। दुर्गे आवागमनकर्ता प्रत्येक जनानां योग्य परीक्षा भवति स्म, अनन्तरं सः व्यक्ति आवागमनं कर्तुं शक्यते स्म तथा तस्य आवागमनस्य कारणमीत्यादीनां लेखनमपि भवति स्म। तोपस्य आविष्कार पूर्वं मध्ययुगकालिक दुर्गाणि अभेद्यानि आसन्। तत्काले प्रतिरक्षायाः अभिप्रायः

---

[417] मनुस्मृति, अ.७.७४

पराजयस्य यथा सम्भवः अधिकाधिक दिनानि पर्यन्तं दूरं नयेत् इति। परन्तु नूतनशस्त्राणाम् आविष्कारे युद्धविज्ञाने नूतना क्रान्ति जाता। तत् फलस्वरूपे दुर्गनिर्माणे अधिकतमं परिवर्तनमभवत्। द्वितीय विश्वयुद्धकाले प्रबलतमं–सुदृढं दुर्गाणां ध्वंशः नाशः कर्तुं शक्यते एतादृशा शस्त्राणां निर्माणमभवत्। **फायर–शक्ति, टेन्क** एवं **छत्रधारी** सैन्यानां कारणात् अधुना स्थायी दुर्गाणां महत्त्वं नासीत्। आधुनिक यन्त्रयुगस्य प्रारम्भ पर्यन्तं तस्य उपयोगः भवति स्म।

वर्तमान समये प्राचीन दुर्गं परित्यक्तमासीत्। अधुना एतत् निर्जनम् ऐतिहासिकं स्मारकमेव अस्ति। दुर्गस्य मुख्य सम्बन्धः युद्धैः अस्ति किन्तु आधुनिककाले युद्धविधाने आमूल परिवर्तनं जातम्। आक्रमणस्य नूतन साधनानाम् आविष्कारेन सह मानवरक्षायाः उपायाः अपि परिवर्तिताः। अतः आधुनिक समये कस्यापि भूभागोपरि नैसर्गिक रक्षात्मक शक्त्याः वृद्ध्यर्थ अर्थं दुर्गनिर्माणमेव एकमुपायमस्ति। अतः देशस्य सीमासु प्राकृतिक दुर्गः अस्ति तदा तत् दुर्गद्वारा भूमियुद्धे तत् देशस्य सैन्यानां सुरक्षा भविष्यति। नैसर्गिक दुर्गमध्ये नगर विन्यासं दुर्गनिवेशस्य परिष्कृतरूपं कथयितुं शक्यते। अस्माकं भारतदेशे इशानोत्तरे हिमालयरूपी गिरिदुर्गं स्थितमस्ति, पूर्वे, पश्चिमे, नैऋत्ये, वायव्ये समुद्ररूपी जलदुर्गं स्थितमस्ति। तद् द्वारा अस्माकं देशस्य प्राकृतिकरुपेण सुरक्षा भवति।

## १४. नगरे विविध व्यवहारसम्बन्धिनी आवश्यकभवनानि –

### ▶ नगरे आपणविचारः –

जनानां प्रतिदिनस्य जीवनोपयोगिवस्तुनां क्रय–विक्रय हेतवे सर्वेषु ग्रामेषु नगरेषु आपणस्य महत्त्वमतीव वर्तते। मयमतम् इति ग्रन्थे आपणस्य वर्णनं मयाचार्येण कृतम्। यथा हि –

........... **वक्ष्येऽहं चान्तरापणकम्।**

**परितो रथपथसंयुक्तं मध्ये वणिजानां गृहश्रेणी।**[४१८]

आपणं रथपथसंयुक्तं कृत्वा मध्ये वणिजानामावासाः स्थापनीयाः। नगरे ब्रह्मस्थानावृतमार्गस्योपरि ताम्बूलं, सारान्वितद्रव्याणि, फलश्च इत्यादीनामन्तरापणं स्थापनीयम्।[४१९] राजवल्लभवास्तुशास्त्रग्रन्थे सूत्रधारमण्डनः किञ्चित् भिन्नं कथयति –

**ताम्बूलं फलदन्तगन्धकुसुमं मुक्तादिकं यद्भवेत्।**

**राजद्वारसुराग्रतो हि सुधिया कार्यं पुरे सर्वतः।।**[४२०]

मण्डनस्य मतानुसारं राजद्वारस्य एवं देवालयस्य समीपे ताम्बूलं, फलं, गजदन्तः, सुगन्धितपदार्थाः, पुष्पं तथा मुक्तादिकं च इत्यादीनां हाटकं कार्यम्।

अपराजितपृच्छायामपि अन्तरापणस्य वर्णनं विद्यते। ग्रन्थकारस्य मतानुसारेण यत्र अधिकं जनानामावागमनं भवति तत्र प्राच्यां स्वर्णकाराणां, सुगन्धितपदार्थानां व्यापारिकाणां, दन्तकर्मकराणां तथा अन्नागारस्य स्थानानि स्थापनीयानि। अपराजितपृच्छायामपि राजभवनस्य सम्मुखे ताम्बूलं, फलं, पुष्पमालादीनां, ˙ तथा तत्रैव अन्यपदार्थानामापणं स्थापनीयमिति दर्शितम्। ताम्बूलस्य एवं पूगीफलस्य हाटकं देवतायतनस्य समीपे स्थापनीयम्। दक्षिणदिशायां लोहपदार्थानां, शस्त्रं, मयुरपिच्छस्य तथा कृष्णवर्णस्य रक्तवर्णस्य च वस्त्रादीनां हाटकं निर्मितव्यम्। ईशानकोणे वस्त्राणाम्, आग्नेयां लघुवस्त्राणां, पूर्वदिशायां श्वेतवस्त्राणामापणं करणीयम्। अन्नस्य आपणं नगरस्य सर्वदिक्षु स्थापनीयम्। रजकानां स्थानानि स्वस्य देवावासस्य समीपस्थानि प्रशस्तानि भवन्ति।[४२१]

---

[418] मयमतम्, अ.१०.७७–७८

[419] मयमतम्, अ.१०.८०

[420] राजवल्लभ,(डॉ.शैलजा), अ.४.१८

[421] अपराजितपृच्छा, ७२.३२–४०

नगरे ईशानकोणे ईशतः इन्द्रस्य पदपर्यन्तम् अन्तरापणस्य स्थापनं करणीयम्। तत्रैव मत्स्यमासं, शुष्कपदार्थाः शाकश्च विज्ञेयम्। यथा हि -

**ईशानादिमहेन्द्रद्वारान्तं चान्तरापणकम्।**

**तत्रैव मत्स्यमासं शुष्कं शाकश्च विज्ञेयम्।।** [४२२]

महेन्द्राद्यग्न्यन्तं भक्ष्यं भोज्यं च पदार्थानाम् आपणम्, अग्नितः गृहक्षतपर्यन्तं तत्र भाण्डानामापणकं निर्दिष्टम्। गृहक्षतस्य पदतः निर्ऋतिपदान्तं कांस्यादिधातूभिः निर्मितपदार्थानामापणं स्थाप्यम्। पितृभागतः पुष्पदन्तस्य भागान्तं वस्त्राणामापणं स्यात्। तस्मात् समीरणान्तं तण्डुलधान्यादिकं कटं च स्यात्। वायुतः भल्लाटपदान्तं वस्त्रकादीनामापणं तथा तत्रैव लवणादिद्रव्याणामेवं तैलादिकानां हाटकं कार्यम्। तस्मादीशपदान्तं गन्ध–पुष्पादिकानामापणं विहितम्। [४२३] तथा–

**माञ्जिष्ठं तु मरीचं पिप्पलकं चापि हारिद्रम्।**

**मधुघृततैलादिकमथ भैषज्यं सर्वतः कार्यम्।।** [४२४]

अर्थात् माञ्जिष्ठं, मरीचं, पिप्पलकं, हारिद्रं, मधु, घृतं, तैलं, औषधमित्यादीनामापणं नगरे सर्वत्रं भिन्न–भिन्नस्थलेषु स्थापनीयम्। नगरस्य आभ्यन्तरगतमार्गेष्वथ वस्त्रमेवं रत्नानामापणं निर्मापनीयम्। एतावत् नवप्रकाराणामापणानां

---

[422] मयमतम्, अ.१०.८१

[423] मयमतम्, अ.१०.८२–८५

[424] मयमतम्, अ.१०.८७

वर्णनं मयमतम् इति ग्रन्थे मयऋषिणा वर्णितम्।[४२५] मयाचार्यस्य मतानुसारं पत्तने ऋजुपथे अन्तरापणं न स्थापनीयम्। यथा हि –

**पत्तनमृजुवीथियुतं नैव स्यादन्तरापणम्।**[४२६]

अपराजितपृच्छायामपि अन्तरापणस्य वर्णनं विद्यते। ग्रन्थकारस्य मतानुसारेण यत्र अधिकं जनानामावागमनं भवन्ति तत्र स्थलेषु प्राच्यां स्वर्णकाराणां, सुगन्धित पदार्थाणां व्यापारिकानां, दन्तकर्मकाराणां तथा अन्नागारस्य स्थानानि स्थापनीयानि।

► **नगरे अनुरञ्जनगृहाणि –**

**दीव्यानां मानसी सृष्टिर्गृहेषु पवनेषु च।**
**यथाभावाभिनिर्वर्त्याः कार्या लक्षणाभिहिता क्रिया।।**
**श्रूयतां तद्यथा यत्र कर्तव्यो नाट्यमण्डपः।**
**तस्य वास्तु च पूजा च तथा योज्या प्रयत्नतः।।**[४२७]

गृहस्य उपवनस्य च निर्माणार्थं देवतानां समीपे मानसीशक्ति सन्ति। देवगणः स्वेच्छानुसारं स्वस्य गृहस्य उपवनस्य च निर्माणं मनद्वारा एव कर्तुं शक्यते। अतः तेषां कृते निर्माणविधानस्य आवश्यकता नास्ति। परन्तु मनुष्याणां कृते सर्व कार्याणि शास्त्रनियमानुसारमेव सम्पन्नं भवति। तदर्थं मनुष्याणां आवशयकता एवं लक्षणानुसारम् अनुरञ्जनार्थं नाट्यगृहस्य निर्माणं करणीयम्। एतेन स्पष्टं भवति यत् नाट्यगृहाणाम्

---

425 मयमतम्, अ.१०.८६

426 मयमतम्, अ.१०.९१

427 नाट्यशास्त्रम्, अ.२.४–६

अधिकावश्यकता मनुष्याणां कृते एव अस्ति, देवगणानां कृते न। यथा नाट्यगृहस्य निर्माणमावश्यकमस्ति।

नगरे राजतः सामान्यजनानाम् अनुरञ्जनार्थं नाट्यगृहाणां निर्माणमपि क्रियते स्म। साम्प्रतिकालेऽपि जनानाम् अनुरञ्जनार्थं चलचित्रगृहाणां तथा नाट्यगृहाणां निर्माणं भवति। नाट्यशालायाः अपरनाम रङ्गशाला अपि अस्ति। नाटकप्रदर्शनार्हस्थलविशेषः इति रङ्गशाला। विश्वकर्मवास्तुशास्त्रग्रन्थे रङ्गशालालक्षणकथनात्मकः इति अध्याये नाट्यशाला अर्थात् रङ्गशालायाः लक्षणानि दर्शितम्। यथा हि –

**प्रासादस्य पुरोभागे स्वस्थानस्य तु दक्षिणे।**

**मन्त्रिसेनेशभवनपार्श्वे वा पुरमध्ये।।**

**मध्यसद्मसमीपे वा मेलनस्थानकैऽपि।**

**राजवीथीमुखान्ते वा श्रृङ्गाटकतलेऽथवा।।**[४२८]

रङ्गशाला अर्थात् नाट्यशाला प्रायशः नगरादिषु राजप्रासादस्य पुरोभागे वा मुख्यचत्वरस्थलेषु वा सव्यस्थले वा अपसव्यभागस्थले निर्मापयेत्। अथवा स्वस्थानस्य दक्षिणे स्थापनीयम्। सचिवस्य वा सेनानायकस्य भवनपार्श्वेऽपि समुचिते स्थापनीया इति विश्वकर्मण मतम्। भूपालेन एवं तन्महिष्यादिभिः अपि रूपसेवनदर्शनेन योग्या भवेत् इति राजकीय रङ्गशालायाः स्थापनार्थस्य स्थलनिर्देशस्य अनेन मुख्यतो भावः, तथा पौररङ्गशालायाः स्थापनस्थलं नगरस्य मध्यभागे समुचितस्थले निर्मापयेत्। क्वचित् मध्यसद्मनस्समीपे अपि तां रङ्गशालां कर्तुं शक्यते। नगरेषु राजवीथीनां, महाप्रतोलिकादीनां वा यत्र सम्मेलनं सम्भवति तत्र स्थले अपि तादृशयाः नाट्यशालायाः स्थापनं करणीयम्। किञ्च नगरादिषु देवप्रासादस्य

---

[428] विश्वकर्मवास्तुशास्त्रम्, अ.४९.१–२

पुरोभागे वा मुख्यराजवीथ्यायाः मुखभागे ललाटस्थले वा क्वचित् नगरे श्रृङ्गाटकस्थलसमीपे तामिमां रङ्गशाला स्थापयेत्। श्रृङ्गाकटस्थलमर्थात् पञ्चसंख्याकानां महाप्रतोल्यादीनां मेलनस्थानमिति । तथा –

**रङ्गशालां गीतिशालां मिलितां स्थापयेद्बुधः।**

**देवगन्धर्वमानुषभागत्रयविभाजिताम्।।**

**गीतिशाला नाट्यशाला पृथक्स्थाप्या क्वचित्स्थले।** [४२९]

यथा क्वचित् नगरादिषु राज्ञवाञ्छानुसारं नाट्यशालां, सङ्गीतशालां समुचितस्थले देवभागं, गान्धर्वभागं च मानुषभागं भागत्रयेण संयुतां निर्मापयेत् अथवा तस्मादेव निर्दिष्टस्थलेषु पृथक्पृथक् स्थाप्या इति भगवन् विश्वकर्मणः कथयति।।

भरताचार्य– प्रणित–नाट्यशास्त्रे नगरनिवेशनान्तर्गतं नाट्यगृहनिर्माणस्य वर्णनं विस्तृतरूपेण प्राप्यते। भरताचार्यः विश्वकर्मीयशास्त्रतः प्रेक्षागृहस्य विधानस्य उद्धृतं कृत्वा प्रेक्षागृहस्य त्रि प्रकारान् दर्शयति। यत् –

**इहं प्रेक्षागृहं दृष्टवा धीमतां विश्वकर्मणा।**

**त्रिविधः सन्निवेशश्च शास्त्रत; परिकल्पितः।।** [४३०]

प्रेक्षागृहस्य त्रिधा प्रकाराः वर्तन्ते। विकृष्ट, चतुरस्र, त्रयस्र च।

विश्वकर्माचार्यः नाट्यशालायाः प्रमाणमपि ददाति। यथा –

**चतुर्दण्डं समारभ्य द्विद्विदण्डविवर्धनात्।।**

**विंशद्दण्डान्तकं मानं प्रतिभागं विधीयते।** [४३१]

---

[429] विश्वकर्मवास्तुशास्त्रम्, अ.४९.३–४

[430] नाट्यशास्त्रम्, अ.२.७

अतः रङ्गशालायाः प्रमाणं चतुर्दण्डात् समारभ्य विंशद्दण्डपर्यन्तं प्रतिभागे द्विद्विदण्डविवर्धयित्वा मानं स्वीकरणीयम्। नाट्यगृहाणां परिमाणं हस्तमानेन अपि स्वीकर्तुं शक्यते। भरताचार्यस्य मतानुसारं निम्नदर्शित मानानुसारेण नाट्यगृहस्य निर्माणं करणीयम्। यथा –

**अष्टाधिकं शतं ज्येष्ठं चतुःषष्टिस्तु मध्यमम्।**

**कनीयस्तु तथा वेश्म हस्ता द्वात्रिंशदिष्यते।।**[४३२]

ज्येष्ठ नाट्यशालायाः प्रमाणं अष्टाधिकं शतं (१०८) हस्त, मध्यम्त्चतुःषष्टिः (६४) एवं कनीयस्तु द्वात्रिंशत् (३२)हस्त मानेन निर्मितव्यम्।

मानवानां नाट्यगृहाणां लम्बमानं चतुःषष्टि हस्तमानेन तथा विस्तारः द्वात्रिंशत् हस्तमानेन निर्माणं करणीयम्। तस्याधिकं विस्तृतेन निर्माणं न करणीयम्। कारणं तस्याधिकं विस्तीर्णे तत्र नाटकस्य प्रदर्शने उच्चारितः स्वरः तथा प्रस्तुत नाट्याभिनयम् अस्पष्टं दृश्यते।[४३३]

यथोक्तं समराङ्गणसूत्रधारग्रन्थे राजा भोजः अपि नाट्यशालायाः निर्माणविधानं सप्तषष्टितमे अध्याये विस्तृतं वर्णयति। यथा –

**आयतश्चतुरश्रो वा कर्तव्यो नाट्यमण्डपः।।**

**शतमष्टोत्तरं ज्येष्ठश्चतुःषष्टिकरोऽवरः।**

---

431 विश्वकर्मवास्तुशास्त्रम्, अ.४९.४–५

432 नाट्यशास्त्रम्, अ.२.१०

433 नाट्यशास्त्रम्, अ.२.२१

**कनिष्ठो मण्डपः कार्यो द्वात्रिंशत्करसंमितः।।**[४३४]

यथा राज्ञ:भोजस्य मतानुसारं नाट्यमण्डपः आयताकारः वा चतुरश्राकारः कर्तव्यम्। ज्येष्ठनाट्यशालायाः प्रमाणं शतमष्टोत्तरं करं, मध्यमनाट्यशालायाः मानं चतु:षष्टिहस्तं तथा कनिष्ठो मण्डपः द्वात्रिंशत्करयुक्तं स्थापनीयम्।

महर्षिनारदप्रणीतः सङ्गीतमकरन्दः इति ग्रन्थेऽपि नाट्यशालालक्षणं प्राप्यते। यथा –

**षडशीतिहस्तमात्रचतुरस्त्रसमन्विता।**

**चतुर्विंशतिकस्तम्भनानाचित्रसमन्विता।।**

**नानाविकारसम्मपन्नप्राकारा चित्रशोभिता।**[४३५]

महर्षिनारदस्य मतानुसारमपि नाट्यशालां चतुरश्राकारा निर्मापनीयम्। तस्य मानं षडशीतिहस्तमात्रेण स्वीकरणीयम्। एषा नाट्यशाला भिन्न–भिन्न चित्र–विचित्र मनोहारि चित्रैः सुशोभितैः चतुर्विंशतिस्तम्भयुक्तैः कुर्यात् इति।

विश्वकर्माचार्यः अपि स्थलविभागानुसारेण तस्य मानं भिन्नमपि भवति इति दर्शयति। क्वचित् राजधान्यां रङ्गशालायां मानुषभागे विंशतिदण्डाधिकमपि मानं स्थापनीयम्।

नाट्यगृहविन्यासम् –

**चतुष्षष्टिकरान्कृत्वा द्विधा कुर्यात्पुनश्च तान्।।**

**पृष्ठतो यो भवेद्भागोद्विधो भूतस्य तस्य तु।**

तस्यार्धेन विभागेन रङ्गशीर्षं प्रकल्पयेत्।।

पश्चिमे च विभागेऽथ नेपथ्यगृहमादिशेत्।[४३६]

---

[434] समराङ्गणसूत्रधार, अ.६७.२८–२९

[435] सङ्गीतमकरन्दः, नृत्याध्याये प्रथमः पादः, श्लो. १–२

चतु:षष्टिहस्त लम्बमानस्य भूम्या: द्विभागेन विभाजितं कृत्वा पृष्ठतस्य भागस्य पुन: द्विविभागं करणीयम्। तस्य अग्रभागोपरि रङ्गपीठस्य एवं रङ्गशीर्षण: निर्माणं कार्यम् तथा शेष पृष्ठार्धभागोपरि रङ्गशीर्षस्य पृष्ठे नेपथ्यगृहं स्थापनीयम्।

सङ्गीतमकरन्दग्रन्थानुसारं नाट्यशालाया: मध्ये वेदिकाया: निर्माणं चतुर्विंशतिहस्तमानेन सर्वगुणोपेता नानापरिमलान्विता करणीयम्। तथा एषा रत्नैरेकैर्विविधै:, चामरै:, पटवस्त्रैश्च पताकातोरणैर्युक्ता एवं चतुर्द्वारादि संयुता निर्मितव्या। तथा अनेन विधिना प्रयत्नेन एषा नाट्यशाला सुशोभिता मनोहरा कार्या।[४३७]

**तस्यां मनोहरं रम्यं सिंहासनमनर्ध्यकम्।**

**तदग्रे फलपुष्पाणि स्थापयित्वा विराजितम्।।**[४३८]

नाट्यशालायां मनोहरं रम्यं सिंहासनमपि स्थाप्या एवं तदग्रे फलपुष्पाणि स्थापनीयानि।

विष्णुधर्मोत्तरपुराणेऽपि नाट्यशालाविषयक वर्णनं विद्यते। यथा –

लास्यं स्वच्छन्दत: कार्यं मण्डपे यदि वा बहि:।
नाट्यं मण्डप एव स्यान्मण्डपं द्विविदं भवेत्।।
आयतं चतुरस्त्रं तु द्वात्रिशंद्धस्तसम्मितम्।
चतुरस्त्रं तु कर्तव्यमायतं द्विगुणायुतम्।।
हीनाधिकं न कर्तव्यं दृष्टादृष्टशुभप्रदम्।
हीने भवति सम्पर्दो विस्तीर्णे नाट्यगेययो:।।[४३९]

---

436 नाट्यशास्त्रम्, अ.२.३७–३८

437 सङ्गीतमकरन्द:, नृत्याध्याये प्रथम: पाद:, श्लो. ४–६

438 सङ्गीतमकरन्द:, नृत्याध्याये प्रथम: पाद:, श्लो.७

[439] विष्णुधर्मोत्तरपुराणम्, ३.२०.४–६




प्राचीन भारतीय प्रेक्षागृह

**▶शैक्षणिकभवनानि –**

प्राचीनकालादारभ्य शिक्षायाः महत्त्वं अतिव वर्तते। शिक्षाविहीनः मानवः पशु समानमस्ति। अतः शिक्षा प्राप्त्यर्थं विद्याशालायाः निर्माणं नगरे ग्रामे च अनिवार्यमस्ति। प्रायः वास्तुशास्त्रीयग्रन्थेषु विद्याशालायाः निर्माणविधानस्य सम्बन्धितं वर्णनं न प्राप्यते। विश्वकर्मवास्तुशास्त्रग्रन्थे विद्याशालायाः निर्माणविधानस्य विवरणं विस्तृतरूपेण वर्तते। यथा हि –

**प्रासादे भवने पुर्यां ग्रामे वा शुभवास्तुके**

**विद्याशालामेकशैलीमेकसूत्रप्रमाणम्।।**[४४०]

विद्याशाला नगरे, प्रासादे, वा शुभवास्तुस्थले तां स्थापयेत्। नृपप्रासादभवनादिवास्तुस्थलेषु स्थलवैशाद्यादि दृष्टवा तामिमां शालां नगरस्य मध्यभागे वा समुचितप्रदेशे देवालयमुखवीथ्यां महावीथ्यां वा राजवीथ्यां वा न्यायशालादिषु समीपे वा नानामार्गसम्मेलनस्थले वा शुभवास्तुभूमौ विद्याशालां पाठशालां स्थापनीयम्।

किञ्चात्र पाठशालायाः विद्याशालायाः स्थापनार्थं शूभभूमिपरिग्रहणं करणीयम्। पनसवञ्जुलपूगनारिकेलरसालमालतीप्रमुखानामभिवर्धनकरी वास्तुभूमिः शुभा भवति। सल्लक्षणान्वितशुभभूमौ विद्याशालास्थापनीयम्। यथा ग्रामे वा नगरे वा स्वामीप्सितलब्धशुभभूमिषु पाठशालास्थापनेऽपि तैस्तौः भूपालैस्स्ववाञ्छानुसारमेकया निर्माणशैल्या समेतामेव निर्मितव्यम्। यथा नगरे पाञ्चालशैल्या भासुरं विद्याशालां यदि निर्मितं तदा सर्वत्र तस्य राजनस्य देशेषु ग्रामेषु स्थलान्तरेष्वपि तथैव पाञ्चालशैल्या सहितमेव

---

[440] विश्वकर्मवास्तुशास्त्रम्, अ.४०.१

विद्याशालाकल्पनं वरं, न तु एकत्र पाञ्चालशैलीभासुरविद्याशालानिर्माणमन्यत्र ग्रामादिषु मागधशैलीभासुरविद्याशालायाः कल्पनमिति।

एकस्मिन्नेव विद्याशालायां प्रथमसौधं पाञ्चालशैल्यां चित्रादिमिलिनं कारयित्वा तदुपरि द्वितीयभौमतले मागध्यादिशैल्यन्तरचित्ररचनादिकं सर्वथा न कार्यम्। एवं तैस्तैः राज्ञैः स्वत्वनगरग्रामदेशस्थलेषु स्वस्ववाञ्छानुसारं सर्वत्र शैल्यन्तरसङ्कीर्णरहितम् एकशैलीमेव चित्रादिकल्पनाख्यादि सर्वत्र तुल्यप्रमाणेन विद्याशालां निर्मापयेदिति वास्तुविशारदानां मतम्।

ग्रामादिषु क्षुद्रप्रमानविद्याशालाकल्पनं नगरराजधान्यादिस्थलेषु विद्यार्थिनां संख्यानुगुणं तदपेक्षयाऽधिकायामवैशाल्यादिप्रमाणं नानाभौमलसितश्च विद्याशालायाः स्थापना करणीया। क्वचित् बहुजनसदनवत्सु ग्रामादिस्थलेषु त्रिभौमतलमपि विद्याशालायाः निर्माणं करणीयमिति शिल्पज्ञः कथयन्ति।

विद्याशालायाः प्राथमिकं मुख्यद्वारं ऐन्द्रीदिङ्मुखमत्यन्तं श्रेयःप्रदं भवति। दक्षिणोत्तरपश्चिमदिग्भागेषु विद्याशालायाः मुख्यद्वारस्थापने अपि दोषो न विद्यते। तस्मात्तत्र नगरग्रामादिषु संप्राप्तवास्तुस्थलानुगुणं तादृशं महावीथ्यादीनां सम्मेलनस्थलसम्मुखे च द्वारस्थापनं कर्तुं शक्यते। यथैवम् उपरोक्तरीत्या महावीथीस्थलानुकूलं विद्याशालायाः मुख्यद्वारस्थापनं सारदारुमयं निर्मितव्यम्। क्वचिद्वासर्वद्वारकल्पनोपेतम् अन्यत्रार्षद्वारकल्पनोपेतमेव निर्मापनीयम्। इथमेव विद्यार्थिनां मेधारोग्यादिवर्धकमिति शास्त्रकारोपदेशः।[४४१]

विद्याशालायाः निर्माणे पूर्वभागो मध्यभागः पश्चाद्भाग इति भागत्रयविभजनं किल वर्तते। तत्र विद्याशालानिर्माणे पूर्वभागपश्चाद्भागयोः दण्डप्रमाणहीनत्वं मध्यभागे दैर्घ्यवैशाल्यप्रमाणाधिक्यं स्थापनीयम्। यथा – ग्रामे वा नगरे राजधान्यां वा विद्याशालानिर्माणे

---

441 विश्वकर्मवास्तुशास्त्रम् अ.४०

स्थपतियजमानस्तात्कालिकं विद्यर्थिनां भाविनि काले प्रवेशयोग्यानां च स्थलं प्रथमत एव निश्चितं प्रकल्पनीयम्। तादृशा विद्याशालायाः पूर्वभागे प्राथमिकद्वारस्य समीपे साधारणदण्डदशकायामयुतं पुरतोऽङ्गणमन्तरशालामिलितं निर्माणं कृतं तर्हि मध्यमभागे साधारणदण्डविंशतिकायामयुतं वा तदधिकमानयुतं वा कल्पनस्थलं स्वीकृत्य प्राथमिकद्वारं तत्र च द्वारान्तरं प्रकल्पयित्वा तत्समीपेऽपि अन्तःस्थले अङ्गणं कल्पनीयम्। भाविकाले निर्माणस्थाप्यर्हस्थले वैपुल्याद्युपेतमपि प्रकल्पनीयम्। क्वचित् विद्याशालायाः मध्यभागे द्वित्रिचतुःस्थानेषु चतुरश्रं चत्वरनिर्माणमपि कार्यम्। ग्रामनगरादिषु विद्यार्थीसंख्यानुगुणं एतादृशविद्याशालायाः प्रथमावरणं द्वयावरणत्रयावरणाधिकं कार्यम्। प्रतिभौममनेकवातायनसहितं करणीयम्। तेषां विद्याशालायाः चतुर्ष्वपि दिग्भागेषु तदन्तिकस्थ शालाप्रवेशनार्थं द्वारद्वयं स्थापनीयम्।

**गुरुवेदिसमायुक्तां कल्पनयेन्नगरोत्तमे।**

**शास्त्रशालान्वितां मध्ये वादस्थानसमन्विताम्।।**

**परीक्षास्थानसंयुक्तां क्लृप्ताभ्यासगृहां तथा।** [४४२]

अर्थात् अत्र तु विद्याशालानिर्माणे गुरुवेदिकासनसहितं तत्तद्विद्याभ्यसनस्थानं प्रकल्पनीयम्। तेषु विद्याशालायामेकस्मिन् सदने पुस्तकालयः, काव्यपाठाभ्यासः, पुराणपाठप्रवचनं, वेदपठनं, तर्कपाठाभ्यासः, व्याकरणपाठाभ्यासः इत्यादीनां स्थानमपि कल्पनीयम्। कश्चात्र विद्याशालायां शिल्पशास्त्रकारकृतनियमः कोऽपि विद्यते। किञ्चात्र विद्याशालायां प्रत्यावरणतलं प्रतिभौमतलश्च तत्तद्विद्यार्थीनां पठितपाटचिन्तनस्य चर्चाशालां च प्रकल्पनीयम्। विदुषां वादस्थानं समन्वितं तं रचयेत्। स्थलान्तरे उपरिभौमभागे वा तत्तत्कालोचितपरीक्षाशालाश्च स्थापनीयम्।

---

442 विश्वकर्मवास्तुशास्त्रम् अ.४०.८–९

**विमानशिखरोपेतां नानाचित्रमनोहरम्।**

**सर्वालंकारसंयुक्तां पूर्वमण्टपशोभितम्।।**[४४३]

विद्याशालां पूर्वमण्डपसहिता सर्वालङ्कारयुक्ता सविमानशिखरं स्थापयेद् इति भगवन् विश्वकर्मण: मतम्।

तादृशा लक्षणान्वितां नानाविधशास्त्राभ्यासयोग्यां विद्याशालां भूपालादीनां तत्र तत्र नगरोत्तमेषु राजधान्याश्च स्थापयेयु:। विद्याशालां मङ्गलवाद्यवादनादिपूर्वकं शुभे मुहूर्ते स्थापनीयम्।[४४४]

**►पुस्तकालयम् –**

नगरग्रामादिषु विद्याशालाया: स्थापनेन सह पुस्तकायलस्य स्थापनस्य अपि आवश्यकमस्ति। पुस्तकेन विना ज्ञानार्जनं कथं भवति? अत: विश्वकर्माचार्य: विश्वकर्मवास्तुशास्त्रग्रन्थे पुस्तकालयलक्षणं दर्शयति। यथा –

**.......राज्ञश्शास्त्रसेवनमित्यपि।**

**............ शुभप्रदमितीरितम्।।**[४४५]

विश्वकर्माचार्यस्य मतानुसारं राज्ञस्य मुख्य बहुविधश्रेय:प्रदं कार्यं द्वयमेव। खड्गाद्यायुधसन्धरनं शास्त्रसेवनं चेति। तत्राद्यस्य खड्गादे: स्थापनार्थं शस्त्रशालाया: निर्माणं तथा द्वितीयं शास्त्रस्थापनार्थं शास्त्रशालाया: अर्थात् पुस्तकशालाया: निर्माणमिति। नगरे

---

[443]विश्वकर्मवास्तुशास्त्रम् अ.४०.१०

[444] विश्वकर्मवास्तुशास्त्रम् अ.४०.११

[445] विश्वकर्मवास्तुशास्त्रम्, अ.२०.२३

पुस्तकालयस्य स्थापने नगरजनानामेवं राज्ञां ज्ञान–विज्ञान–धर्म–सदाचार–तत्त्वादिनां वृद्धिर्भवति एवं ज्ञानेन प्राप्यते ऐश्वर्य प्राप्तिमपि भवति। यथा हि –

**विज्ञानधर्मसुकृतसुखतत्त्वसदिवर्धकम्।**

**शास्त्रं भूपतिना सेव्यं नियमेन (मनीषिणा)।।**

**ज्ञानेन प्राप्यते लक्ष्मीर्ज्ञानेन सुखमश्नुते।**

**प्राणीसंरक्षणे ज्ञानमाद्यो मन्त्रीति कथ्यते।।** [४४६]

नगरे पुस्तकशालास्थापनं विद्याशालास्थापनस्थलमेव स्थलेषु स्थाप्या। यथा –

**प्रासादे नीतिभवने पुरानामपि मध्यमे।।**

**विदुषां मेलनस्थाने शास्त्रशालां प्रकल्पयेत्।**

**चतुरश्रा शास्त्रशाला प्राङ्गमुखावरणत्रया।।** [४४७]

शास्त्रशालां प्रासादे, नीतिभवने, नगरस्यमध्यस्थले, विदुषां मेलनस्थले वा स्थापनीयम्।

शास्त्रशाला चतुरश्रां, आवरणत्रयेणावृतः स्थापनीयम्। किञ्चात्र पुस्तकशालायाः मुख्यद्वारं प्राच्यां दिशि स्थापनीयं किञ्च तादृशावरणत्रयाणां मध्यभागे वेदस्वरूपिणीं चतुरश्रां वेदिकां हस्तद्वयोच्छ्राय मानेन निर्मापयेत्। तादृशवेदवेदी गवाक्षलक्षणान्वितं चतुष्कोणमुखभद्रयुक्ता अङ्गणसहितं शुशोभितं निर्मापनीयम्। [४४८]

**प्रथमावरणे वेदो द्वितीयावरणे स्मृतिः।**

**तृतीयावरणे चार्षं वेदनाथः परः पुमान्।।** [४४९]

---

[446] विश्वकर्मवास्तुशास्त्रम्,अ.२०.२४–२५

[447] विश्वकर्मवास्तुशास्त्रम्,अ.२०.२९–३०

[448] विश्वकर्मवास्तुशास्त्रम्,अ.२०.३०–३१

[449] विश्वकर्मवास्तुशास्त्रम् ,अ.२०.३३

तत्र प्रथमावरणेचतुरलिन्दभागवेदिकोपरितले सपीठे ऋग्यजुस्सामाथर्ववेदानां स्थापयेत्। एवं द्वितीयावरणे चतुरलिन्दभागवेदिकोपरितले मन्वादिस्मृतिकोशान् स्थापनीयम्। तृतीयावरणे महर्षिप्रमुखैः प्रणीतानि बहुविधानि शास्त्रपुस्तकादीनि च स्थापयेदिति विश्वकर्माचार्यः निर्देशयति। तत्र वेदवेदिकायामेव हंसारूढां सरस्वतीं, गजवदनं, अम्बिकया सहितं शिवमथवा सपरिवाराम्बिकां स्थापयेत्। पुस्तकशाला एकभौमा त्रिभौमा वा कलशशिखरसमन्विताः निर्मापनीया।

पुस्तकशालायां यथेष्टप्रमाणेन विदुषां पठितृणां च पुस्तकवाचनलेखनादिस्थानमपि निर्मापनीयम्। नगरे पुस्तकशाला स्थापने समुचितसमये वेदस्मृतितिहासपुराणसत्काव्यशास्त्रपठनादिना तत्त्वज्ञानप्राप्तिद्वारा प्रजारक्षणं क्षेमप्राप्त्यादिकमव्याहतं भवेत् इति।

**► न्यायशाला –**

अस्माकं वेदेषु अपि समितिसभायाः उल्लेखो प्राप्यते। विश्वकर्मवास्तुशास्त्रग्रन्थे विश्वकर्माचार्यः न्यायशालालक्षणनिरूपणं नामाध्याये नगरे न्यायशालायाः निर्माणमावश्यमस्ति इति दर्शयित्वा तेषां महत्त्वता प्रतिपादयति। यथा –

**न्यायशाला तु कथिता सर्वदेवमयी शुभा।**
**सर्वशक्तिमयी सर्वप्राणीनां क्षेमवर्धिनी।।**
**गुणाढ्येन स्थिरधिया भूभर्त्रा नयचक्षुषा।**
**सा सेव्या लोकरक्षार्थं सहामात्यपुरोहितैः।।** [४५०]

---

[450] विश्वकर्मवास्तुशास्त्रम् ,अ. १६.५-६

अर्थात् न्यायशाला सर्वदेवमयत्वं, सर्वशक्तिमयत्वं, सर्वजीववर्गक्षेमकरत्वमस्ति। गुणाढ्येन चञ्चलधीभिः क्षत्रियकुलजातैरमात्यपुरोहितैः लोकरक्षार्थं भवन्ति। तस्मात्तान्तु न्यायशालां समस्थलां साङ्गा, सदेवां, सावयवां सर्वप्रयत्नेन तां सर्वलक्षणान्वितां शिल्पकल्पनैः कुर्यात्।[४५१]

**सार्वभौमादिभूपानां गुणिनां नयनचक्षुषाम्।**

**आस्थानिकं द्विधा प्रोक्तं न्यायशालासभाक्रमात्।**[४५२]

अतः यथोचितदण्डदयालुत्वादिसद्गुणशालिनां बहुविधन्यायशास्त्रज्ञानां सार्वभौमाना, चक्रवर्तीनां भूपालानां च आस्थानिकं निवेशस्थलन्तु न्यायशाला द्विविधं भगवता विश्वकर्मणा दर्शितम् – (१) न्यायशाला (२) न्यायसभा च।

राजादिर्भिजगतां श्रेयसे शुभभूमौ न्यायाशाला स्थापनीया। सभा तु महिषीपुरोहितकुलगुरुसमेतस्य भूपालस्य वसन्तोत्सवादि, व्रतादीनां कार्योचितं स्थानं न्यायसभा इति वास्तुविद्वज्जनैः मन्यन्ते। सा च न्यायशाला देश्या पौरेति द्विविधा भवति। देशेभवा देश्या तथा राजधान्यादिनगरेषु पौरेत्यर्थः।[४५३]

**न्यायशालालक्षणम् –**

**जन्माधिष्ठानसंयुक्तां चतुर्दिग्द्वारभूषिताम्।।**

**नयवाद्यासनोपेतां सामन्तासनसंयुताम्।**

---

451 विश्वकर्मवास्तुशास्त्रम् ,अ. १६.७

452 विश्वकर्मवास्तुशास्त्रम् ,अ. १६.१

453 विश्वकर्मवास्तुशास्त्रम् ,अ. १६.८

**शालाकारं सभाकारं चर्तुलां चतुरश्रकाम्।।** [४५४]

न्यायशाला अधिष्ठानयुक्तमर्थात् जगतीपट्टपद्मदलकम्पवाजनादिसंरचनासंयुतक्तं उत्तुङ्ग रचनायुक्तं रचनीयम्। तत्र गमनागमनार्थं पूर्वादिषु चतसृष्वपि दिक्षु चतुर्द्वारयुक्ता नयवादीनां निवेशार्हासनैर्युक्तां कार्या। सामन्तभूपालादीनामासनोपेताश्च न्यायशाला निर्मापनीया।

**देश्यान्यायशाला –**

**भूपालस्येच्छया वापि राजकार्यानुकूलतः।**

**कोशागारयुतां देश्यां कल्पयेच्च सदेवताम्।।** [४५५]

देश्यां न्यायशालां शालाकारनिर्मितभाजं वा सभाकारनिर्मितभाजं वा भूपालादिवाञ्छानुसारं निर्मितव्यम्। तत्तद्राजकार्यानुकूलेन सदेवतां कोशागारयुक्ताश्च देशीय न्यायशालायाः निर्माणं करणीयम्।

**पौरन्यायशाला –**

चक्रवर्तीय सार्वभौमाय, पट्टधराय, युवराज्ञे, नरेन्द्राख्यक्षत्रियाय, महाराजाय, माण्डलिकाय, सामन्तभूपालाय,च तादृशी पौरानामासनेन समुज्ज्वलेन न्यायशालां यथाक्रमं नगरे मानसूत्रेण स्थापेत्। यथा हि –

**चक्रवर्तेः पट्टभाजो युवराजस्य भूभुजः।**

**नरेन्द्रस्य क्षत्रियस्य महाराजस्य भूपतेः।।**

**सामन्तस्य महीनेतुरासननेन समिज्ज्वलाम्।**

**पौरां तु न्यायशालाख्यां मानसूत्रेण कल्पवित्।।** [४५६]

---

454 विश्वकर्मवास्तुशास्त्रम् ,अ. १६.८–९

455 विश्वकर्मवास्तुशास्त्रम् ,अ. १६.१०

विविधकार्य हेतवे स्थानं विभज्य सर्वलक्षणयुक्ता पौरन्यायशाला निर्मितव्या। तत्र मध्यशालाप्रमाणन्तु द्वादशदण्डमानेन कार्या अथवा तदर्धं वा तस्मादर्धं वा पूर्वशालाप्रमाणेन कुर्यात्। तत्र उपशालाभद्रकाख्यैरन्वितं च स्थाप्या।[४५७]

न्यायशालां शालाकारां, सभाकारां वा मण्डपाकारां निर्मितव्यम्। सा शाला चतुरश्रा वा वृत्ताकारा एवं त्रितलादिविराजितां निर्मितव्यम्। तथा महाधिष्ठानसंयुक्तं, त्रिंशत्सोपानवेदिकां, स्तम्भकूटयुक्तां, न्यायाधीशासनसमोपेतं शिखरसहितं विमानरचनोपेतां करणीयमिति शिल्पशास्त्रविशारदानां मन्तव्यम्।[४५८]

अत्र न्यायशालाम् ईशानादि चतुष्कोणेष्वष्टपादसमन्विता कार्या तथा तेषां मध्ये समसूत्रप्रमाणं पक्षयोरुभयोरपि मिलित्वा स्तम्भषोडशं स्थापनीयम्। तथा एषा न्यायशाला पूर्वभद्रयुक्तां मुखतोरणैः सुशोभिता कार्या। सा शाला पूर्वाभिमुखी, उत्तराभिमुखी तथा पश्चिमाभिमुखी क्रमेण निर्मितव्या। यथा हि –

**पूर्वभद्रसमायुक्तं मुखतोरणमण्डितम्।**

**पूर्वास्यमुत्तरास्यश्च वारुण्यास्यं क्रमादितम्।**

**कारयेच्छिल्पकर्मज्ञ (यथा प्रवर्तिते) बुधः।।**[४५९]

एवमत्र न्यायशालायाः त्रिविधा प्रकाराः विश्वकर्मवास्तुशास्त्रग्रन्थे विश्वकर्माचार्येण कथितम्। न्यायशालाविधान विषयकवर्णनम् अन्य वास्तुशास्त्रीयग्रन्थेषु प्रायः न प्राप्यते।

---

456 विश्वकर्मवास्तुशास्त्रम् ,अ. १६.११–१२

457 विश्वकर्मवास्तुशास्त्रम् ,अ. १६.१३–१४

458 विश्वकर्मवास्तुशास्त्रम् ,अ. १६.१५–१७

459 विश्वकर्मवास्तुशास्त्रम् (जुगनू),अ. १६.२२

न्यायाशालायाः साम्प्रतिकालेऽपि अतीव वर्तते। अतः आधुनिकनगरनिर्माणेऽपि न्यायशालायाः निर्माणमावश्यकमस्ति।

► **पौरं कोशसदनम् –**

राजकीया धनशालां राजधान्यां नगरेषु पुरेषु तन्मध्ये वा योग्य स्थले कल्पनीयम्। कोशसदनं प्रासादान्तर्गतं स्थापनीयम्। यथा हि –

**पौरन्तु कोशसदनं प्रासादान्तर्गतन्तु वा।।** [४६०]

धनशाला प्राकारयुक्तं, सदुर्गं वा सप्तभित्यावृतं, भूगर्भस्थ, अलिन्दद्वयसमन्वितं स्थापयेत्। तस्य निर्माणस्य प्रमाणम् –

**दण्डत्रयं चतुर्दण्डमथवा पञ्चदण्डकम्।**

**मध्य भागप्रमाणञ्च स्थापयेत्सूत्रमानवित्।।** [४६१]

कोशसदनस्य निर्माणस्य प्रमाणं राजदण्डत्रयादिकं, चतुर्राजदण्डमथवा राजदण्डपञ्चकावधीति। तथा च तन् मध्यनिर्माणं मण्डपाकृतिकं वा शालाकारमथापि यथामति निर्मापनीयम्।

तत्र मुख्याधिपतिः गणकश्च आसनं नियोजीतम्। सुरक्षार्थं दिव्य सर्वालङ्कारयुक्तं निधिदेवस्य (कुबेरस्य) स्थापना करणीयम्। कोशशाला भूगर्भस्थानसंयुक्तं तथा भूगर्भं भूमिदेवीसमन्वितं तथा तत्र धनवेदिका धेनुचित्रयुक्तं प्रकल्पनीयम्। सौवर्णपट्टिका सौम्यां स्थापयेत्। तत्र पूर्वदिशायां सुवर्णं तथा राजतं याम्ये स्थापयेत्। उदीच्यां नवरत्नानि, वारुणे

---

[460] विश्वकर्मवास्तुशास्त्रम् (जुगनू),अ. १८.१६

[461] विश्वकर्मवास्तुशास्त्रम् (जुगनू),अ. १८.१९

लिपिकारिणः स्थापयेत्। अनेन प्रकारेण क्रमेण स्थापनं कृत्वा नृपः प्रत्यहं भक्त्या चार्चयेत्।[४६२]

तस्या एव शालायाः पुरतः क्षुद्रशालाकारमावरणं कल्पनमपि दृश्यते। यथा हि –

**प्रथमावरणे दीपदेवी स्थाप्या सहासना।**

**द्वितीयावरणे देवी चामरग्राहिणी तथा।।**

**तृतीयावरणे देवी चाशीर्वचनकारिणी।**

**एवं देवीत्रयं स्थाप्यं यशोधनजयप्रदम्।।**[४६३]

कोशशालायां प्रथमावरणभागे सहासना दीपदेव्याः प्रतिमां स्थापयेत्। एवं द्वितीयावरणे चामरधारिण्या देव्याः प्रतिकृतिं, तृतीयावरणे आशिषमनुवदन्त्या लोकमातुः प्रतिकृतिश्च स्थापनं यशोधनजयप्रदं भवति।

किञ्च तत्र तत्र द्वारसमीपे सुवर्णपट्टैरथवा राजतपट्टैः संयुक्तं तोरणादिभिः शुशोभितं कार्यम्। तादृशधनवेद्या उपरिभागे शिखरत्रयलसितं विमानं कल्पयित्वा आन्तरालिकभित्तिकोणादिषु नानाचित्रलसितं वितानैरपि मण्डितम्। अत्र पूर्वशालासमायुक्तं राज्ञां जयप्रदं खड्गचिन्हं तत्पुरत एव रक्षाकार्यं रक्षाकारिणां गणं च स्थापयेत्।[४६४] अन्य च लक्षणान्तराणि तत्तत्स्थाने मानादीनि च स्वयमूह्य युक्ता शिल्पाचार्यः प्रकल्पयेदिति। तस्मादेतावता राजकीय पौरं धनशालाया बाह्यमान्तरिकं लक्षणं रचनाविशेषः प्रायशः प्रतिपादिताः।

---

[462] विश्वकर्मवास्तुशास्त्रम् ,अ. १८.२०–२३

[463] विश्वकर्मवास्तुशास्त्रम् (जुगनू),अ. १८.२४–२५

[464] विश्वकर्मवास्तुशास्त्रम् (जुगनू),अ. १८.२६–२८

## १५. नगररचनायाः दोषाः –

नगरनिवेशने नगरास्याकारः, आकृतिः, नगरे निवेशित मार्गविन्यासः तथा गृहविन्यासादीनामोपरि सम्बन्धितमस्ति। स्थापत्यशास्त्रेषु एवं पुराणादिषु अन्येषु ग्रन्थेषु नगराकाराधारोपरि तेषां प्रशस्ताप्रशस्त नगरसंज्ञा दृश्यते। प्राचीने भारते नगरनिवेशनकाले तस्याकारस्य पूर्णतया महत्त्वं ददाति स्म। विचक्षणैः अद्यापि केषुचित् ग्रन्थेषु नगराणां विभिन्नाकाराणामाधारोपरि प्रशस्ताप्रशस्त विषयक मतभेदानि प्रदर्शन्ते। नगरस्याकारानुसारं नागरिकजनानां शुभाशुभ फलं प्राप्यते इति प्रायः स्थापत्यविशारदानां मतं प्रवर्तते। एतत् कारणात् समराङ्गणसूत्रधारग्रन्थे राजा भोजः कथयति यत् –

**शास्त्रज्ञः स्थपतिस्तस्मात् प्रयत्नपरया धिया।**
**यथावत् कथितं चारु नगरं विनिवेशयेत्।।** [४६५]

शास्त्रज्ञस्थपतेः पूर्वोक्त प्रशस्त नगरस्य निवेशनं प्रयत्नपूर्वकं करणीयम्। यथा नगरनिर्माणस्य नियमानां पूर्णतः प्रयत्नपूर्वकम् अनुसरणं करणीयम्। यदा क्वचित् कुत्रचित् राष्ट्रे अज्ञानात् प्रमादात् संस्थानमेकप्येषामपि स्थापयेत् तदा न केवलं तन्नगरस्य विनाशः भवेत् अपितु तन्नगरेणसह तद् राष्ट्रस्य अपि क्षुधाभिः, शत्रुभयात् तथा मृत्युभिः आदीनां द्वारा विनाशः भविष्यति। यथा हि –

**संस्थानमेकमप्येषां प्रमादात् क्रियते यदि।**
**तदा राष्ट्रं निपीड्येत् क्षुद्द्विषद्भीतिमृत्युभिः।।** [४६६]

---

[465] समराङ्गणसूत्रधार (पूष्पेन्द्र), अ.१०.६९

[466] समराङ्गणसूत्रधार(पुष्पेन्द्र), अ.१०.६८

राजा भोजः स्वरचित समराङ्गणसूत्रधारे तथा युक्तिकल्पतरुद्वयेषुग्रन्थे नगरस्याकारं चतुरश्राकारं शुभं दर्शितवान्। यथा हि –

**........चतुरस्त्रीकृतं शुभम्।।**[४६७]

तथा **चतुरस्त्रं चतुवर्गफलाय पृथिवीपतेः।**[४६८]

चतुरस्त्रं नगरनिर्माणे राज्ञः चतुवर्ग फलं (धर्मः,अर्थः, कामः,मोक्षः) प्राप्नोति इति राज्ञःभोजस्य मन्तव्यम्।

समराङ्गणसूत्रधारग्रन्थे राजा भोजः गर्हितनगरस्य एकादश भेदान् दर्शयति। यथा हि –

**छिन्नकर्णं विकर्णं च वज्रं सूचीमुखं तथा।**

**वर्तुलं व्यजनाकारं चापाकृतिधरं च यत्।।**

**शकटद्विसमं यच्च विस्ताराद् द्विगुणायतम्।**

**विदिक्स्थं सर्पचक्रं च तत् पुरं निन्दितं भवेत्।।**[४६९]

अप्रशस्त नगराणाम् एकादश भेदाः राज्ञःभोजस्य मतानुसारं निम्नदर्शितरुपेण वर्तन्ते –

(१) छिन्नकर्णम्

(२) विकर्णम्

(३) वज्राकारम्

(४) सूचीमुखम्

(५) वर्तुलाकारम्

(६) व्यजनाकारम्

---

467 समराङ्गणसूत्रधार(पुष्पेन्द्र), अ. १०.३

468 युक्तिकल्पतरु, नगरयुक्ति, १४९

469 समराङ्गणसूत्रधार(पुष्पेन्द्र), अ. १०.५३–५४

(७)  धनुषाकारम्

(८)  द्विगुणायतम्(दण्डाकारम्)

(९)  शकटद्विसमाकारम्

(१०) कुदिशस्थ

(११) सर्पचक्राकारम्।

एतेषां प्रत्येकेषामप्रशस्त नगराणां पृथक्–पृथक् वर्णनम् अशुभफलसहितं निम्नोक्तरुपेण राजाभोजः प्रतिपादयति। यथा –

(१)  छिन्नकर्णनगरम् –

छिन्नकर्णमर्थात् यन्नगरस्याकृतिः कर्णविहीनं भवेत् तन्नगरं छिन्नकर्णनगरमीति ज्ञायते। समराङ्गणसूत्रधारग्रन्थानुसारम् –

**छिन्नकर्णे वसंल्लोकः पुरे तस्करतो भयम्।**

**व्याधिभ्यो वापरेभ्यो वा प्राप्नोतीति विनिर्दिशेत्।।** [४७०]

छिन्नकर्णनगरे निवासिताः जनाः दस्युभयं, व्याधिभयमेवं शत्रुभयं प्राप्नोतीति। अग्निपुराणेऽपि यथोक्तं छिन्नकर्णं तथा चन्द्रार्धाकारनगरयोः विनिवेशनमप्रशस्तं विनिर्दिशेत्। यथा हि—

**छिन्नकर्णं विभिन्नं च चन्द्रार्धाभः पुरं न हि।** [४७१]

(२)  विकर्णनगरम् –

विकर्णनगरं छिन्नकर्णनगरस्येव अस्ति। यथा हि –

**विद्विष्टस्वामिता सर्वलोकगर्हानपत्यता।**

---

[470] समराङ्गणसूत्रधार(पुष्पेन्द्र), अ. १०.५५

[471] अग्निपुराणम्, अ.१०६,पृ–३२०

**जायते स्वल्पमायुष्यं विकर्णपुरवासिनाम्।।** [४७२]

विकर्णनगरे निवासिनां जनानां दुष्टराज्ञः प्राप्तिः, सर्वलोकगर्हानपत्यता, स्वल्पायुः इत्यादीनां दोषाणां प्राप्तिर्भवन्ति।

वायुपुराणेऽपि विकर्णनगरं तथा छिन्नकर्णनगरं द्वयोः नगरयोः अप्रशस्तं मन्यते। यथा हि –

**छिन्नकर्णं विकर्णन्तु व्यजञ्जनं कृशसंस्थितम्।** [४७३]

(३) वज्राकारनगरम् –

भोराजनस्य मतानुसारं वज्राकारनगरमपि अशुभं नगरमस्ति।

यथा हि –

**स्त्रीजयं विषरोगांश्च भेदाश्च विविधांस्तथा।**

**जनो वसन्नवाप्नोति वज्राकृतिधरे पुरे।।** [४७४]

यदा वज्राकृति नगरस्य सन्निवेशनं कदाचित् प्रमादवश भवति तदा तन्नगरे निवासिनां पुरुषाणां स्त्रीद्वारा पराजयो भवति, विषरोगाः, विविधाः भेदाश्च भवन्ति।

अपराजितपृच्छायामपि यथोक्तम् –

**वज्राकृति पुरं यत्र वज्रपातस्तदोद्भवेत्।** [४७५]

अग्निपुराणानुसारम् –

---

[472] समराङ्गणसूत्रधार(पुष्पेन्द्र), अ. १०.५६

[473] वायुपुराणम्, ८.१०८

[474] समराङ्गणसूत्रधार(पुष्पेन्द्र), अ. १०.५७

[475] अपराजितपृच्छा, ७३.२३

**वज्रसूचीमुखं नेष्टं सकृद्द्वित्रि समागमम्।**

**वज्रनागाभं पुरारम्भे हि शान्तिकृत्।।**[४७६]

वज्राकृतिनगरे निवासिनजनाः अशुभं फलं प्राप्नोति तथा वज्रपातस्य भयमपि प्राप्तनोति। वज्रसूचीमुखनगरमप्रशस्तं नगरमस्ति, परन्तु वज्रनागाभं नगरं शान्तिप्रदायकं नगरमर्थात् प्रशस्तनगरमस्ति इति। अतः अग्निपुराणे वर्णितं वज्रसूचीमुखनगरस्य समराङ्गणसूत्रधारग्रन्थे द्वे भिन्न-भिन्नाकारे नगरे दर्शिते। यथा सूचीमुखाकारमेवं वज्राकारनगरम्। एते द्वे नगरे राजाभोजः गर्हितनगरं मन्यते।

राजवल्लभग्रन्थानुसारम् **वज्रेः वज्रभयं च...।**[४७७]

**(४) सूचीमुखाकारनगरम्**

यन्नगरस्य मुखं सूची सदृशं दृश्यते तन्नगरं सूचीमुखाकारनगरं कथ्यते। यथा हि –

**व्रजन्ति प्राणिनो नाशं क्षुद्व्याधि परिपीडिताः।**

**निवसन्तः सदा सूचीमुखाकारधरे पुरे।।**[४७८]

एतत् सूचीमुखाकारनगरे निवासिनः जनाः क्षुधाव्याधिद्वारा परिपीडिताः भूत्वा सदा मृत्युः प्राप्नुवन्ति इति राज्ञः भोजस्य मन्तव्यम्।

**(५) वृत्ताकारनगरम्** –

**विश्वकर्मप्रकाश मां जोवु**

---

476 अग्निपुराणम्, १०६.५

477 राजवल्लभवास्तुशास्त्रम्,(जुगनू), अ.४.७

478 समराङ्गणसूत्रधार(पुष्पेन्द्र), अ. १०.५८

राज्ञ:भोजस्य मतानुसारं वृत्ताकारनगरम् अप्रशस्तनगरमस्ति। युक्तिकल्पतरुग्रन्थे राजाभोज: कथयति यत् –

**........वर्तुलं बहुरोगकृतम्।**[४७९]

तथा समराङ्गणसूत्रधारग्रन्थेऽपि यथोक्तं पुन: वृत्ताकारनगरम् अशुभं दर्शयति। यथा हि –

**स्वामिना सह हीयन्ते सर्वत: सञ्चयोज्झिता:।**

**स्वल्पायुषश्च जायन्ते जना वृत्तपुराश्रया:।।**[४८०]

वर्तुलाकारनगरे निवासिता: जना: राज्ञा सह नष्टं भवति तथा तेषां समस्त धनसञ्चय: अपि नष्टं भवति। एवम् अल्पायु: इत्यादीनि अशुभानि फलानि प्राप्नोति। अत: प्रयत्नपूर्वकं वृत्ताकारनगरास्य निर्माणं न करणीयम्।

(६) व्यजनाकारनगरम् –

व्यजनाकारनगरस्य अशुभं फलं तन्नगरस्य नागरिका: निम्नदर्शित श्लोकानुसारं प्राप्यन्ते। यथा हि –

**असत्यवादिन: स्वल्पायुष: पवनपीडिता:।**

**जना: स्युश्चलचिताश्च नगरे व्यजनाकृतौ।।**[४८१]

यथा नगरजना: असत्यवादिन:, स्वल्पायुष:, चित्तभ्रमा:, पवनपीडिताश्च भवन्ति।

**(७) चापाकारनगरम् –**

समराङ्गणसूत्रधारग्रन्थानुसारम्

---

[479] युक्तिकल्पतरु,

[480] समराङ्गणसूत्रधार(पुष्पेन्द्र), अ. १०.५८

[481] समराङ्गणसूत्रधार(पुष्पेन्द्र), अ. १०.६०

**दुश्चरित्राङ्गनायुक्तस्तथा बहुनपुंसकः।**

**चापाकारे पुरे लोको निवसन् भवति ध्रुवम्।।** [४८२]

चापाकारनगरे निवासिजनः दुश्चरित्रस्त्रीयुक्तः अस्ति तथा बहुजनाः नपुंसकाः अपि सन्ति इति ध्रुवम् इति राज्ञःभोजस्य मन्तव्यम्। परन्तु अग्निपुराणे चापाभं नगरं प्रशस्तं दर्शितम्। यथा –

**चापाभं ..........पुरारम्भे हि शान्तिकृत्।** [४८३]

तथा **.......चन्द्रार्धाभं पुरं न हि।** [४८४]

अर्थात् अर्धचन्द्राकारनगरम् अप्रशस्तनगरं वर्तते।

(८) शकटद्विसमाकारनगरम् –

अपराजितपृच्छायां शकटद्विसमाकारनगरं गर्हितनगरं वर्णितं वर्तते। यन्नगरे नित्यं चौर्यादिभयं वर्तन्ते। यथा हि –

**..................युग्मशकटम्।**

**पुरे द्विशकटाकारे तस्करादिभयं भवेत्।।** [४८५]

समराङ्गणसूत्रधारग्रन्थेऽपि यथोक्तं शकटद्विसमाकारनगरं राजाभोजः निन्दितनगरं दर्शयति। यथा –

**रोगशोकानलस्तेन भयं तत्र प्रजायते।**

**शकटद्विसमाकारं पुरं यद् विनिवेश्यते।।** [४८६]

---

482 समराङ्गणसूत्रधार(पुष्पेन्द्र), अ. १०.६१

483 अग्निपुराणम्, अ.१०६.५ ?

484 अग्निपुराणम्, अ. १०६.४

485 अपराजितपृच्छा, ७३.१८,२३

अर्थात् द्विशकटाकारनगरे रोगशोकानलभयं तथा चौरभयं भवेत्। अतः यत्नपूर्वकं एतादृशाकारस्य नगरस्य निर्माणं त्याज्यम्।

**(९) द्विगुणायतन(दण्डाकार) नगरम्** –

द्विगुणायतन नगरनिर्माणे –

**आरम्भासिद्धिदं विप्रभयदं ज्ञातिभेदकृत्।**

**पौराणां स्वामिनश्च स्याद् गजवाजिक्षयावहम्।।**

**परैराक्रमम्य भुज्येत तत् पुरं बलशालिभिः।**

**द्विगुणायतनसंस्थानं यत् क्वचिद् विनिवेश्यते।।**[४८७]

द्विगुणायतन वा दण्डाकारनगरे प्रारम्भतः असिद्धिः प्राप्यते, विप्रवर्णानां जनानां कृते यन्नगरं भयप्रदायकं भवति। स्ववर्गीय– परिवारजनानां मध्ये कलहः भवति। पौराणां राज्ञां गजाश्वानां नाशः भवन्ति। बलशालीराजभिः आक्रमणेन यन्नगरस्य उपभोगः भवति। अन्य गर्हितनगरस्य अपेक्षया एतत् नगरस्य अशुभफलानि अधिकं राजाभोजः दर्शयति। अतः द्विगुणायतननगरस्य निवेशनं प्रयत्नपूर्वकं सावधानेन वास्तुविचक्षणैः त्याज्यम्।

**(१०) दिङ्मूढनगरम्** –

दिङ्मूढनगरम् अर्थात् यन्नगरस्य निवेशनं चतुर्दिशायामेवमुपदिशायां न भवेत् अपितु विदिशायां भवेत् तन्नगरं दिङ्मूढनगरम् उच्यते। एतत् नगरमपि अप्रशस्तनगरं भवति। समराङ्गणसूत्रधारग्रन्थानुसारम् –

**जनक्षयोऽग्निदाहश्च स्त्रीकृतानि भयानि च।**

**पुरे भवति दिङ्मूढे न च निर्योगमेति तत्।।**[४८८]

---

[486] समराङ्गणसूत्रधार(पुष्पेन्द्र), अ. १०.६२

[487] समराङ्गणसूत्रधार(पुष्पेन्द्र), अ. १०.६३–६४

**(११) भुजङ्गकुटिलनगरम् –**

**शस्त्रानिलपिशाचाग्निभूतयक्षभयार्दिताः।**

**रुक्तपीडिताश्च नश्यन्ति भुजङ्गकुटिले जनाः।।** [४८९]

भुजङ्गकुटिलनगरनिर्माणे तत्र निवासिनः जनाः शस्त्रम् – वायुः– पिशाचः–अग्नि – भूतयक्षैः भयं प्राप्नोति। तथा रोगपीडिताः भूत्वा नश्यन्ति। पुराकाले तत्कालिक नवनिर्मित मदुरानगरस्याकारः भुजङ्गकुटिलाकारः आसीत् इति उक्ति वर्तते। [४९०]

राजाभोजः स्वविरचित समराङ्गणसूत्रधारग्रन्थे उपरोक्त अप्रशस्तनगराणां वर्णनं कृत्वा अन्ते कथयति यत् –

**पुराणामप्रशस्तानि संस्थानानीदृशानि यत्।**

**एकस्मिन्नपि तेनैषां न पुरं विनिवेशयेत्।।** [४९१]

यथा उपरोक्त वर्णितानां गर्हितनगराणां एकस्मिन्नपि नगरस्य निवेशनं यत्नपूर्वकं न कुर्यात्। कारणम् –

**संस्थानमेकमप्येषां प्रमादात् क्रियते यदि।**

**तदा राष्ट्रं निपीडयेत क्षुदद्विषद्भिरितिमृत्युभिः।।** [४९२]

---

[488] समराङ्गणसूत्रधार(पुष्पेन्द्र), अ. १०.६५

[489] समराङ्गणसूत्रधारः(पुष्पेन्द्र), अ. १०.६६

[490] प्राचीन भारतमें नगर तथा नगर जीवन, पृ–२२८

[491] समराङ्गणसूत्रधारः(पुष्पेन्द्र), अ. १०.६७

[492] समराङ्गणसूत्रधारः(पुष्पेन्द्र), अ. १०.६८

अर्थात् प्रमादादपि तेनैषां एकस्यापि निर्माणं क्रियते तदा तत् राष्ट्रं क्षुधाभिः, शत्रुभयभिः एवं मृत्युभिः निपीडितं भवति। परन्तु शास्त्रज्ञ स्थपतेः प्रयत्नपूर्वकं प्रशस्तनगरस्य प्रदत्तनियमानुसारमेव विनिवेशनं करणीयम्। यथा हि

**शास्त्रज्ञः स्थपतिस्मात् प्रयत्नपरया धिया।**

**यथावत् कथितं चारु नगरं विनिवेशयेत्।।** [४९३]

सूत्रधारमण्डनस्य राजवल्लभवास्तुशास्त्रग्रन्थस्य मतानुसारमपि उपरोक्त गर्हितनगर विहाय अन्य त्रिकोणाकारं, षट्कर्णकं, त्रिशूलाकारं तथा अधिककर्णयुक्तं नगरम् अप्रशस्तनगरं विद्यते। यथा हि –

**वह्नेभीतिकरं त्रिकोणनगरं षट्कोणकं क्लेशदं**

**वज्रे वज्रभयं च शाकटपुरे रोगस्त्रिशूले कलिः।**

**प्रोक्तं तस्करभीतये द्विशकटं कर्णाधिकऽर्थक्षयो**

**दोषाः सप्त भयावहाः प्रकटिता ये विश्वकर्मोदिताः।।** [४९४]

त्रिकोणाकारनगरे वह्निभयं, षट्कोणके क्लेशः, त्रिशूलाकारे युद्धभयं, द्विशकटाकारे रोगभयं तथा तस्करभयं, अधिककर्णयुक्तनगरे धनक्षयं भवति एते सप्त भयावहान् दोषान् विश्वकर्मा दर्शयति।

वास्तुमण्डनम् इति ग्रन्थानुसारं त्याज्यनगरलक्षणम् –

**एकद्विशकटाकारं त्रिकोणं रसकोणकम्**

**वज्रत्रिशूलभुजगाकारं कर्णाधिकं त्यजेत्।।** [४९५]

---

[493] समराङ्गणसूत्रधारः(पुष्पेन्द्र), अ. १०.६९

[494] राजवल्लभवास्तुशास्त्रम् (जुगनू), अ.४.७

एक वा द्विशकटाकारं, त्रिकोणं, षट्कर्णकं, त्रिशूलाकारं, सर्पाकारं व कर्णाधिकं नगरनिवेशनं त्यजेत् इति सूत्रधार मण्डनस्य मतम्।

वराहमिहिराचार्यस्य मतानुसार वास्तुपुरुषस्य अङ्गभङ्गे वास्तुदोषाः भवति। यथा हि –

**दक्षिणभुजेन हिने वास्तुनरेऽर्थक्षयोऽङ्गनादोषाः।**

**वामेऽर्थधान्यहानिः शिरसि गुणैर्हियिते सर्वैः।।**

**स्त्रीदोषाः सुतमरणं प्रेष्यत्वं चापि चरणवैकल्ये।**[४९६]

अतः वास्तुपुरुषस्य दक्षिणभुजेन हीने धननाशः एवं स्त्रीकृत दोषाः भवन्ति, वामभुजेन हीने धन–धान्यहानिः, शिर हिने धनारोग्यादीनां सर्वानां गुणानां नाशं भवन्ति। चरणवैकल्ये स्त्रीदोषाः, पुत्रमरणं च दासत्वं भवति।

नगरस्य चतुर्दिक् जलस्थानस्य फलं वराहमिहिराचार्यः निम्नोक्तरूपेण दर्शयति–

**प्राच्यादिस्थे सलिले सुतहानिः शिखिभयं रिपुभयं च।**

**स्त्रीकलहः स्त्रीदौष्टयं नैस्व्यं वित्तात्मजविवृद्धिः।।**[४९७]

नगरनिर्माणं जलसमीपस्थ अर्थात् नदी, सरोवरादीनां समीपस्थ स्थापनीयमिति वास्तुशास्त्रज्ञानां मतं प्रवर्तन्ते। अतः नगरनिर्माणावसरे तथा नगरजनाः स्वस्य दैनिकजीवने आवश्यकजलपूर्तिं कर्तुं शक्यते। परन्तु वराहमिहिरचार्यः बृहत्संहितायाम् उपरोक्त श्लोके नगरस्य चतुर्दिक् पृथक्–पृथक् दिशायां जलस्थानस्य भिन्नं–भिन्नं शुभाशुभ फलस्य प्राप्तिं दर्शयति। यथा –यदा नगरस्य पूर्वादि दिशायां जलं स्थितमस्ति तदा तत्फलं पुत्रनाशः,

---

[495] वास्तुमण्डनम्, अ.३.३२

[496] बृहत्संहिता, ५३.६७–६८

[497] बृहत्संहिता, ५३.११९

आग्नेयकोणे– अग्निभयम्, याम्यां – शत्रुभयम्, नैऋत्यकोणे – स्त्रीकलहः, वारुण्यां – स्त्रीदु:शीलता, वायव्ये– निर्धनता, उत्तरे– धनवृद्धिः, ऐशान्ये – पुत्रवृद्धिः भवति।

अथ सूत्रधारमण्डनस्य मतानुसारं सुखपुरलक्षणमाह –

**वृत्तं वृत्तायताष्टमे अष्टपत्रं यवाकृतिः।**

**स्वस्तिकं पुरुषाकारं दुर्गमित्यादिसौख्यदम्।।**[४९८]

नित्य वृत्ताकारं, वर्गाकारं, अष्टभुजाकारं, पत्राकारं, यवाकृति, स्वस्तिकाकारं तथा पुरुषाकारं नगरं तथा दुर्गस्य निर्माणं करणीयं तत्फलं सौख्यप्रदायकम्।

बृहत्संहितायां वाराहमिहिराचार्य: वास्तुपुरुषस्य अविकले सुखप्राप्तिं भवति इति वदति। यथा हि –

**अविकलपुरुषे वसतां मानर्थयुतानि सौख्यानि।।**[४९९]

अतः नगरग्रामेषु सर्वत्रैव वास्तुपुरुषः प्रतिष्ठितः। गृहनगरग्रामाणां निवेशने वास्तुशास्त्रोपदेशकानां निर्देशितानां नियमानामनुसारेण यथानुरूपं विप्रादीनां वर्णानां यथाक्रमं निवेशनं करणीयम्। यथा हि –

**गृहनगरग्रामेषु च सर्वत्रैव प्रतिष्ठिता देवाः।**

**तेषु च यथानुरूपं वर्णा विप्रादयो वास्याः।।**[५००]

---

[498] वास्तुमण्डनम्, अ.३.३१

[499] बृहत्संहिता, ५३.६८

[500] बृहत्संहिता, ५३.६९